॥ॐ॥ॐ नमः॥ सर्वज्ञाय॥ यथास्थितं जगत्सर्वमीक्षते यः प्रतिक्षणं। श्रीवीराय नमस्तस्मै तस्मै भूतपरमात्म-
ने॥१॥ श्रुतकेवलिनः सार्वे विजयन्तां तमश्छिदः॥ येषां गिरां विलासेन स्फुरत्याद्यं वचोद्युतिः(?)॥२॥ जयति जि-
नवचनमनुपममज्ञानतमःसमूहरविबिंबं। शिवसुखफलकल्पतरुं प्रमाणनयसंगमसंकुलं॥३॥ सू-
र्यप्रज्ञप्तिमहं गुरूपदेशानुसारतः किंचित्। विवृणोमि यथाशक्ति स्पष्टं स्वपरोपकाराय॥४॥ अस्या निर्युक्तिर-
भूत्पूर्वं श्रीभद्रबाहुसूरिकृता। कलिदोषात्सा    नेशद्व्याचक्षे केवलं सूत्रं॥५॥ तत्र यस्यां नगर्यां यस्मिंस्तु उद्या-
ने यथा भगवान् गौतमस्वामी भगवन्तं    त्रिलोकीपतेः श्रीमन्महावीरस्यातः सूर्यवक्तव्यतां
पृष्टवान् यथा च तस्मै भगवान् व्याकृतवान्    तस्मात् तत्सर्वं प्रदर्शयिषुः प्रथमतो नगर्युद्यानाभिधा-
नपुरस्सरं सकलवक्तव्यतोपक्षेपवाक्यं॥    कामइदमाह॥१॥ ते णं कालेणमित्यादि॥ ते इति प्राकृत-
शैलीवशात्तस्मिन्निति द्रष्टव्यं। अस्यायमर्थो    यदा भगवान् विहरति स्म तस्मिन्। णमिति वाक्यालंकारे द्रष्ट-
व्यः अन्यत्रापि णं शब्दो वाक्यालंकारार्थो यथा इमाणं पुढवी इत्यादौ इति काले अधिकृतावसर्पिणीचतुर्थभा-
गरूपे अत्रापि णं शब्दो वाक्यालंकारार्थः॥ तेणं समएणं ति समयो वसरवाची तथा च वक्तारो नाद्याप्यस्य
वक्तव्यस्य समयो वर्त्तते। किमुक्तं भवति नाद्याप्येतस्य वक्तव्यस्यावसरो वर्त्तत इति तस्मिन्निति। यस्मि- १
न् समये भगवान् प्रस्तुतां सूर्यवक्तव्यतामवोचत् तस्मिन् समये मिथिला नाम नगरी अभवत्। ननु इदानीम-

पि सा नगरी वर्त्तते ततः कथमुक्तमभवदिति उच्यते। वक्ष्यमाणवर्णकयुक्ता विभूतिसमन्विता तदेवासी-
त् न तु विवक्षितप्रकरणविधानकाले एतदपि कथमवसेयमिति चेदुच्यते। अयं कालो अवसर्पिणी।
अवसर्पिण्यां च प्रतिक्षणं शुभा भावा हानिमुपगच्छन्ति। एतच्च प्रतीतं जिनप्रवचनवेदिनां। ततोऽभवदि-
त्युच्यमाने न विरोधलेशः। सा च कथंभूतेत्यस्यां नगर्या वर्णकमाह। रिद्धत्थिमियसमिद्धा पमुइयजणजाणवया जा-
व पासाईया इति। ऋद्धा भवनैः पौरजनैश्च    अतीव वृद्धिमुपगता। ऋद्धेः स्तिमितेति वचनात् स्तिमिता स्व-
चक्रपरचक्रतस्करडमरादिसमुत्थभयक-    ल्लोलमालाविवर्जिता समृद्धा धनधान्यादिविभूतियुक्ता
ततः पदत्रयस्यापि कर्मधारयः॥ तथा प-    मुइयजणजाणवयत्ति प्रमुदिताः प्रमोदवन्तः प्रमो-
दहेतुवस्तूनां तत्र सद्भावात् जना नगरीवास्त-    व्या लोका जानपदा जनपदभवास्तत्रायाताः
सन्तो यत्र सा प्रमुदितजनजानपदा यावच्छ-    ब्दोपपातिकग्रंथप्रतिपादितः समस्तोऽपि वर्णकः। अ-
इन्नजणमणुस्सा इत्यादिको द्रष्टव्यः॥ स च ग्रंथगौरवभयान्न लिख्यते। केवलं तत औपपातिकाद्वे-
दितव्यः॥ कियद्दूरं द्रष्टव्य इत्याह पासाईयाओ इति। अत्र पक्षे शाक्षपादात्(?) प्रासादीया इत्येतेन पदेन सह
पदचतुष्टयस्य सूचा कृता तानि च पदान्यमूनि प्रासादीया दर्शनीया अभिरूपा प्रतिरूपा तत्र प्रासादः प्रस-
त्ता प्रासादीया प्रासादवती इत्यर्थः॥ अत एव दर्शनीया द्रष्टुं योग्या प्रासादानामपि रमणीयत्वात्तथा

सूर्यप्रज्ञप्ति वृत्तिः २

अतिशयेनातिशयेन वा रमणीयकं रूपम् आकारो यस्याः साऽतिरूपा प्रतिविशिष्टम् असाधारणं रूपम् आकारो यस्याः सा प्रतिरूपा ॥१॥ तीसे णं मिहिलाए नयरीए बहिया उत्तरपुरत्थिमे दिसीभाए एत्थ णं माणिभद्दे नामं चेइए होत्था वन्नओ इति तस्या मिथिलानगर्या बहिर्उत्तरपौरस्त्ये उत्तरपूर्वरूपे दिग्विभागे ईशानकोण इत्यर्थः । णकारो वाक्यालंकारे एत्थ इति प्रथमैकवचनप्रभवः प्राकृतत्वात् आगम्य इदं द्विन्नरूपे इत्यादौ । अत्र अस्मिन् उत्तरपूर्वे दिग्विभागे माणिभद्रमिति नाम चैत्यम् अभवत् चिते लेप्यादिचयनस्य भावः कर्म वा चैत्यं तत्संज्ञाशब्दत्वात् देवताप्रतिबिंबे प्रसिद्धं ततः तदाश्रयत्वात् तद्देवतायाः गृहं तदप्युपचारात् चैत्यं तच्चेह व्यंतरायतनं द्रष्टव्यं । न तु भगवतामर्हतामायतनमिति । वण्णओ त्ति । तस्यापि चैत्यस्य वर्णको वक्तव्यः । स चौपपातिकग्रंथादवसेयः । तीसे णं मिहिलाए इत्यादि तस्यां च मिथिलायां नगर्यां जितशत्रुर्नाम राजा । तस्य देवी समस्तांतःपुरप्रधाना सा च सकलगुणधारणी धारिणी नाम देवी अभवत् इति । तस्मिन् राज्ञि तस्याश्च देव्या औपपातिकग्रंथोक्तो वर्णको वक्तव्यः ॥३॥ तेणं कालेणं तेणं समएणं तंमि माणिभद्दे चेइए सामी समोसढे । परिसा निग्गया धम्मो कहिओ पडिगया परिसा । तस्मिन् काले तस्मिन् समये तस्मिन् माणिभद्रे चैत्ये स्वामी समवसृतः स्वामी जगद्गुरुर्भगवान् श्रीमहावीरोऽर्हन् सर्वज्ञः सर्वदर्शी सप्तहस्तप्रमाणशरीरः सुसंस्थितः समचतुरस्रसंस्थानो वज्रऋषभनाराचसंहननः कज्जलप्रतिमकालिमापेतस्निग्धाकुंचितप्रदक्षिणावर्तमूर्धजः अनघतपनीयाभिरामकेशांतक २

भूमिरातपत्राकारोत्तमांगसन्निवेशः परिपूर्णशशांकमंडलादप्यधिकतरवदनशोभः पद्मोत्पलसुरभिगंधिनिःश्वासो वदनत्रिभागप्रमाणकंबूपमचारुकंधरः सिंहाद्यतिवत् परिपूर्णविपुलस्कंधप्रदेशो महापुरकपाटपृथुलवक्षःस्थलो नगरार्गलाभ्रमितलक्षणोपेतभोगिदेहपरिघोपमप्रलंबबाहुयुगलो रविशशिचक्रस्वस्तिकादिप्रशस्तलक्षणोपेतपाणितलः सुजातपार्श्वकृशोदरः सूर्यकरस्पर्शसंजातविकोशपद्मोपमनाभिमंडलः सिंहवत्संवर्तितकटीप्रदेशो निगूढजानुः ऊरुद्वंद्ववज्रजंघायुगलः सुप्रतिष्ठितकूर्मचारुचरणः प्रशस्तलक्षणांकितचरणतलप्रदेशोऽनाश्रवो निर्ममश्छिन्नस्रोता निरुपलेपोऽपगतप्रेमरागद्वेषमोहः स्वेदादितिशायोपेतो देवोपनीतस्वर्णकमलकमलेषु पादन्यासं कुर्वन् आकाशगतेन धर्मचक्रेण आकाशगतेन छत्रेण आकाशगताभ्यां चामराभ्यां आकाशगतेनापि स्फटिकविशेषमयेन सपादपीठेन सिंहासनेन पुरतो देवैः प्रकृष्यमाणेन रत्नधर्मध्वजेन चतुर्दशभिः श्रमणसहस्रैः षट्त्रिंशता संख्यैरार्यिकासहस्रैः परिवृतो यथासुकल्पं सुखंसुखेन विहरन् यथारूपम् अवग्रहं गृहीत्वा संयमेन तपसा चात्मानं भावयन् समवसृतः । समवसरणवर्णनं च भगवत औपपातिकग्रंथादवसेयं । परिसा निग्गय त्ति । मिथिलाया नगर्या वास्तव्यो लोकः समवसृतं भगवंतमागतं श्रुत्वा भगवद्वंदनार्थं स्वस्मात् स्वस्मादाश्रयात् निर्गत इत्यर्थः । ता निर्गमसंवेदं मिथिलानगर्याः सिंघाडगतियचउक्कचच्चरचउम्मुहमहापहेसु बहुजणो अन्नमन्नस्स

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

एवमाइक्खइ एवं भासेइ एवं पन्नवेइ एवं परूवेइ एवं खलु देवाणुप्पिया समणे भगवं महावीरे आइगरे तित्थगरे
जाव सव्वन्नू सव्वदरिसी आगासगएणं छत्तेणं जाव सुहंसुहेणं विहरमाणे इहमागए इह संपत्ते इह समोसढे इहेव
मिहिलाए नयरीए बहिया माणिभद्दे चेइए अहापडिरूवं उग्गहं उगिण्हित्ता अरिहा जिणे केवली समणगणपरिवुडे
संजमेणं तवसा अप्पाणं भावेमाणे विहरइ तं महप्फलं खलु देवाणुप्पिया तहारूवाणं अरहंताणं भगवंता
णं नामगोयस्स वि सवणयाए किमंग पुण अभिगमणवंदणनमंसणपडिपुच्छणपज्जुवासणयाए तमेगस्स
वि आरियस्स धम्मियस्स सुवयणस्स सवणयाए किमंग पुण विउलस्स अट्ठस्स गहणयाए
तं गच्छामो णं देवाणुप्पिया समणं भगवं महावीरं वंदामो नमंसामो सक्कारेमो सम्माणेमो
कल्लाणं मंगलं देवयं चेइयं पज्जुवासामो एयं णे इहभवे य परभवे य हियाए सुहाए आणुगामियत्ता
ए भविस्सइ तए णं मिहिलाए नयरीए बहवे उग्गा लोगा इत्यादि औपपातिकग्रंथोक्तं सर्वमवसेयं यावद्बह
मस्सा परिसा पर्षद्वा पर्युपासीना तिष्ठति धर्मकथेति तस्याः पर्षदः श्रुत्वा तिस्रो बहुजनसाधार
णया अर्द्धमागधभाषया धर्मं परिकहेइ जहा अत्थि लोए अत्थि अलोए एवं जीवा अजीवा इत्यादि
तथा जह जीवा बज्झंती मुच्चंती जह य संकिलिस्संति जह दुक्खाणं अंतं करिंति केइ अपडिबद्धा इत्यादि तथ
दियचित्ता जह जीवा सागरं तरिऊण इह परिक्षीणकर्माणः सिद्धाः सिद्धालयमुवेंति ॥ इत्यादि आइक्खइ इति ३

जाव जामेव दिसिं पाउब्भूया तामेव दिसिं पडिगयत्ति अत्र यावच्छब्दादिदमौपपातिकग्रंथोक्तं द्रष्टव्यं । तए णं सा म
हइमहालिया परिसा समणस्स भगवओ महावीरस्स अंतिए धम्मं सोच्चा निसम्म हट्ठतुट्ठा समणं भगवं महावीरं ति
क्खुत्तो आयाहिणपयाहिणं करेइ करित्ता वंदइ नमंसइ वंदित्ता नमंसित्ता एवं वयासी सुयक्खाए णं भंते निग्गंथे पाव
यणे नत्थि णं अन्ने केइ समणे वा माहणे वा एरिसं धम्ममाइक्खित्तए एवं वइत्ता जामेव दिसं पाउब्भूया तामेव दि
सिं पडिगया । तए णं से जियसत्तू राया समणस्स भगवओ महावीरस्स अंतिए धम्मं सोच्चा निसम्म हट्ठतुट्ठे जाव हयहियए उ
ट्ठाए उट्ठेइ उट्ठाए उट्ठित्ता समणं भगवं महावीरं वंदइ नमंसइ वंदित्ता नमंसित्ता एवं वयासी सुयक्खा
ए णं भंते निग्गंथे पावयणे जाव एरिसं धम्ममाइक्खित्तए एवं वइत्ता हत्थिखंधं दुरुहइ दुरुहित्ता समणस्स भ
गवओ महावीरस्स अंतियाओ माणिभद्दाओ चेइयाओ पडिनिक्खमइ पडिनिक्खमित्ता जामेव दिसिं पाउब्भूए ता
मेव दिसिं पडिगए इति । इदं च सकलमपि सुगमं नवरं यामेव दिशमवलंब्य किमुक्तं भवति यतो दिशः सकाशा
त् प्रादुर्भूतः समवसरणे समागतः तामेव दिशं प्रतिगतः ॥२॥ तेणं कालेणं तेणं समएणं समणस्स भगवओ महावी ४
रस्स जेट्ठे अंतेवासी इंदभूई नामं अणगारे गोयमगोत्तेणं सत्तुस्सेहे समचउरंससंठाणसंठिए वज्जरिसह
नारायसंघयणे जाव एवं वयासी ॥ इति तस्मिन् काले तस्मिन् समये णेत्ति वाक्यालंकारे ॥ श्रमणस्य भ

सर्व्यश०वृ०
१४

गवतो महावीरस्य ज्येष्ठ इति प्रथमः ॥ अंतेवासी शिष्यः ॥ अनेन पदद्वयेन तस्य सकलसंघाधिपतित्वमावेद्य
ति ॥ इंद्रभूतिरिति मातापितृकृतनामधेयः नामंति प्राकृतत्वात् विभक्तिपरिणामेन नाम्नेति द्रष्टव्यं ॥ अंतेवासी
च किल विवक्षया श्रावकोपि स्यादतस्तदाशंकाव्यवच्छेदार्थमाह अनगारः न विद्यते अगारं गृहमस्येति अ
नगारः ॥ अयं च विगीतगोत्रोपि स्यादत आह गोतमो गोत्रेण गोतमगोत्रसमन्वित इत्यर्थः ॥ अयं च तत्
कालोचितदेहपरिमाणापेक्षया न्यूनाधिकदेहोपि स्यादत आह सप्तोत्सेधः ॥ सप्तहस्तप्रमाणशरीरो
च्छ्रायः ॥ अयं चाद्भुतालक्षणहीनोपि स्यादतस्तदाशंकापनोदार्थमाह ॥ समचउरंससंठाणसंठि
तः समाः शरीरलक्षणशास्त्रोक्तप्रमाणाविसंवादिन्यश्चतस्रोश्रयो यस्य तत्समचतुरस्रं अस्र
यश्चेह चतुर्दिग्विभागोपलक्षिताः शरीरावयवा द्रष्टव्याः ॥ अन्ये त्वाहुः समा अन्यूनाधिकाश्चतस्रोपि
अश्रयो यत्र तत्समचतुरस्रं अश्रयश्च पर्यंकासनोपविष्टस्य जानुनोरंतरं आसनस्य ललाटोपरिभागस्य चां
तरं दक्षिणस्कंधस्य वामजानुनश्चांतरं वामस्कंधस्य दक्षिणजानुनश्चांतरमिति अपरे त्वाहुः ॥ विस्तारोत्सेध
योः समत्वात्समचतुरस्रं तच्च तत्संस्थानं च संस्थानमाकारस्तेन संस्थितो व्यवस्थितो यः स तथा ॥ अयं च हीनसंहन
नोपि किंचित् स्यादत आह वज्ररिसहनारायसंघयणे नाराचमुभयतो मर्कटबंधः ॥ ऋषभस्तदुपरिवे
ष्टनपट्टः ॥ कीलिका अस्थित्रयस्यापि भेदकमस्थि एवंरूपं संहननं यस्य स तथा ॥ एवं जाव वयासी इति यावत् ४

MEMORIAL

उद्देपादानादिदमत्र क्रमप्रवासमयं। कणगपुलगनिघसपम्हगोरे। उग्गतवे दित्ततवे समणस्स भगवओ महावीरस्स अदूर
सामंते उड्ढंजाणू अहोसिरे झाणकोट्ठोवगए संजमेणं तवसा अप्पाणं भावेमाणे विहरइ ॥६॥ तएणं से भ
गवं गोयमे जायसड्ढे जायसंसए जायकोउहल्ले उप्पन्नसड्ढे उप्पन्नसंसए उप्पन्नकोउहल्ले संजायसड्ढे संजा
×तत्ततवे महातवे ओराले घोरे घोरगुणे घोरतवस्सी। घोरबंभचेरवासी। उच्छूढसरीरे संखित्तविउलतेउ
लेस्से। चउदसपुव्वी। चउनाणोवगए सव्वक्खर सन्निवाई समणस्स ×उठयसाहूं संजायसंसए संजायको
उहल्ले समुप्पन्नसड्ढे समुप्पन्नसंसए समुप्पन्नको उहल्ले। उट्ठाए उट्ठेइ उट्ठाए उट्ठित्ता जेणेव समणे भगवं म
हावीरे तेणेव उवागच्छइ उवागच्छित्ता स मणं भगवं महावीरं तिक्खुत्तो। आयाहिणं पयाहिणं क
रेइ। आयाहिणं पयाहिणं करेत्ता वंदइ नमं सइ। वंदित्ता नमंसित्ता णच्चासन्ने णाइदूरे सुस्सूसमाणे नमंस
माणे अभिमुहे विणएणं पंजलिउडे पज्जुवा। समाणे एवं वयासी। अस्यायमर्थः। कनकस्य सुवर्णस्य यः पु
लकोलवस्तस्याया निकषः कषपट्टके रेखारूपः तस्य पद्मस्य यद्दलं पक्ष्माणि केसराणि वा ॥ अथवा दसमु
दायोपचारात् यथा देवदत्तस्य हस्ताग्ररूपापि अवयवावापि देवदत्त ॥ तथा च देवदत्तस्य हस्ताग्रं स्पृष्ट्वा लोको व
दति देवदत्तो मया स्पृष्ट इति ततः कनकपुलकनिकषवत्पद्मकेसरवद्वा यो गौरः ॥ स कनकपुलकनिकषप
क्ष्मगौरः ॥ अथवा कनकस्य यः पुलको द्रुतत्वे सति बिंदुस्तस्य निकषो वर्णतः ॥ स इह कनकपुलकनिकषः

सूर्य०प्र०वृत्ति
५

तथा पद्मवत्पद्मकेसरवद्वा यो गौरः स पद्मगौरः। ततः पदद्वयस्य कर्मधारयः समासः। अथवा विशिष्टचरणरहि
तोऽपि शंक्यते तत आह। उग्गतवे उग्रम् अप्रधृष्यं तपोऽनशनादि यस्य स तथा। यदन्येन प्राकृतपुंसा न शक्यते
चिंतयितुमपि मनसा तादृशेन तपसा युक्त इत्यर्थः। तथा दीप्तं जाज्वल्यमानदहन इव कर्मवनगहनदहनस
मर्थतया ज्वलितं तपो धर्मध्यानादि यस्य स तथा। तत्ततवे त्ति तप्तं तपो येन स तप्ततपाः। एवं हि तेन तपस्तप्तं येन
सर्वाण्यप्यशुभानि कर्माणि भस्मसात्कृतानीति महत् आशंसादोषरहितत्वात् प्रशस्तं तपो यस्य स महातपाः। तथा
उराले त्ति उदारः प्रधानः। अथवा उरालो भीमः उग्रादिविशेषणविशिष्टतपःकरणतः पार्श्वस्थानाम
ल्पसत्वानां भयानक इत्यर्थः। तथा घोरा त्ति घृणः परीषहेंद्रियादिरिपुगणविनाशमाश्रित्य नि-
र्दय इत्यर्थः। तथा घोरा अन्यैर्दुरनुचरा गुणा मूलगुणादयो यस्य स तथा। तथा घोरैस्तपोभिस्तपस्वी घो
रबंभचेरवासि त्ति। घोरं दारुणं अल्पसत्वैर्दु रनुचरत्वाद्ब्रह्मचर्यं तत्र वस्तुं शीलं यस्य स तथा। उच्छूढसरीरे त्ति
उच्छूढम् उज्झितमिवोज्झितं संस्कारपरित्यागात् शरीरं येन स उच्छूढशरीरः। संखित्तविउलतेयलेसे त्ति। संक्षिप्ता
शरीरांतर्गतत्वेन ह्रस्वतां गता विपुला विस्तीर्णा अनेकयोजनप्रमाणक्षेत्राश्रितवस्तुदहनसमर्थत्वात् तेजोले
श्या विशिष्टतपोजन्यलब्धिविशेषप्रभवा तेजोज्वाला यस्य स तथा। चउदसपुव्वि त्ति। चतुर्दश पूर्वाणि विद्यंते
यस्य तेनैव तेषां रचितत्वात् असौ चतुर्दशपूर्वी। अनेन तस्य श्रुतकेवलितामाह। स चावधिज्ञानादिविकलोऽपि ५

स्यादत आह। चउनाणोवगए मतिश्रुतावधिमनःपर्यायज्ञानरूपज्ञानचतुष्टयसमन्वित इत्यर्थः। उक्तविशेषणद्व
ययुक्तोऽपि कश्चिन्न समग्रश्रुतविषयव्यापिज्ञानो भवति। चतुर्दशपूर्वविदामपि षट्स्थानपतितत्वेन श्रवणादत आ
ह। सव्वक्खरसन्निवाई। अक्षराणां सन्निपाताः संयोगा अक्षरसन्निपाताः सर्वे च ते अक्षरसन्निपाताश्च सर्वाक्षरस
न्निपाताः ते यस्य ज्ञेयाः संति स तथा। किमुक्तं भवति। या काचिज्जगति पदानुपूर्वी वाक्यानुपूर्वी वा संभवति ताः स
र्वा अपि जानातीति। एवंगुणविशिष्टो भगवान्नूवे नयरा शिष्यसाराहि इतिकृत्वा शिष्यावारत्वाच्च श्रमणस्य भगव
तो महावीरस्य अदूरसामंते विहरतीति यो गः तत्र दूरं विप्रकृष्टं सामंतं संनिकृष्टं तत्प्रतिषेधाददूरसा
ता मंतं तत्र वर्त्तीति निकट इत्यर्थः। किंविशिष्ट सन् तत्र विहरतीत्यत आह। उड्ढंजाणु त्ति ऊर्ध्वजानुनी य
स्यासौ ऊर्ध्वजानुः शुद्धपृथिव्यासनवर्जनादौ पग्रहिकनिषद्यायाश्चाभावादुत्कुटुकासन इत्यर्थः। अ
धःशिराः नोर्ध्वं तिर्यग्वा विक्षिप्तदृष्टिः किंतु नियत भूभागनियमितदृष्टिरिति भावः। झाणकोट्ठोवगए त्ति ध्यानं
धर्म्यं शुक्लं वा तदेव कोष्ठः कुशूलो ध्यानकोष्ठस्तमुपगतो ध्यानकोष्ठोपगतो यथा हि कोष्ठके धान्यं प्र
क्षिप्तमविप्रसृतं भवति एवं भगवानपि ध्यानतोऽविप्रकीर्णेंद्रियांतःकरणवृत्तिरित्यर्थः। संयमेन पंचाश्रवनि
रोधादिलक्षणेन तपसा अनशनादिना च शब्दोऽत्र समुच्चयार्थो लुप्तो द्रष्टव्यः। संयमतपोग्रहणं चात्र
योः प्रधानमोक्षांगख्यापनार्थं प्राधान्यं च संयमस्य नवकर्मानुपादानहेतुत्वेन तपसश्च पुराणकर्मनि

सूर्यप्रज्ञप्ति
१६

ऊर्द्धं हेतुत्वेन तथादालितवत्कर्माणि पादानां स्तुराणकर्मरूपणाव्यज्ञायते सकलकर्मक्षयलक्षणो मोक्षस्तेन व
तिसंयमतपसा सम्यक्प्रतिपाद्यमिति। अप्पाणं भावेमाणे विहरइत्ति। आत्मानं भावयन्‌वासयन्तिष्ठती।
त्यर्थः। ततो णं से इति ततो ध्यानकोष्ठोपगतविहरणादनन्तरं णमिति वाक्यालंकारार्थः। स भगवान् गोत
मो जायसड्ढे इत्यादि। जातश्रद्धादिविशेषणः सन्नुत्तिष्ठतीति योगः। तत्र जाता प्रवृत्ता श्रद्धा इच्छा वक्ष्यमा
णार्थतत्त्वज्ञानं प्रति यस्यासौ जातश्रद्धः। तथा जातः संशयो यस्य स जातसंशयः। संशयो नामानवधारिता
र्थं ज्ञानं सा चैवं भगवत इह सूर्यादिवक्तव्य ताश्चान्यथा चान्यथा तीर्थान्तरीयैः प्ररूपितेति। किं तत्त्वमि
ति संशयः। तथा जातकुतूहलो जिज्ञा तं कथमेतदित्यस्य स जातकुतूहलः। जातोत्सुक्य इत्यर्थः।
यथा कथमिमां सूर्यवक्तव्यतां भगवान् प्र ज्ञापयिष्यतीति। तथा उप्पन्नसड्ढे। उत्पन्ना प्रागभूता सती
भूता श्रद्धा यस्यासौ उत्पन्नश्रद्धः। अथ जातश्र द्धः इत्यनयोर्वादिनोश्च किमर्थमुत्पन्नश्रद्ध इत्युक्तमिति। उच्यते प्रवृत्त
श्रद्धत्वात् उत्पन्नश्रद्धत्वस्य लब्धत्वात् उत्पन्नश्रद्धमपवर्तत इति। आह। हेतुत्वप्रदर्शनार्थं तथा हि प्र
वृत्तश्रद्धत्वात् उत्पन्नश्रद्ध इति। हेतुत्वप्रदर्शनं चोपपन्नं तस्य काव्यालंकारत्वात्। यथा प्रवृत्तदीप
मपवृत्तभास्करं प्रकाशवंशंशुधवलावलीमित्यत्र च चापि प्रवृत्तदीपत्वादेवापवृत्तभास्करत्वमवगतं
तथाप्यपवृत्तभास्करत्वं प्रवृत्तदीपत्वादेर्हेतुतयोपात्तमिति समाचीनं। उप्पन्नसाहा। उप्पन्नसड्ढे। उप्पन्नसंस ६

ए इति पाठत्रयं तथा संजायसड्ढे इत्यादि पदषट्कं प्राग्वत्। नवरमिह सम्यगर्थः प्रकर्षादिवचनो वेदितव्यः। उठाए उ
ट्ठेइ त्ति उत्थानमुत्थानं ऊर्ध्वं वर्तनं तया उत्तिष्ठति। इह उट्ठाए इत्युक्ते क्रियासमावेशमपि प्रतीयते यथा वक्त्रं मुखं निः
ताततस्य बलविदाग्भुजायत्फक्त। जेणेवेत्यादि प्राकृतत्वाल्लिङ्गव्यत्ययः यत्रा येनेति यस्मिन्नित्यर्थः इत्यर्थे
॥ यस्मिन् प्रदेशे श्रमणो भगवान् महावीरो वर्तते तेणेवेति तस्मिन्नेव दिग्भागे उपागच्छति इह वर्तमान
कालनिर्देशः तत्कालापेक्षया उपागमने क्रियाया वर्तमानत्वात् परमार्थतस्तूपागतवानिति द्रष्टव्यम्। उपाग
म्य च श्रमणं भगवन्तं महावीरं कर्मतापन्नं त्रिकृत्वः त्रीन्वारान् आदक्षिणप्रदक्षिणां करोति। आ
दक्षिणाच्च दक्षिणहस्तादारभ्य प्रदक्षि णः परितो भ्राम्यतो दक्षिण एव आदक्षिणप्रदक्षिणः
तं करोति कृत्वा वंदते स्तौति नमस्यति का येन प्रणमति वंदित्वा नमसित्ता च नच्चासन्ने नात्यासन्ना
ति निकटे अवग्रहपरिहारात्। अथवा नात्या सन्ने स्थाने वर्तमान इत्यर्थः। तथा नातिदूरे अतिविप्रकृष्टे
नौचित्यपरिहारात् अथवा नातिदूरस्थाने सुस्सूसमाणे त्ति भगवद्वचनानि श्रोतुमिच्छन् अभिमुखे त्ति अभि
गवंतं प्रति मुखमस्येत्यभिमुखः। विणएणं ति विनयेन हेतुना पंजलिउडे त्ति प्रकृष्टः प्रधानो ललाटतट
घटितत्वेन अंजलिर्दशनखसंस्पर्शविशेषः कृतो विहितो येन स प्राञ्जलिकृतः। आहिताग्न्यादिराकृतिगणतया
कृतशब्दस्य परनिपातः। पज्जुवासमाणे इति पर्युपासीनः सेवमानः। अनेन विशेषणेन कदाचिन्नश्रवण

विधिरूपदर्शिनः॥ उक्तं च। निद्दाविगहापरिवज्जियाहिं गुत्तेहिं पंजलिउडेहिं। भत्तिबहुमाणपुव्वं उवउत्तेहिं सुणेयव्वं॥ इति॥
॥एवं वयासित्ति॥ एवं वक्ष्यमाणेन प्रकारेण सर्वा अपि वक्ष्यमाणा विषयं प्रश्नमवादीत्। उक्तवान् कथमुक्तवानिति शिष्यस्य
प्रश्नावकाशमाशंक्य प्रथमतो विंशतिप्राभृतेषु यथाक्रमं यत्तदुपक्षिपद्गाथापंचकमाह। कइ मंडलाइं वच्चइ तिरिच्छा
किं व गच्छइ। ओभासइ केवइयं सेयाइ किं ते संठिई॥१॥ कहिं पडिहया लेसा कहिं ते ओयसंठिई। के सूरियं वरयते के ते
उदयसंठिई॥२॥ कहं कट्ठा पोरुसीछाया जोगे किं ते व आहिए। किं ते संवच्छराणादी कइ संवच्छराइय॥३॥ कहं चंदमसो वु
ड्ढी कया ते दोसिणा बहू। के सिग्घगई वुत्ते। कहं दोसिणलक्खणं॥४॥ चवणोववाय उच्चत्ते सूरिया कइ आ
हिया। अणुभावे के व संवुत्ते एवमेयाइं वीसई॥५॥ प्रथमे प्राभृते सूर्यो वर्षमध्ये कति मंडलान्येक
वारं कति वा मंडलानि द्विःकृत्वो व्रजतीत्येतन्निरूपणीयं किमुक्तं भवति। एवं गोतमेन प्रश्ने कृते तदनंतरं सं
वेतद्विषयं निर्वचनं प्रथमे प्राभृते वक्तव्यमिति। एवं सर्वत्रापि भावनीयं॥१॥ द्वितीये प्राभृते किं कथं वा तिरश्चीनं प्रा
भृतवक्तव्यतापेक्षया सर्वत्र बाह्य तिर्यग् गच्छति॥२॥ तृतीये चंद्रसूर्यौ वा कियत्क्षेत्रमवभासयतीति प्रकाशयतीति
॥३॥ चतुर्थे श्वेततायाः प्रकाशस्य किं कथं ततेवमातसंस्थितिर्व्यवस्थितिः॥४॥ पंचमे कस्मिन् सूर्यस्य प्रतिहता ले
श्यति॥५॥ षष्ठे कथं केन प्रकारेण किं सर्वकालमेकरूपावस्थायितया उतान्यथा ओजसः प्रकाशस्य संस्थितिरा
ख्यातेति॥६॥ सप्तमे के पुद्गलाः सूर्यं वरयंति। सूर्यलेश्या संस्पृष्टा भवंतीति॥७॥ अष्टमे कथं केन प्रकारेण भगवन् ७

तितव मातन सूर्यस्योदयस्योदयसंस्थितेः॥८॥ नवमे कति काष्ठा किंप्रमाणा पौरुषीच्छाया॥९॥ दशमे योग इति
वस्तु किं ते त्वया भगवताख्यातमिति॥१०॥ एकादशे कास्ते तव मतेन संवत्सराणामादिरिति॥११॥ द्वादशे कति संवत्सरा
इति॥१२॥ त्रयोदशे कथं केन प्रकारेण चंद्रमसो वृद्धिर्वृद्धिर्भवति तासनुपलक्षणमेतत्तन्न हृत्यपवृद्धिर्भवति
ला सहत्यर्थः॥१३॥ चतुर्दशे कदा कस्मिन् काले तव मतेन चंद्रमसो ज्योत्स्ना बहुः प्रभूतेति॥१४॥ पंचदशे शीघ्र
गत्यादीनां मध्ये शीघ्रगतिरुक्ता इति॥१५॥ षोडशे किं ज्योत्स्नालक्षणमिति वक्तव्यं॥१६॥ सप्तदशे चंद्रा
दीनां च्यवनमुपपातश्च स्वमतपरमतापेक्षया वक्तव्यः॥१७॥ अष्टादशे चंद्रादीनां समतलाद्भूभागा
दूर्ध्वमुच्चत्वं यावति प्रदेशे व्यवस्थितं तत्स्वमतपरमतापेक्षया प्रतिपाद्यं॥१८॥ एकोनविं
शतितमे कति सूर्यचंद्रा द्वीपादावाख्याता इत्यभिधेयं॥१९॥ विंशतितमे कोऽनुभावश्चंद्रादीनामि
ति॥२०॥ एवमनंतरोक्तेन प्रकारेण एतान्यनंतरोदितान्यधिकारोपेतानि विंशतिप्राभृतान्यस्यां सूर्य
प्रज्ञप्तावक्तव्यानि॥ अथ प्राभृतमिति कः शब्दार्थः उच्यते इह प्राभृतं नाम लोके प्रसिद्धं यदभीष्टाय पु
रुषायादेशकालोचितं दुर्लभं वस्तु परिणामसुंदरमुपनीयते प्रकर्षेण समंतात् ध्रियते चित्तमनेनेति प्राभृत
मिति व्युत्पत्तेः॥ विवक्षिताश्च पि
वन्नपरिणामसुंदरा आलोचितस्य विनयादिगुणकलितस्य शिष्यस्यादेशकाले

सूर्यप्र० वृ०
८

वृत्त्येतो पनीटैं ततः प्राभृतप्राभृतानि प्राभृतेष्वंतर्गतानि प्राभृतप्राभृतानि। तदेवमुक्ता विंशतेरपि प्राभृतानामर्था
धिकाराः॥ ॥ संप्रति प्रथमप्राभृते यान्यंतरालवर्त्तीन्यष्टौ प्राभृतप्राभृतानि तेषामर्थाधिकारानुपदिदर्शयिषुराह
॥ ॥ वड्ढोवुड्ढी मुहुत्ताण मद्धमंडलसंठिई। के ते चिन्नं परियरइ अंतरं किं चरंति य॥१॥ उग्गाहइ केवइयं केवतियं च विकंपइ य
मंडलाण य संठाणे विक्खंभो अट्ठ पाहुडा॥२॥ इह प्रथमस्य प्राभृतस्य सत्केऽपि प्रथमे प्राभृतप्राभृते मुहूर्त्तानां दिवसरात्रि
गतानां वृद्ध्यपवृद्धी वक्तव्ये॥२ द्वितीये ऽर्द्धमंडलस्य द्वयोरपि सूर्ययोः प्रत्यहोरात्रमर्द्धमंडलविषया संस्थिति वक्त
व्या वक्तव्या॥३ तृतीये यत्क्षेत्रमात्मना सूर्यः॥ कियदपरेण सूर्येणाचीर्णं क्षेत्रं प्रतिचरतीति निरूप्यं॥४ चतुर्थे
द्वावपि सूर्यौ परस्परं कियत्प्रमाणमंतरं कृत्वा चारं चरत इति प्रतिपाद्यं॥५ पंचमे कियत्प्रमाणं द्वीपंस.
मुद्रं वा विगाह्य सूर्यश्चारं चरतीति॥६ षष्ठे एकैकेन रात्रिंदिवेन एकैकः सूर्यः कियत्प्रमाणं क्षेत्रं विकंप्य विकं
प्य चारं चरतीति॥७ सप्तमे मंडलानां संस्थानमभिधानीयं॥८ अष्टमे मंडलानामविष्कंभो बाहल्यमिति॥ एवम
र्थाधिकारसमन्वितानि प्रथमप्राभृते ऽष्टौ प्राभृतप्राभृतानि॥ ॥ संप्रति प्रथम एव प्राभृते चतुरादिषु प्राभृतप्राभृ
तेषु यथायथं यावत्यः प्रतिपत्तयः परमतरूपास्तत्र तावतीरभिधित्सुराह॥ ॥ छप्पंच य सत्तेव य अट्ठ य तिन्नि य हवंति पडि
वत्ती। पढमस्स पाहुडस्स उ हवंति एयाउ पडिवत्ती॥१ प्रथमस्य प्राभृतस्य चतुरादिषु प्राभृतप्राभृतेषु यथाक्रममेता
प्रतिपत्तयः परमतरूपा भवंति। तद्यथा चतुर्थे प्राभृतप्राभृते षट् प्रतिपत्तयः। पंचमे पंच। षष्ठे सप्त। सप्तमे अष्टौ ८

अष्टमे तिस्रः इति॥ ॥ संप्रति द्वितीये प्राभृते यदर्थाधिकारोपेतानि त्रीणि प्राभृतप्राभृतानि प्रतिपादयति॥ ॥
पडिवत्तीओ उदए तह अत्थमणेसु य वाए कण्णकलं मुहुत्ताण गई इय। द्वितीयस्य प्राभृतस्य प्रथमे प्राभृतप्राभृ
ते सूर्यस्योदयास्तमये नाष्ट प्रतिपत्तयः परमतरूपाः प्रतिपाद्याः स्वमतप्रतिपत्तिश्च द्वितीये भेदघातः कर्ण
कला च वक्तव्या। किमुक्तं भवति। लदे मंडलस्यापांतराले तन्मार्गगमनं भेदघात इति वचनात्तास एकप
भ्रांतेन प्रतिपाद्यं यथा विवक्षितमंडलं सूर्येण परित्यज्य तदनंतरं सूर्यो ऽपरमनंतरं मंडलं संक्रामतीति तथा क
र्णः कोटिभागः तमधिकृत्यापरार्धो मंडलं कला वक्तव्या यथा विवक्षिते मंडले सर्वोऽपि प्रथमक्ष
णप्रविष्टो सन् पूर्वापरकोटिद्वयल क्षीकृत्य भ्रमपरिपूर्णं यथावस्थितं मंडलं विवक्षित्वा
तदपरिमंडलस्य कर्णकोटिभागरूपम भिसमीक्ष्य ततः कलया रमावयामात्रया इत्यर्थः॥ अपरमं
डलानि शुरखमसि संक्रामं तो चारं चरत इति तृतीये प्राभृतप्राभृते प्रतिमंडलं मुहूर्त्तैर्भ्रमण गति गतिपरिमाणमभि
धातव्यं तत्र निष्क्रामति प्रविशति वा सूर्ये शीघ्रगतिर्भवति तां हि गाममति विवक्षुराह॥ ॥ निक्खममाणे सि
ग्घगई पविसंते मंदगई इय। चुलसीइसयं पुरिसाणं तत्थ य पडिवत्तीओ॥१ निःक्रामन् सर्वाभ्यंतरान्मंडला
द्बहिर्निर्गच्छन् सूर्यः प्रत्यनंतरं मंडलं संक्रामन् शीघ्रगतिः शीघ्रतरगतिर्भवति। प्रविशन् सर्वबाह्यान्मंडलादभ्यंत
रमार्गं व्रजन् प्रतिमंडलं मंदगति मंदमंदगतिः॥ तेषां च मंडलानां चतुरशीतं चतुरशीत्यधिकं शतं सूर्यस्य भवतीति .

सूर्यप्र०टी०
पत्र ८

यां मंडलानां च विष्कंभं प्रतिमुहूर्त्तं सूर्यस्य गतिपरिमाणं चिंतयांबभूवांसः प्रतिपत्तयो नाम मतांतररूपा भवंति सं
प्रतिकस्मिन्प्राभृतप्राभृते कति प्रतिपत्तय इत्येतत्प्ररूपयति। ता उदयम्मि अट्ठ भणियाओ भेदघाए दुवे य पडिवत्ती।
चत्तारि मुहुत्तगईए हुंति तइयंमि पडिवत्ती। यथा प्राभृते त्रिषु प्राभृतप्राभृतेषु यथाक्रमममूः संख्याः प्रतिपत्तयो
भवंति। तद्यथा प्रथमप्राभृते उदये उदयसंस्थितौ वक्ष्यमाणा यत्र लक्षिता अष्टौ लक्षणा वाचीं प्रकरणाधारे प्रतिपत्तयो
द्वितीये प्राभृतप्राभृते भेदघाते भेदघातरूपे परमतवक्ष्यते प्रतिपत्तिद्वयं प्रतिपत्ती भवतः। तृतीये प्राभृ
तप्राभृते मुहूर्तगतौ मुहूर्तगतौ मुहूर्तगतिविषये वक्ष्यते प्रतिपत्तिचतुष्टयं प्रतिपत्तयो भवंति चतस्र इति विंशति
तमं संकल्पं निर्देशः प्राकृतत्वात् प्राकृ तत्र लिंगं व्यभिचार्यपि यदाह पाणिनिः स्वप्राकृतलक्षण
लिंगं व्यभिचार्यपीति॥ ता सं प्रति दशमस्य प्राभृतस्य तत्र प्रथमाद्यंतराले वर्तिनां विंशतिसंख्याभिः प्राभृतप्राभृता
नि तेषामर्थाधिकारमाह। आवलिय मुहुत्तग्गे एवं भागा य जोगस्स। कुलाइं पुन्नमासी य सन्निवाए य संठि
ई तारग्गं च नेता य चंदमग्गत्ति यावरे। देवताण य अज्झयणे मुहुत्ताणं नामया इय। दिवसा राई वुत्ता य तिहिगोत्त
भोयणाणि य। आइच्चवारमासा य पंच संवच्छराइ य। जोइसस्स य दाराइं नक्खत्तविजए वि य। दसमे पाहुडे एए
बावीसं पाहुडपाहुडा। दशमे प्राभृते प्रतिपत्तिनिर्देशः प्राकृतत्वात् एतदर्थाधिकारोपेतानि द्वावि
शतिः प्राभृतप्राभृतानि भवंति। तद्यथा प्रथमे प्राभृतप्राभृते नक्षत्राणामावलिकाक्रमो वक्तव्यो यथा अभिजिदादी ८

नि नक्षत्राणि सर्वाणीति। द्वितीये नक्षत्रविषयं मुहूर्त्तं मुहूर्त्तपरिमाणं वक्तव्यं॥२ तृतीये एवं भागा इति पूर्वपश्चिमा
दिप्रकारेण भागा वक्तव्याः॥३ चतुर्थे योगस्यादिर्वक्तव्यः। तथा च वक्ष्यति। ता कहं ते जोगस्स आइ
आहियत्ति वएज्जा इति॥४ पंचमे कुलानि उपकुलानि कुलोपकुलानि च वक्तव्यानि॥५ षष्ठे पौर्णमा
सीतिथिर्मासी वक्तव्येति शेषः॥६ सप्तमे सन्निपात इति अमावास्यापौर्णमासीसन्निपातो वक्तव्यः॥७ अ
ष्टमे नक्षत्राणां संस्थितिः संस्थानं वक्तव्यं॥८ नवमे नक्षत्राणां ताराग्रं तारापरिमाणं वक्तव्यं॥९ दशमे नेता
वक्तव्यो यथा कति नक्षत्राणि स्वयमस्तंगमाननेनाहोरात्रं परिसमाप्य कं मासं नयंतीति॥१० अपरस्मि
न्नेकादशे प्राभृतप्राभृते चंद्रमार्गाश्चंद्रमंडलानि नक्षत्राद्यधिकृत्य वक्तव्यानि॥११ द्वादशे
नक्षत्राधिपतीनां देवतानामध्ययनानि अ धीयते ज्ञायते यस्मिन्नित्यध्ययनानि नामानि वक्तव्यानि॥१२
त्रयोदशे मुहूर्त्तानां नामकानि वक्तव्यानि॥१३ चतुर्दशे दिवसा रात्रयश्चोक्ताः॥१४ पंचदशे तिथयः॥१
५ षोडशे गोत्राणि नक्षत्राणां॥१६ सप्तदशे नक्षत्राणां भोजनानि वक्तव्यानि यावदं नक्षत्रमवरूपेत्
ज्ञानक्षत्र तत्र स्थितं भवतीति॥१७ अष्टादशे आदित्यानामुपलक्षणमेतत् चंद्रमसां च चारा वक्तव्याः॥१८ एका
नविंशतितमे मासाः॥१९ विंशतितमे संवत्सराः॥२० एकविंशतितमे ज्योतिषो नक्षत्रचक्रस्य द्वाराणि वक्त
व्यानि। यथा अमूनि नक्षत्राणि पूर्वद्वाराणि अमूनि च पश्चिमद्वाराणीत्यादि॥२१ द्वाविंशतितमे नक्षत्राणां विचा

यश्चंद्रसूर्ययोगादिविषयो वर्त्तियो वक्तव्य इति। ते द्वे अप्युक्ते प्राभृतसंख्या प्राभृतसंख्या तेषामर्थाधिकाराश्च॥३॥ संप्र
ति यदुक्तं प्रथमस्य प्राभृतस्य प्रथमप्राभृतप्राभृतं तद्वक्तव्यं तच्च प्रश्नपूर्वं विवक्षुर्यथा तद्विषयो गौतमना
मा प्रथमगणधरो भगवंतं पृष्टवान् तस्मात् यथा च भगवान् तत्प्रथमं वक्तव्यतया प्रदर्शयन्नाह॥४॥ ता कहं ते वड्ढोवड्ढी मुहुत्ता
णामित्यादि अत्र तावच्छब्दः क्रमार्थः क्रमश्चायमस्य चंद्रसूर्यादिविषयं प्रश्नं पृष्टो। परं तदा स्वामी संप्रत्यता वाद
वतां वक्तव्यताभिकं प्रश्नेनेन प्रकारेण भगवन्तं वक्तव्यं यामुहूर्त्तानां दिवसरात्रिविषयाणां वृद्ध्यपवृद्धी आख्याता इति स
गवान् प्रसादमाधाय वादन् अथ प्रावर्तिष्ट वक्तु स्वरूपं कथयेत्युक्ते तमेनं संशयापगमो भवति। अपगतसंशयश्च
परेभ्यो निःशंकमुपदिशामीति अत्राह ननु गोतमो पि चतुर्दशपूर्वधरः सर्वाक्षरसंनिपाती संभिन्न
श्रोता सकलप्रज्ञापनीयभावपरिज्ञाकुशलः सर्वत्र प्रवचनस्य प्रणेता सर्वज्ञदेशीय एव तत्कथं वा संश
यो विभवसादृश्यं वा परानुपपत्त्या उच्यते नत्याणं णाइसएसी वियाणई पेसवउमई॥१॥ तत कथं संशयसंभवस्तद
वाचकिम पृष्टवती वि उच्यते छद्मस्थाश्च भगवान् गौतमस्वामी ततो विशिष्टस्य पितस्यु चापि मतिज्ञानावरणी
याद्युदयवर्त्तमानानां छद्मस्थानां बलवत्कदाचित् नूपालोगो पि जायते। यत उक्तं। नहि नामानाभोगः छ
द्मस्थस्येह कस्यचिन्नेति ज्ञानावरणीयं हि ज्ञानावरणप्रकृतिकर्म। ततो नाभोगसंभवात् उपपद्यते भगवतोपि
संशयः॥ तत्वेन दत्तावधेयतया क्व विपाक्रमते आनंदश्रमणोपासकावधिनिर्णयविषये तत्संशयेति किं आणंदेणं स १०

मणोवासएणं तस्स ठाणस्स आलोइयव्वं जाव पडिक्कमियव्वं। उयाहु मए। ततो णं गोयमादी समणे भगवं म
हावीरे गोयमं एवं वयासी। तुमं चेव णं तस्स ठाणस्स आलोएहि जाव पडिक्कमाहि। आणंदं च समणोवासयं
एयमट्ठं खामेहि। तए णं समणे भगवं गोयमे समणस्स भगवओ महावीरस्स अंतिए एयमट्ठं विणएणं पडिसु
णेइ। पडिसुणित्ता तस्स ठाणस्स आलोएइ जाव पडिक्कमइ आणंदं च समणोवासयं एयमट्ठं खामेइ इति
अथ भगवानपगतसंशयोपि शिष्यसंप्रत्ययार्थं पृष्टवानिति तथा हि तमर्थं शिष्येभ्यः प्ररूपयतो संप्रत्यय
र्थं समक्षमेव पि भगवंतं पृष्टवतीति यदि वा इदमेव सूत्ररचनाकल्प इति न कश्चिद्दोषः। एवं भगव
ता गौतमेन प्रश्ने कृते सति भगवान् श्रीवर्द्धमानस्वामी प्रतिवचनमभिधातुकामः सविशेष
विवक्षितार्थप्रथमतो न कृत्वा सम्यग्वतो गुरुतो संभवंति ता वते निरूपयति। ता छठ्ठेत्यादि। ता
वदिति शिष्योक्तपदानुवादः स च न्यायमार्गप्रदर्शनार्थं तथाहि सर्वेणापि गुरुणा शिष्येण प्रश्ने कृते सति शि
ष्यपृष्टस्य पदस्य अन्यस्य वा शिष्योक्तस्य तथाविधस्य पदस्य अनुवादपुरस्सरं प्रतिवचनमभिधातव्यमेवं
गुरुशिष्याणां बहुमानो भवति। यथा इह गुरूणां सम्मत इति। अन्यत्र तावच्छब्दस्यायमर्थः। आस्तामन्यत् प्र
तिवक्तव्यमिदानीं तावदेतावदेव तावद्वक्तव्य एक पश्यामि एकस्मिन् कृत्स्नमासमेआणेशेसु कृत्स्नं त्रीणि निष्क्रान्तानि च शा
निष्क्रान्तानि च रात्र्यधिकानि निष्क्रान्तस्य च मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागान् इमा राख्याता इति शिष्य

त्यावादनू॥ एतेन च तदावेदयति इह त्रिराशिकेन सम्यग्गृहीतव्याः सूत्रेण पृथग्वृत्तज्ञातेन सता तत्त्वोपदेशोऽपरा
स्मिन्दातव्यो नान्यस्येति॥ अथैकस्मिन्नक्षत्रमासे अष्टौ शतान्येकोनविंशत्यधिकानि मुहूर्त्तानामे
कस्य च मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागा इति तत्र इदं युगे चंद्रचंद्राभिवर्द्धितरूपसंवत्सरपंचकात्मके
सप्तषष्टिर्नक्षत्रमासाः युगे चाहोरात्राणामष्टादश शतानि त्रिंशदधिकानि १८३० ततस्तेषां
सप्तषष्ट्या भागो ह्रियते लब्धाः सप्तविंशतिरहोरात्र ॥ शेषास्तिष्ठंति एकविंशतिः॥ सा मुहूर्त्तानयनार्थं त्रिंश
ता गुण्यते जातानि षट्शतानि त्रिंशदधिकानि ६३० तेषां सप्तषष्ट्या भागे हृते लब्धा नव मुहूर्त्ता एको
षावतिष्ठते सप्तविंशतिः २७ आगतं नक्षत्र मासः सप्तविंशतिरहोरात्राः नव मुहूर्त्ता एकस्य
च मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागाः तत्र सप्तविंशतिरहोरात्राः मुहूर्त्तकरणार्थं त्रिंशता गुण्यं
ते जातान्यष्टौ शतानि दशोत्तराणि ८१० तेषां म ध्ये उपरितना नव मुहूर्त्ताः प्रक्षिप्यंते जातान्यष्टौ शता
न्येकोनविंशत्यधिकानि॥ ८१९ आगतं नक्षत्रमासे मुहूर्त्तपरिमाणमष्टौ शतान्येकोनविंशत्यधिकानि
एकस्य च मुहूर्त्तस्य सप्तविंशतिः सप्तषष्टिभागा इति। इदं च नक्षत्रमासगतमुहूर्त्तपरिमाणमुपलक्षणं तेन
सूर्यादिमासानामप्यहोरात्रसंख्यां परिभाव्य मुहूर्त्तपरिमाणं यथागमं भावनीयं। तथाहि सूर्यमासा युगे ष
ष्टिः संवेति। युगे चाष्टादश शतानि त्रिंशदधिकान्यहोरात्राणां ततस्तेषां षष्ट्या भागे हृते लब्धास्त्रिंशदहोरा ११

त्राः एकस्य चाहोरात्रस्यार्द्धं। ततो वसूर्यमासपरिमाणं त्रिंशन्मुहूर्त्तश्चाहोरात्र इति त्रिंशत् त्रिंशता गुण्यते जा
तानि नव शतानि मुहूर्त्तानां अर्द्धं चाहोरात्रस्य पंचदश मुहूर्त्ता इत्यागते सूर्यमासे मुहूर्त्तपरिमाणं नव शता
नि पंचदशोत्तराणि ९१५ एवं च युगे षष्टिश्चंद्रमासाः ततोऽष्टादश शतानां त्रिंशदधिकानां द्वाषष्ट्या भागो
ह्रियते लब्धा एकोनत्रिंशदहोरात्रा द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य। तत्र द्वात्रिंशद्द्वाषष्टिभागा मुहूर्त्तकरणार्थं
त्रिंशता गुण्यंते जातानि नव शतानि षष्ट्यधिका नि ९६० तेषां द्वाषष्ट्या भागो ह्रियते लब्धाः पंचदश मुहूर्त्ताः शे
षास्तिष्ठंति त्रिंशत्॥ एकोनत्रिंशदहोरात्रा मुहूर्त्तकरणार्थं त्रिंशता गुण्यंते जातान्यष्टौ शतानि सप्त
त्यधिकानि ८७० एतेषु च मध्ये पंचदश मुहू र्त्ताः प्रक्षिप्यंते ततः आगतं चंद्रमासे मुहूर्त्तपरि
माणमष्टौ शतानि पंचाशीत्यधिकानि ८८५ त्रिं शच्च द्वाषष्टिभागा मुहूर्त्तस्य कर्ममासस्त्रिंशदहोरात्रप्र
माणस्तत्र मुहूर्त्तपरिमाणं नव शतानि परिपूर्णा नि तदेवं मासगतं मुहूर्त्तपरिमाणमुक्तमेतदनुसारेण
ऋत्वादिसंवत्सरगतं युगगतं च मुहूर्त्तपरिमाणं स्वयं परिभावनीयं तथा वसत्यच गतं मुहूर्त्तपरिमाणं सप्रति प्र
त्ययनीयं दिवसरात्रिविषयमुहूर्त्तानां हानिवृद्धी तत्र च वाचकाम इदं पृच्छति॥ ता कह ते इयाणमित्यादि
तावद्गाथार्द्धं भावनाऽस्य सर्वत्रापि प्राग्वत् तु सा रणीयो यथा योग्यं स्वयं परिभावनीया। शेषस्य वाक्यस्यायमर्थः ए
तावत्यस्मिन् काले नियमितिवाच्यालकार सूर्यः सर्वाभ्यंतरान्मंडलान्निर्गत्य प्रत्यहमन्यस्मिन्नेकैकमंडलचारे

णयावत् सर्वबाह्यं मंडलमुपसंक्रम्य चारं चरति। परिभ्रमणमुपपद्यते। सर्वबाह्याच्च मंडलाद्यस्मात् प्रतिरात्रिं
दिवसमेकैकमंडलपरिभ्रमणेन यावत् सर्वाभ्यंतरमंडलमुपसंक्रम्य चारं चरति। एषा एतावती। णमिति
वक्तव्यं। अथ कियता रात्रिंदिवाग्रेण रात्रिंदिवपरिमाणेन आख्याता इति वदेत्। अत्र प्रतिवचनं ता तिन्नि छ
त्तादि। अथ रात्रिंदिवाग्रेण त्रीणि रात्रिंदिवशतानि षट्षष्टे षट्षष्ट्यधिके आख्याता इति। स्वशिष्येभ्यो वदेत्स्व
यं। ता एएणमित्यादि। ता इति पूर्ववत्। एतेन अनंतरोदितेन षट्षष्ट्यधिकरात्रिंदिवशतत्रयपरिमाणे
याद्धया कति मंडलानि सूर्यो द्विःकृत्वश्चरति कति वा मंडलान्येकवारमिति शेषः। अत्र प्रतिवचनवाक्यं
ता चुलसीयं मंडलसयमित्यादि सामान्यतश्चतुर शीतं चतुरशीत्यधिकं मंडलशतं चरति। अधिकस्य मंड
लस्य असंक्रम्यमानत्वात्। तत्रापि चतुरशीत शतमध्ये द्व्यशीतं द्व्यशीत्यधिकं मंडलशतं द्विःकृत्वश्चरति
। तद्यथा। सर्वाभ्यंतरान्मंडलाद्विनिष्क्रामन् सर्वबाह्यान्मंडलादभ्यंतरं प्रविशंश्च द्वे च मंडले सर्वाभ्यंतरस
र्वबाह्यरूपे सकृदेकं चारं चरति परिभ्रमति।।ता।।सूर्यः प्रभृति।।ता जइ खलु तस्सेत्यादि ता यदि खलु षट्षष्ट्यधि
का त्रिदिवशतात्मकपरिमाणा यावन्मध्ये द्व्यशीतं मंडलशतं द्विःकृत्वश्चरति। द्वे मंडले एकं चारमिति
। तत एवं सति वदेत् भगवान् प्ररूपयति। तस्य षट्षष्ट्यधिकरात्रिंदिवशतत्रयपरिमाणस्य सूर्यसंवत्सरस्य मध्ये
सकृदेकवारमष्टादशमुहूर्तप्रमाणो दिवसो भवति। सकृद्वा अष्टादशमुहूर्ता रात्रिः। तथा सकृदेकवारं द्वाद। १२

शमुहूर्तो दिवसो भवति सकृद् द्वादशमुहूर्ता रात्रिः। तथाहि प्रथमे षण्मासे अस्ति अष्टादशमुहूर्ता रात्रिर्न त्वष्टाद
शमुहूर्तो दिवसः। तथा अस्ति तस्मिन्नेव प्रथमे षण्मासे द्वादशमुहूर्तो दिवसो न तु द्वादशमुहूर्ता रात्रिः। द्वितीये
षण्मासे अस्ति अष्टादशमुहूर्तो दिवसो न त्वष्टादशमुहूर्ता रात्रिः। तथा अस्ति तस्मिन्नेव द्वितीये षण्मासे द्वादशमु
हूर्ता रात्रिर्न तु द्वादशमुहूर्तो दिवसः। तथा प्रथमे षण्मासे द्वितीये वा षण्मासे नास्त्येतद्यदुत पंचदशमुहूर्तोऽपि
दिवसो भवति। नाप्यस्त्येतद्यदुत पंचदशमु हूर्ता रात्रिः। तत्र एवंविधे वस्तुतत्त्वावगमे को हेतुः किंकारणं
कया युक्त्या एतत् प्रतिपत्तव्यमिति सा वाच्या। इति वदेत्। अत्र भगवान् प्रसादं कृत्वा वदेत्। अत्र प्रति
वचनमाह।।ता।।ता अयण्णमित्यादि। अ यं प्रत्यक्षत उपलभ्यमानाणमिति वाक्यालंकारे जंबू
द्वीपो जंबूद्वीपनामा द्वीपः सर्वसर्वेषां द्वीपस मुद्राणां सर्वाभ्यंतरः सर्वमध्यवर्ती सर्वेषामपि द्वीपस
मुद्राणामितश्चारभ्य यथागमाक्रमं द्वि गुणविष्कंभत्वात् सर्वाभ्यंतरो यावत् परिक्खेवेणं पन्नत्ते इति। अत्र
यावत्करणात् अनादिदमन्यद्दृष्टं तदेव सिद्धं सूत्रमवगंतव्यं। सव्वखुड्डागे वट्टे तेल्लापूयसंठाणसंठिए वाहर
वट्टे रहचक्कवालसंठाणसंठिए वट्टे पुक्खरकण्णियासंठाणसंठिए वट्टे पडिपुन्नचंदसंठाणसंठिए एगं जोयणसयस
हस्समायामविक्खंभेणं तिन्नि जोयणसयसहस्साइं दोन्नि य सत्तावीसे जोयणसए तिन्नि य कोसे अट्ठावीसं
५०५ च धणुसयं तेरस य अंगुलाइं अद्धंगुलं च किंचि विसेसाहियं परिक्खेवेणं पन्नत्ते इति। अत्र समवगाहो। सर्वक्षुल्लकः

सूर्यप्र० वृत्ति
१२३

स्यात्तीयसमुद्देस्या॥ उलरकालसुराया मविष्कंभाभ्यां योजनलक्षप्रमाणं वाद्ध्याचंभाव॥ मगमं पत्रिधपरिमा
णगणितं च जंबूद्वीपसमासटीकातः परिभावनीया इति। ततो यदा णमिति पूर्ववत् सूर्यः सर्वाभ्यंतरं मंडलमुपसंक्रम्य
चारं चरति तदा णमिति प्राग्वत् उत्तमकाष्ठाप्राप्ता उत्कर्षकाष्ठाः प्रकर्षवाची परमप्रकर्षप्राप्तो यतः परमत्याधि
को न भवति। सत्यर्थः। उत्कर्षतः उत्कर्षी उत्कर्षेण वा उत्कर्षकः। उत्कृष्ट इत्यर्थः। अष्टादशमुहूर्तो दिवसो
भवति। तस्मिन्नेव च सर्वाभ्यंतरमंडले सूर्यचारं चरति जघन्या सर्वलघ्वी द्वादशमुहूर्ता रात्रिर्भवति। आह रात्र
; पाश्चात्यस्य सूर्यसंवत्सरस्य पर्यवसानं तत : स सूर्यस्तस्मात्सर्वाभ्यंतरान्मंडलान्निष्क्रामन् नवं सूर्यसंवत्स र्य
रमाददानः प्रथमेऽहोरात्रे प्रथमऽहोरात्रे अभ्यंतरानंतरं सर्वाभ्यंतरान्मंडलादनंतरं द्वितीयं मं-
डलमुपसंक्रम्य चारं चरति। ततो यदा सूर्यो अभ्यंतरानंतरं सर्वाभ्यंतरान्मंडलादनंतरं द्वितीयं मंडल।
मुपसंक्रम्य चारं चरति तदा अष्टादशमुहूर्तो दि वसो द्वाभ्यां मुहूर्तैकषष्टिभागाभ्यामूनो भवति द्वाभ्यां च
मुहूर्तैकषष्टिभागाभ्यामधिका द्वादशमुहूर्ता रात्रिः। कथमेतदवसीयते इति चेदुच्यते। इह एकं मंडलमेके
नाहोरात्रेण द्वाभ्यां सूर्याभ्यां परिसमाप्यते। एकैकश्च सूर्यः प्रत्यहोरात्रं मंडलस्य त्रिंशदधिकाष्टादशशत
संख्यान् भागान् परिकल्प्य एकैकं भागं दिवसक्षेत्रस्य रात्रिक्षेत्रस्य वा यथायोग्यं हापयिता वर्द्धयिता वा
भवति। सर्वाभ्यंतरमंडलगतत्रिंशदधिकाष्टादशशततमो भागो द्वाभ्यां मुहूर्तैकषष्टिभागाभ्यां गम्यते। तथा १३

हि। तानि मंडलगतानि त्रिंशदधिकान्यष्टादशशतानि भागानां द्वाभ्यां सूर्याभ्यामेकेनाहोरात्रेण गम्यंते। अ
होरात्रश्च त्रिंशन्मुहूर्तप्रमाणस्ततः सूर्यद्वयापेक्षया षष्टिमुहूर्ता लभ्यंते। ततस्त्रैराशिककर्मावकाशः। य
दि षष्ट्या मुहूर्तैरष्टादशशतानि त्रिंशदधिकानि मंडलस्य भागानां गम्यंते ततः एकेन मुहूर्तेन किं गम्यते
राशित्रयस्थापना॥ ६०।१८३०।१। अत्रांत्येन राशिना एककलक्षणेन मध्यस्य राशेर्गुणनाज्जातानि तान्येवा
ष्टादशशतानि त्रिंशदधिकानि। तेषामाद्येन राशिना षष्टिलक्षणेन भागो ह्रियते। लब्धाः सार्द्धास्त्रिंश
द्भागाः। एतावन्मुहूर्तेन गम्यते मुहूर्तार्द्धे। कषष्टिभागो क्रियते। ततः आगतमेको भागो द्वाभ्यां मुहू
र्तैकषष्टिभागाभ्यां गम्यते यदि वा यदि वा यदि अशीत्यधिकेनाहोरात्रशतेन षट् मुहूर्ता हा
न्यो वृद्धौ वा प्राप्यंते। तत एकेनाहोरात्रेण किं प्राप्यते राशित्रयस्थापना॥ १८३।६।१। अत्रांत्येन
राशिना एककलक्षणेन मध्यस्य राशेर्गुणने जा ताः षडेव षट्। तेषां त्र्यशीत्यधिकेन शतेन भागहरणं। तत्रोप
रितनराशेः स्तोकत्वाद्भागो न लभ्यते। ततः छेद्यछेदकराश्योः त्रिकेनापवर्तना जातमुपरितनो रा
शिर्द्विकस्तु अधस्तन एकषष्टिरूपः। आगतं द्वावेकषष्टिभागौ मुहूर्तस्य एकस्मिन्नहोरात्रे हापो वृद्धि
र्वा प्राप्यते। यथा तथा इति तस्माद्द्वितीयान्मंडलान्निष्क्रामन् स सूर्यो द्वितीयेऽहोरात्रे सर्वाभ्यंतरं मंडल
मपेक्ष्य तृतीयं मंडलमुपसंक्रम्य चारं चरति। ता जया णमित्यादि तत्र यदा तस्मिन् सर्वाभ्यंतरं मंडलमपे

सूर्यप्र०वृत्ति
१२४

क्रमति द्वितीये मंडले उपसंक्रम्य चारं चरति तदा द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यां हीनो ऽष्टादशमुहूर्त्तप्रमाणो दिव-
सो भवति द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिका द्वादशमुहूर्त्तप्रमाणा रात्रिः एवमुक्तनीत्या खलु निश्चितमे-
तेनानंतरोदितेनोपायेन प्रतिमंडलं दिवसरात्रिविषयमुहूर्त्तैकषष्टिभागद्वयहानिवृद्धिरूपेण निष्का-
मन् मंडलपरिभ्रमणगत्या शनैः शनैर्दक्षिणाभिमुखं गच्छन् सूर्यः तयाणंतराउ इति तस्माद्विवक्षितादनंतरा-
न्मंडलात् तयाणंतरमिति तद्विवक्षितमनंतरं मंडलं संक्रामन् २ एकैकस्मिन् मंडले मुहूर्त्तस्य द्वौ द्वौ
भागावेकषष्टिभागौ दिवसक्षेत्रस्य निर्वेष्टयन् हापयन् रजनिक्षेत्रस्य प्रतिमंडलं द्वौ द्वौ मुहूर्त्तै-
कषष्टिभागौ अभिवर्द्धयन् त्र्यशीत्यधिकशततमे आहोरात्रे प्रथमषण्मासपर्यवसा-
नभूते सर्वबाह्यं मंडलमुपसंक्रम्य चारं चरति। ता इति ततो यदा यस्मिन् काले अत्र वाक्यालंकारे णं
मिति प्राग्वत् सूर्यः सर्वाभ्यंतरान्मंडलान्मंडलपरिभ्रमणगत्या शनैः शनैर्निष्क्रम्य सर्वबाह्यं मंडलमु-
पसंक्रम्य चारं चरति तदा सर्वाभ्यंतरं मंडलं प्रणिधाय मर्यादीकृत्य द्वितीयान्मंडलादारभ्येत्यर्थः एकेन त्र्यशी-
त्यधिकेन रात्रिंदिवशतेन त्रीणि षट्षष्ट्यधिकानि मुहूर्त्तैकषष्टिभागशतानि दिवसक्षेत्रस्य निर्वेष्ट्य हा-
पयित्वा रजनिक्षेत्रस्य तान्येव त्रीणि मुहूर्त्तैकषष्टिभागशतानि षट्षष्ट्यधिकानि अभिवर्ध्य चारं चरति
तदा णमिति पूर्ववत् उत्तमकाष्ठाप्राप्ता परमप्रकर्षप्राप्ता उत्कर्षिका उत्कृष्टा अष्टादशमुहूर्त्ता अष्टादशमु- १४

हूर्त्तप्रमाणा रात्रिर्भवति जघन्यो द्वादशमुहूर्त्तप्रमाणो दिवसः। एषा प्रथमा षण्मासीत्यादि तत्र प्र-
थमं षण्मासं सूत्रे च पुंस्त्वनिर्देश आर्षत्वात् एष त्र्यशीत्यधिकशततमो ऽहोरात्रः प्रथमस्य षण्मासस्य पर्यव-
सानं॥ ८॥ से पविसमाणे इत्यादि स सूर्यः सर्वबाह्यान्मंडलादभ्यंतरं प्रविशन् द्वितीयषण्मासमाददानः
प्रतिपद्यमानो द्वितीयस्य षण्मासस्य प्रथमे अहोरात्रे सर्वबाह्यान्मंडलादर्वागनंतरं द्वितीयं मंडलमु-
पसंक्रम्य चारं चरति। ता इति तत्र यदा सूर्यो बाह्यानु सर्वबाह्यान्मंडलादर्वाक्तनं द्वितीयं मंडलमुपसं-
क्रम्य चारं चरति तदा द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यां हीना अष्टादशमुहूर्त्ता रात्रिर्भवति। द्वाभ्यां
मुहूर्त्तैकषष्टिभागाभ्यामधिको द्वादशमुहूर्त्तप्रमाणो दिवसः॥ स ततो ऽपि द्वितीयान्मं-
डलादभ्यंतरं सूर्यः प्रविशन् द्वितीयस्य षण्मासस्य द्वितीये अहोरात्रे बाहिरतच्चं ति सर्वबाह्यान्मं-
डलादर्वाक्तनं तृतीयं मंडलमुपसंक्रम्य चारं चरति। ता जया णमित्यादि ता इति यदा णमिति पूर्ववत् सूर्यः स-
र्वबाह्यान्मंडलादर्वाक्तनं तृतीयं मंडलमुपसंक्रम्य चारं चरति तदा अष्टादशमुहूर्त्ता रात्रिश्चतुर्भिर्भागैर्हीना
मुहूर्त्तैकषष्टिभागैरिति प्राकृतत्वात् तृतीयार्थे षष्ठी नेपादाभ्यासः एवं द्वयवस्थितपदनिर्देशाद् दृष्टव्या मुहूर्त्तैकषष्टिभा-
गैरधिका द्वादशमुहूर्त्ता दिवसः॥ एवं खलु एएणमित्यादि एवमुक्तनीत्या खलु निश्चितमेतेनानंतरोदितेनोपाये-
न प्रतिमंडलं रात्रिदिवसविषयमुहूर्त्तैकषष्टिभागद्वयहानिवृद्धिरूपेण प्रविशन् मंडलपरिभ्रमणगत्या शने-

सूर्यप्रज्ञप्ति
१२५

ःशाते कृत्वरात्रिंदिवं गच्छत् तयाणंतराओ तस्माद् द्वितीयात् मंडलात् तयाणंतरमिति तात् द्वितीयात् अनंतरं मंड
लं संक्रामन् २ एकैकस्मिन् मंडले मुहूर्त्तस्य द्वौ द्वौ एकषष्टिभागौ रजनिक्षेत्रस्य निर्वेष्टयन् दिवसक्षेत्रस्य
प्रतिमंडलं द्वौ द्वौ मुहूर्त्तस्यैकषष्टिभागौ अभिवर्धयन् अशीत्यधिकशततमे अहोरात्रे द्वितीयषण्मासप
र्यवसाने तत्र सर्वाभ्यंतरं सर्वाभ्यंतरे मंडलमुपसंक्रम्य चारं चरति ॥ ता इति ततो अस्मिन्नु कालेणमिति पूर्ववत्
सूर्यः सर्वबाह्यात् मंडलात् मंडलपरिक्रमणेन गत्वा | शनैः शनैः अभ्यंतरं प्रविश्य सर्वाभ्यंतरं मंडलमुपसंक्रम्य चा
रं चरति तदा सर्वाभ्यंतरं मंडलं प्रणिधाय मर्यादीकृ | त्य तदवधिकृत्य द्वितीयात् मंडलादारभ्येत्यर्थः एकेन त्र्य
शीत्यधिकेन रात्रिंदिवशतेन त्रीणि षट्षष्ट्यानि षट् | षष्ट्यधिकानि मुहूर्त्तस्यैकषष्टिभागशतानि रजनि
क्षेत्रस्य निवेष्ट्य तावन्त्येव दिवसक्षेत्रस्य वर्ध | यित्वा त्रीणि षष्टानि मुहूर्त्तैकषष्टिभागशतानि अभिवर्ध्य
र्ध्य चारं चरति तदा णमिति वाक्यालंकारे उत्तमका | ष्ठाप्राप्तः परमप्रकर्षप्राप्त उत्कर्षक उत्कृष्टो अष्टादशमु
हूर्त्तो दिवसो भवति जघन्या च द्वादशमुहूर्त्ता रात्रिः ॥ एतद् द्वितीयषण्मासं यदि वा यो द्वितीयषण्मासः सूत्रे पुंस्त्व
निर्देशः ॥ अथार्षत्वात् एष षट्षष्ट्यधिकं च शततमो अहोरात्रो द्वितीयस्य षण्मासस्य पर्यवसानमिति ॥ एष णं प्र
मणं आदित्यसंवत्सरः एष षट्षष्ट्यधिकत्रिंशततमो अहोरात्र आदित्यस्य आदित्यसंवत्सरः संवत्सरस्य पर्यवसा
नं संप्रत्युपसंहारमाह ॥ ता इत्यादि खलु तस्यैवमित्यादि यस्मात् एवं इति तस्मात् कारणात् तस्य आदित्यस्य आदित्य २५

स्य आदित्यसंवत्सरस्य मध्ये अवस्थाकृतप्रकारेण सकृत् एकवारं अष्टादशमुहूर्त्तो दिवसो भवति सकृच्चा
ष्टादशमुहूर्त्ता रात्रिः । तथा सकृत् द्वादशमुहूर्त्तो दिवसो भवति सकृत् द्वादशमुहूर्त्ता रात्रिः ॥ तत्र प्रथमे ष
ण्मासे अस्ति अष्टादशमुहूर्त्ता रात्रिः सा च प्रथमषण्मासपर्यवसाने उपलब्धा अहोरात्रे नवरं द्वादशमुहूर्त्तो दिव
सः तथा अस्ति तस्मिन्नेव प्रथमे षण्मासे द्वादशमुहूर्त्तो दिवसः ॥ सोऽपि प्रथमषण्मासपर्यवसाने अहोरात्रे
न तु द्वादशमुहूर्त्ता रात्रिः ॥ द्वितीये षण्मासे अस्ति | त्र अयं अष्टादशमुहूर्त्तो दिवसो भवति स च द्वितीयष
ण्मासपर्यवसाने अहोरात्रे न तु अष्टादशमु | हूर्त्ता रात्रिः सा न आस्ते तथा अयं तत्तस्मिन्नेव द्वितीयष
ण्मासे अस्ति द्वादशमुहूर्त्ता रात्रिः सापि तस्मि | न्नेव द्वितीयषण्मासपर्यवसाने उपलब्धो अहोरात्रे न
पुनरस्ति तत्र अयं द्वादशमुहूर्त्तो दिवसो भव | तीति तथा प्रथमे षण्मासे द्वितीये वा षण्मासे नास्ति
तत्र अयं पंचदशमुहूर्त्तो दिवसो भवति नाप्यस्ति | तत्र अयं पंचदशमुहूर्त्ता रात्रिः ॥ किं सर्वथा नेत्याह न
न्नत्थ इत्यादि रात्रिंदिवानां अपचयात् नान्यत्र न भवति रात्रिंदिवानां अपचयात् अवस्थान पंचदशमुहूर्त्ता रा
त्रिः ॥ पंचदशमुहूर्त्तो दिवसः तत्र अपचय रात्रिंदिवानां कथं भवतीत्याह मुहूर्त्ताणं चायावचायेण मुहूर्त्तानां
पंचदशसंख्यानां चाया अपचायेन चायेनाधिक्येन हि अपचयेन हीनतया नाव न अपचय इयमत्र भावना । परिपू
र्णपंचदशमुहूर्त्तप्रमाणे दिवसरात्री न भवतः हीनाधिक पंचदशमुहूर्त्तप्रमाणे दिवसरात्री भवतः ॥ एवं न

त्तद्वा अश्रुतवा यगृहीत इति वाशब्दः प्रकारांतरस्य वनोऽल्पत्वादुपातगते रत्तसारगते पंचदशमुहूर्त्तो दिव
सः पंचदशमुहूर्त्ता च रात्रिर्भवति अत्र सारगत्वाद्युक्तत्वात्पवसत्वात्पवसाचात्र सारगतिरेवं यदि त्र्यशी
त्यधिकशततमे मंडले षण्मुहूर्त्ता द्विषष्टिभागा नो वा प्राप्यंते तावता ऽर्वाक् तदर्द्धगतो त्रयो मुहूर्त्ताः प्राप्यंते
त्र्यशीत्यधिकशतस्य चार्द्धं सार्द्धैकनवतिः ततः आगतमेकनवतिसंख्येषु मंडलेषु गतेषु एकनवतितमस्य
च मंडलस्यार्द्धे गते पंचदशमुहूर्त्ताः प्राप्यंते ततस्तन्न          तत्कंशत्रिकल्पनया पंचदशमुहूर्त्तो दिवसः पं
चदशमुहूर्त्ता च रात्रिः स्यादिति तन्न भवति गाहा          गसणियाए सिद्धं अव्वं अनंतलोकार्थसंग्राहिकाओ
स्या एवं सूर्यप्रज्ञप्तिः भगवान् स्वामिना याति          युक्तिः कथा तत्र तिबन्ध अन्यथा वा कान्यत्र ग्रंथांत
रेषु प्रसिद्धा गाथा वर्तते सणितया ।। पठनीया ।          साध्यसंप्रतिक्रापितु शुक्लमह रूपत इति च वक्तिता
संता घ्रांत तातानकथयितुष्या रथ्या तुवासक्तांतयो          वायथा संप्रदायादवगंतेति ततस्तथा शिष्यस्य कथ
नीयाश्चेति ।। ८ ।। इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां प्रथमप्राभृतस्य प्रथमं प्राभृतप्राभृतं स
माप्तं ।। ८ ।। ॐ ।। ८ ।। तदेवमुक्तं प्रथमस्य प्राभृतस्य प्रथमं प्राभृतप्राभृतं । संप्रति द्वितीयमर्द्धमंडलसंस्थिति
प्रतिपादकं विवक्षुरिदं प्रश्नसूत्रमाह ।। ८ ।। ता कहं ते इत्यादि । ता इति क्रमार्थः पूर्ववद्भावनीयः कथं केन प्र
कारेण भगवन् त्वया ते अर्द्धमंडलसंस्थितिरर्द्धमंडलव्यवस्था आख्याता इति वदेत् पृष्टे तत्र भगवान् मतिप्राय ।। २६

एकैकः सूर्यः केन प्रकारेण एकैकस्य मंडलस्यार्द्धमेव स्वभ्रमणेन पूरयतीति ततः संशयः कथमेकैक
स्य सूर्यस्य प्रत्यहोरात्रमेकैकार्द्धमंडलपरिभ्रमणव्यवस्थेति पृष्टे अत्र भगवानुत्तरमाह ।। ८ ।। ता खलु इत्या
दि । ता इति तत्रार्द्धमंडलव्यवस्थाविचारे खलु निश्चितमिमे द्वे अर्द्धमंडलसंस्थिती मया प्रज्ञप्ते तद्यथा । एका दक्षि
णा चैव दक्षिणदिग्भाविसूर्यविषया अर्द्धमंडलसंस्थितिरर्द्धमंडलव्यवस्था द्वितीया चोत्तरा चैव उत्तरदिग्भावि
सूर्यविषया अर्द्धमंडलसंस्थिति । एवमुक्ते सति भूयः          पृच्छति ।। ८ ।। ता कहं ते इत्यादि । इहापि अर्द्धमंडलसं
स्थिती ज्ञातार्थे तात्र दंतावद्वा मिकथं त्वया स          वत् दक्षिणा दक्षिणदिग्भाविसूर्यविषयार्द्धमंडलसं
स्थितिराख्याता इति वदेत् भगवानाह ।। ८ ।। ता          अयमित्यादि । इदं जंबूद्वीपवाक्यं जाव वक्ष्ये
परिक्षेपेण परिसावनीया ता जया णमित्यादि । तत्र य          दाणमिति वाक्यालंकारे यदा सूर्यः सर्वाभ्यंतरं सर्वाभ्यंत
रमंडलगतार्द्धमंडलसंस्थितिमुपसंक्रम्य          चारं चरति तदाणमिति पूर्ववत् उत्तमकाष्ठाप्राप्तः परम
प्रकर्षप्राप्तः उत्कर्षकोऽष्टादशमुहूर्त्तो दिवसो भवति जघन्या च द्वादशमुहूर्त्ता रात्रिः इह सर्वाभ्यंतरे
मंडले प्रविष्टः स प्रथमक्षणादूर्द्ध्वं यान् सर्वाभ्यंतरानंतरद्वितीयमंडलाभिमुखं चलति प्राचुर्यं वनाम मंडलगत्या
परिभ्रमति येन अहोरात्रपर्यंते सर्वाभ्यंतरमंडलगतार्द्धगतो दक्षिणादिकषष्टिभागान् पारवाह्यो न अ
तिक्रम्य सर्वाभ्यंतरानंतरद्वितीयान्तरार्द्धमंडलसीमायां वर्तते तथा वाह ।। से निक्खममाणे इत्यादि । स सूर्यः स

सूर्यप्र०वृ० र्वाभ्यंतरगतान्मंडलात् प्रथमक्षणादूर्ध्वं शनैः शनैर्निःक्रामन् आद्ये अहोरात्रे अतिक्रांते सति नवमभिनवं संव
॥१७ त्सरमाददानो नवस्य प्रथमे अहोरात्रे दक्षिणस्माद्दक्षिणदिग्भागवर्तिनो सर्वाभ्यंतरमंडलगताच्चतुश्चत्वा
रिंशाद्योजनैकषष्टिभागस्याधिकाद्योजनद्वयप्रमाणापांतरालरूपादिति निर्गत्य तस्मादपसाय इति। तस्य
सर्वाभ्यंतरानंतरस्योत्तरार्द्धमंडलस्यादिप्रदेशमाश्रित्याभ्यंतरानंतरं सर्वाभ्यंतरमंडलानंतरमुत्तरार्द्धमंड
लसंस्थितिमुपसंक्रम्य चारं चरति। सर्वादिप्रदेशादूर्ध्वं | शनैः शनैरपरमंडलाभिमुखं स्वगतिप्राकर्षवत्त्वाच्चर म
तीति तस्याहोरात्रस्य पर्यंते तदपि मंडलमत्य | द्वे योजने परित्यज्य दक्षिणदिशावितद्वितीयस्य मंड
लस्य सीमायां भवति। ताजयाणमित्यादि | ॥ततो यदा सूर्यः सर्वाभ्यंतरानंतरं भिक्षिप्य आमुत्तरा
मर्द्धमंडलसंस्थितिमुपसंक्रम्य चारं चरति तदा दि | वासो अष्टादशमुहूर्त्तो द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामू
नो भवति द्वाभ्यां च द्वादशमुहूर्त्ता रात्रिः द्वाभ्यां मु | हूर्त्तैकषष्टिभागाभ्यामभ्यधिका। ततस्तस्मिन्नपि द्विती
यस्मादुत्तरार्द्धमंडलसंस्थितेरुक्तप्रकारेण सूर्यो निःक्रामात् अभिनवस्य सूर्यसंवत्सरस्य द्वितीये अहोरात्रे
उत्तरस्मादुत्तरदिग्भागवर्तिनोऽनंतरद्वितीयात् तृतीयार्द्धमंडलगताच्चतुश्चत्वारिंशाद्योजनैकषष्टिभागस्याधिकायोज
नद्वयप्रमाणापांतरालरूपाद्भागाद्भिनिःसृत्य तस्मादपसाय इति तस्य दक्षिणदिग्भागवर्तिनस्तृतीयस्यार्द्धमंड
लस्यादिप्रदेशमाश्रित्य अभिवर्त्तते ति सर्वाभ्यंतरमंडलमपेक्ष्य तृतीयं दक्षिणमर्द्धमंडलसंस्थितिमुपसंक्र १७

म्य चारं चरति अत्रापि चारं चरति आदिप्रदेशादूर्ध्वं शनैः शनैरपरमंडलाभिमुखं। तेन तस्याहोरात्रस्य प
र्यंते तन्मंडलगतान् चतुश्चत्वारिंशाद्योजनैकषष्टिभागान् परित्यज्य योजनद्वयमपहाय चतुर्थस्योत्तरार्द्धमंडल
स्य सीमायामवतिष्ठते। ताजयाणमित्यादि। ततो यदा णमिति पूर्ववत् सर्वाभ्यंतरान्मंडलात् तृतीयाद्दक्षिण
मर्द्धमंडलसंस्थितिमुपसंक्रम्य चारं चरति तदा अष्टादशमुहूर्त्तो दिवसो भवति चतुर्भिर्मुहूर्त्तैकषष्टिभा
गैरूनो द्वादशमुहूर्त्ता रात्रिः चतुर्भिर्मुहूर्त्तैकष | ष्टिभागैरभ्यधिका। एवं खलु इत्यादि एवं खलुक्तीत्या
खलु निश्चितमेतेनोपायेन प्रत्यहोरात्रम्। | ष्टाचत्वारिंशाद्योजनैकषष्टिभागस्याधिकायो
जनद्वयविकंपनरूपेण निःक्रामन् सूर्यस्तद | नंतरात् तदर्द्धमंडलात् तदनंतरं तस्मिन् प्रदेशे वा द
क्षिणपूर्वभागे उत्तरपश्चिमभागे वा तावत् अर्द्धमं | डलसंस्थितं संक्रामन् त्र्यशीत्यधिकशततमादहो
रात्रपर्यंते गत दक्षिणस्माद्दक्षिणदिग्भागवर्तिनो व | रात् त्र्यशीत्यधिकशततममंडलगताच्चतुश्चत्वारिंशाद्यो
जनैकषष्टिभागस्याधिकतदनंतरयोजनद्वयप्रमाणादपांतरालरूपाद्भागात्तस्मादपसृत्य इति सर्वबाह्य
मंडलगतस्योत्तरस्यार्द्धमंडलस्यादिप्रदेशमाश्रित्य सर्वबाह्यमुत्तरार्द्धमंडलसंस्थितिमुपसंक्रम्य चारं चरति
सर्वादिप्रदेशादूर्ध्वं शनैः सर्वबाह्यानंतरस्यांतरदक्षिणार्द्धमंडलाभिमुखं तत्प्राकर्षवत्त्वाच्चरति। येन
तस्याहोरात्रस्य पर्यंते सर्वबाह्यानंतराभ्यंतरदक्षिणार्द्धमंडलसीमायां भवति॥७॥ ताताजयाणमित्या

सूर्यप्र०वृत्ति
२८

दि। ततो यदा णमिति पूर्ववत्सूर्यः सर्वबाह्यामुत्तरामर्द्धमंडलसंस्थितिमुपसंक्रम्य चारं चरति। तदा उत्तमकाष्ठाप्रा-
प्ता उत्कर्षिका उत्कृष्टा अष्टादशमुहूर्त्ता रात्रिर्भवति जघन्यश्च द्वादशमुहूर्त्तो दिवसः। एस णमित्यादि। निगमनवाक्यं
प्राग्वत्। ता॥ सेपविसमाणे इत्यादि। स सूर्यः सर्वबाह्यादुत्तरार्द्धमंडलादिप्रदेशादर्द्धं शाते। ता। ने। सर्वबाह्यानंत-
रं द्वितीयं दक्षिणार्द्धमंडलाभिमुखं संक्रामन् तस्मिन्नवाहोरात्रे इतिक्रांते तस्मिन्नभ्यंतरं प्रविशन् द्वितीये षण्मा-
समादवातो द्वितीयस्य षण्मासस्य प्रथमे अहोरात्रे उत्तरस्मादुत्तरदिग्भागात् सर्वबाह्यमंडलगताद-
नंतरान् सर्वबाह्यानंतरार्द्धमंडलगताष्टावत्राशि द्योजनैकषष्टिभागान् अधिकत दनंतरा वा कुल-
विायाजनैकयश्च माणादपातरालरूपाद्या। गान्। तस्मात् इपाय सापइति तस्य दक्षिणादिशा-
विना सर्वबाह्यानंतरस्य क्षणस्यार्द्धमंडलस्यादिप्र- देशमाश्रित्य बाहिरानंतरा तिसर्वबाह्यस्य मंडल-
स्यानंतरामस्यतरां दक्षिणामर्द्धमंडलसंस्थितिमु- पसंक्रम्य चारं चरति। अथ पिचार आदिप्रदेशाद्वर्त्ते-
घाकथं च ना प्यस्यंतरा सि खेत्रवर्त्तिता। यथा हो राश्रापर्यं तिसर्वबाह्यान्मंडलादभ्यंतरस्य द्वितीयार्द्धमंडलस्या-
र्द्धमाद्यां सवितिता ज्ञ यावणमित्यादि। ततो यदा सूर्यः बाह्यानंतरां सर्वबाह्यादनंतरां दक्षिणार्द्धमंडलसं-
स्थितिमुपसंक्रम्य चारं चरति। तदा अष्टादशमुहूर्त्ता रात्रिर्भवति द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूना भवति। दिव-
सः द्वादशमुहूर्त्तप्रमाणो दिवसो द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिकः। सेपविसमाणे इत्यादि। ततस्मिन्नहो॥ २८

रात्रे अतिक्रांते स ततः सूर्यो अभ्यंतरं प्रविशन् द्वितीयषण्मासस्य द्वितीये अहोरात्रे दक्षिणस्माद्भागाद्दक्षिण-
दिशा विभागादुत्तरादक्षिणदिशा विसर्वबाह्यानंतरद्वितीयमंडलगताष्टावत्राशि द्योजनैकषष्टिभागाभ्य-
धिकतदनंतरावगाहिता विद्योजनैकस्य प्रमाणादपांतरालरूपाद्भागाद्द्वितीयात् तस्मादपपसाणइति तस्य
सर्वबाह्यादभ्यंतरस्य तृतीयस्योत्तरार्द्धमंडलस्यादिप्रदेशादादिप्रदेशमाश्रित्य बाह्यतृतीयां सर्वबाह्या-
या उत्तरार्द्धमंडलसंस्थितेस्तृतीयामुत्तरामर्द्धमंडलसं- स्थितिमुपसंक्रम्य चारं चरति। अत्रापि चार आदिप्रदे-
शादारभ्य प्राप्तः प्रातेऽस्यस्यंतरार्द्धमंडलाभिमुख। मप्राकथं च नापि प्रवर्त्तमानात्वादत्र आयुक्तं तदा रा-
त्रपर्यंत सर्वबाह्यादर्द्धमंडलात् तृतीयामवग्रि- तीमर्द्धमंडलसंस्थितिमुपसंक्रम्य चारं चरति। तदा
अष्टादशमुहूर्त्ता रात्रिर्भवति चतुर्भिर्मुहूर्त्तैकषष्टिभागै- रूना भवति। द्वादशमुहूर्त्तश्च दिवसश्चतुर्भिर्मुहूर्त्तै-
कषष्टिभागैरभ्यधिकः। एवमित्यादि। एवमुक्तप्रका- रेण खलु निश्चितमेतेनोपायेन प्रत्यहोरात्रमभ्यंतरप्र-
वेशवशादेकैकस्मिन्नहोरात्रे नेकषष्टिभागाभ्यधिकयोजनद्वयविकंपनरूपेण प्रविशन् इतरस्यंतरं प्रविशन् सूर्यस्तद्-
नंतरादर्द्धमंडलात्तदनंतरं तस्मिन् उत्तरादिलोकदक्षिणपूर्वलोकमंतरा परस्यामवाधां तामर्द्धमंडलसंस्थितिं सं-
क्रामन् द्वितीयस्य षण्मासस्य त्र्यशीत्यधिकशततमे अहोरात्रे पर्यवसिते अंतरस्मादुत्तरादिग्भागादवगाह्य
सर्वबाह्यं मंडलमपहाय त्र्यशीत्यधिकशततमं मंडलं जगताष्टाचत्वारिंशद्योजनैकषष्टिभागान् अधि-

कतदनंतराभ्यंतरयोजनद्वयप्रमाणादपांतरालरूपाद्भागात् तस्मादपसार्येति सर्वाभ्यंतरमंडलं
तस्य दक्षिणस्यार्द्धमंडलस्यादिप्रदेशमाश्रित्य सर्वाभ्यंतरानंतरं दक्षिणमर्द्धमंडलसंस्थितिमुपसंक्रम्य चारं चरति
सर्वाभिप्रदेशाद् द्वितीयेऽहोरात्रे सर्वाभ्यंतरानंतरबाह्योत्तरार्द्धमंडलाभिमुखं तथा कर्णकलया चारं प्रतिपद्यते यथा
न तस्याहोरात्रस्य पर्यंते सर्वाभ्यंतरानंतरस्योत्तरस्यार्द्धमंडलस्य सीमायां भवति । ताजयाणमित्यादि । तत्र
यदा सूर्यः सर्वाभ्यंतरं दक्षिणमर्द्धमंडलसंस्थितिमुपसंक्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्त उत्कर्षक
उत्कृष्टोऽष्टादशमुहूर्तप्रमाणो दिवसो भव ति । सर्वजघन्या च द्वादशमुहूर्ता रात्रिः ॥ एसणमित्या
दि । निगमनवाक्यं प्राग्वत् । तदेवमुक्ता दक्षि णार्द्धमंडलसंस्थितिः । संप्रत्युत्तरस्यार्द्धमंडलसं
स्थितिं जिज्ञासुः प्रश्नयति । ता कहं ते इत्यादि ॥ एतच्च प्राग्वद्व्याख्येयं । ताजयाणमित्यादि । ततो यदा
सूर्यः सर्वाभ्यंतरामुत्तरामर्द्धमंडलसंस्थितिमुपसं॥ क्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्त उत्कर्षक उत्कृष्टोऽष्टाद
शमुहूर्तो दिवसो भवति । जघन्या च द्वादशमुहूर्ता रात्रिः ॥ इहोदाहृतं दक्षिणार्द्धे एव । यथा दक्षिणमर्द्धमं
लव्यवस्थितिः प्रागभिहिता तथैवैतेनैव प्रकारेणोत्तरार्द्धमंडलव्यवस्थितिरवसेया ॥ नवरं तु
तरविउअभितराणंतरं दाहिणं उवसंकमइ दाहिणाउ अभितराणंतरं उत्तरं उवसंकमइ एएणं उवाएणं जा
व सव्वबाहिरं दाहिणं उवसंकमइ सव्वबाहिराउ दाहिणाउ बाहिराणंतरं उवसंकमइ उत्तराउ बाहिरतं 

---

दाहिणं तवाउ दाहिणं तचाउ दाहिणाउ उवसंकममाणे संकममाणे जाव सव्वब्भंतरं उत्तरं उवसंकमइ इति नवर
मयदा रूपणमंडलव्यवस्थितरस्या उत्तरार्द्धमंडलव्यवस्थाया विशेषः तत्र सर्वाभ्यंतरे उत्तरस्मिन्नर्द्धमंड
ले स्थितः सन् तस्मिन्नहोरात्रेऽतिक्रांते नवं संवत्सरमाददानः प्रथमस्य षण्मासस्य प्रथमाहोरात्रेऽभ्यंतरा
नंतरं सर्वाभ्यंतरस्य मंडलस्यानंतरं दक्षिणमर्द्धमंडलसंस्थितिमुपसंक्रामति तस्मिन्नप्यहोरात्रेऽतिक्रांते
प्रथमस्य षण्मासस्य द्वितीयेऽहोरात्रेऽभ्यंतरतृ॥ तीयां सर्वाभ्यंतरस्य मंडलस्य तृतीयामुत्तरामर्द्धमंडल
संस्थितिमुपसंक्रामति । एवं खल्वनेनोपायेन तथा गच्छन् तावद्यावत् प्रथमस्य षण्मासस्य अंत्ये
त्र्यधिकशततमे अहोरात्रे पर्यवसानभूते स र्वबाह्यां दक्षिणमर्द्धमंडलसंस्थितिमुपसंक्रा
मति । एतच्च प्रथमषण्मासस्य पर्यवसानं ततो द्वि तीयस्य षण्मासस्य प्रथमेऽहोरात्रे बाह्यानंतरां
सर्वबाह्यस्य मंडलस्यार्वाक्तनीमुत्तरामर्द्धमंडल संस्थितिमुपसंक्रामति । तत्रस्मिन्नहोरात्रेऽतिक्रांते द्वि
तीयस्य षण्मासस्य द्वितीयेऽहोरात्रे उत्तरस्यार्द्धमंडलसंस्थितेर्विनिर्गत्य बाह्यतृतीयां सर्वबाह्यस्य
मंडलस्यार्वाक्तनीं तृतीयां दक्षिणमर्द्धमंडलसंस्थितिमुपसंक्रामति तस्या अपि तृतीयस्या दक्षिणस्या अर्द्धमंडलसं
स्थितेः एकैकमहोरात्रं प्रत्येकामर्द्धमंडलसंस्थितिं संक्रामन् संक्रामन् तावद्वेदितव्यो यावद्द्वितीयषण्मास
पर्यवसानभूतेऽहोरात्रे सर्वाभ्यंतरामुत्तरामर्द्धमंडलसंस्थितिमुपसंक्रामति । तदेवं दक्षिणस्या अर्द्धमंडल

सूर्यप्र० वृत्ति
१२०

संस्थिते रुत्तरस्यामर्द्धमंडलसंस्थितौ नानात्वमुपदर्शितमेतदनुसारेण च स्वयमेव सूत्रालापको यथावस्थितः प-
रिभावनीयः सा चैवं ॥ से निक्खममाणे सूरिए नवं संवच्छरं अयमीणे पढमंसि अहोरत्तंसि दाहिणाए अंतराए भागाए
तस्साइपएसाए अब्भिंतराणंतरं दाहिणं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति जया णं सूरिए अब्भिंतराणं-
तरं दाहिणं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति तया णं अट्ठारसमुहुत्ते दिवसे भवति दोहिं एगट्ठि-
भागमुहुत्तेहिं ऊणे दुवालसमुहुत्ता राई भवति दोहिं एगट्ठिभागमुहुत्तेहिं अहिया से निक्खममाणे सू-
रिए दोच्चंसि अहोरत्तंसि दाहिणाए पच्चंतराए भागाए तस्सादिपएसाए अब्भिंतरं तच्चं उत्तरं अद्धमंडलसंठि-
तिं उवसंकमित्ता चारं चरति तया णं अट्ठारसमुहु- त्ते दिवसे भवति चउहिं एगट्ठिभागमुहुत्तेहिं ऊणे
दुवालसमुहुत्ता राई भवति चउहिं एगट्ठिभागमु- हुत्तेहिं अहिया एवं खलु एएणं निक्खममाणे सूरि-
ए तयाणंतराओ तयाणंतरं तंसि तंसि देसंसि तं तं अद्ध- मंडलसंठितिं संकममाणे उत्तराए अंतराए भागाए तस्सा-
इपएसाए सव्वबाहिरं दाहिणं अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति ता जया णं सूरिए सव्वबाहिरं दाहिणं
अद्धमंडलसंठितिं उवसंकमित्ता चारं चरति तया णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राई भवति
जहन्नए दुवालसमुहुत्ते दिवसे भवइ एस णं पढमे छम्मासे एस णं पढमस्स छम्मासस्स पज्जवसाणे से प-
विसमाणे सूरिए दोच्चं छम्मासं अयमीणे पढमंसि अहोरत्तंसि दाहिणाए अंतराए भागाए तस्साइपएसाए बा- २०

हिराणंतरं उत्तरं अद्धमंडलसंठिइं उवसंकमित्ता चारं चरति ता जया णं सूरिए बाहिराणंतरं उत्तरं अद्धमंडलसंठिइं उ-
वसंकमित्ता चारं चरति तया णं अट्ठारसमुहुत्ता राई भवइ दोहिं एगट्ठिभागमुहुत्तेहिं ऊणा दुवालसमुहुत्ते दिवसे
भवइ दोहिं एगट्ठिभागमुहुत्तेहिं अहिए एवं खलु एएणं उवाएणं पविसमाणे सूरिए तयाणंतराओ तयाणंतरं
तंसि तंसि देसंसि तं तं अद्धमंडलसंठिइं संकममाणे दाहिणाए अंतराए भागाए तस्सादिपएसाए सव्वब्भंतरं उत्तरं अद्ध-
मंडलसंठिइं उवसंकमित्ता चारं चरइ ता जया णं सू- रिए सव्वब्भंतरं उत्तरं अद्धमंडलसंठिइं उवसंकमित्ता
चारं चरइ तया णं उत्तमकट्ठपत्ते उक्कोसए अट्ठार- समुहुत्ते दिवसे भवति जहन्निया दुवालसमुहु-
त्ता राई भवति एस णं दोच्चे छम्मासे इत्यादि प्राग्वत् ॥ इति श्रीमलयगिरिविरचितायां सूर्य-
प्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य द्वितीयं प्रा- भृतप्राभृतं समाप्तं ॥१॥२॥ छ ॥ ८ ॥ तदेवमुक्तं द्वि-
तीयं प्राभृतप्राभृतं संप्रति तृतीयमभिधातव्यं तत्र चायमर्थाधिकारः को वा चीर्णं प्रतिचरति ततस्तद्विषयं प्रश्नसूत्र-
माह ॥ ता के ते इत्यादि ता इति पूर्ववत् कस्ते भगवन् सूर्यः स्वयं परेण वा सूर्येण चीर्णं क्षेत्रं
प्रतिचरति प्रतिचरन्नाख्यात इति वदेत् एवं भगवता गौतमेनोक्ते भगवान् वर्द्धमानस्वामी आह ॥
॥ ता इमे इत्यादि तत्र अस्मिन् जंबूद्वीपे परस्परं वीसीकृत्य प्रतिचरणचिंतायां खलु ॥ एतं यथावक्षु-
तं वस्तुतत्त्वमधिकृत्य मो ठो सूर्यौ प्रज्ञप्तौ तद्यथा भारतश्चैव सूर्यः ऐरावतश्चैव सूर्यः ता एए सि

त्यादि। तत्र यातोणमितिवाक्यालंकारे ठो सूर्यौ प्रत्येकं त्रिंशता त्रिंशता मुहूर्तैरेकैकमर्धमंडलं चरतः। एष प्र
श्च मुहूर्तैः प्रत्युत्पत्यक्रमेणैकैकं परिपूर्णं मंडलं संघातयतः पूरयत॥ ता निष्क्रममाणा इत्यादि। ता इति तत्र
सूर्यसांवत्सरस्य आद्य इमौ द्वावपि सूर्यौ सर्वाभ्यंतरान्मंडलान्निःक्रामंतौ नाऽन्यान्यस्य परस्पराचीर्ण
संक्रांतं प्रतिचरतः॥ निःक्रामंतौ पुनरणाचीर्णं संक्रांतं प्रतिचरतः नान्योन्यपरस्पराचीर्णमिति भावः। इदं तु स्थापनाव
शादवसेयं। सा च स्थापना इयं। सर्वबाह्यान्मंडलाद भ्यंतरं प्रविशंतौ भाव खलु सूर्यावन्योन्यस्य प
रस्पराचीर्णं प्रतिचरतः। तथा शतमेकं चतु श्चाशीतं किंतु कंलवति। ये च चतुर्विंशत्यधिकश
त संरव्येला गे मंडलस्यैतावतांचतु श्चाशीत्यधिकं शतमुलयसूर्यसमुद्देशो चेतायां
परस्पराचीर्णप्रतिचीर्णं प्रतिमंडलमवाप्यतः तिपतदवगमार्थं प्रश्नसूत्रमाह॥ ता तत्र कोहं त्वश
ति। तत्र एवं विधस्यावस्तुतत्त्वव्यवस्थायाः अवगमाकारे उःका उपप्रतिरिति गौतमोऽन्गवानुवादगः अवसगवाना
ह॥ ता ताअयसमित्यादि। इदं जंबूद्वीपस्वरूपप्रतिपादकं वाक्यं पूर्ववत्स्वयं परिपूर्णं परिभावनीयं। तत्रा
णमित्यादि। तत्र जं बूद्वीपणमिति प्राग्वत् अज्ञ सारामह स्वबसूरिप्रति सर्वतः सस्य मंडलस्य दक्षिणाे स्मिन
र्धमंडले यस्माश्चतुर्विंशमारलातसलरता चक्रवालप्रकाशे का शरत इत्यक्षयतो यन्मितस्तास्येव सर्वबाह्यस्य
मंडलस्यान्तरस्मिन्नर्धमंडले चारं चरति। तस्मिन् एवं तत् चक्रवालप्रकाशे का व्यादेशवत्तसन्नोऽपत्यतद्रूतवपलस्य 

मानो जंबूद्वीपस्य सर्वबाह्यस्तत सूर्यो यस्मिन्मंडले परिभ्रमति तन्मंडलं चतुर्विंशत्यधिकेन शतेन छित्त्वा विलक्ष्य
चतुर्विंशत्यधिकशतसंख्याकान्भागान् तस्य तस्य मंडलस्य परिकल्प्येत्यर्थः। सूर्य च प्राचीनापाचीनायतया उदग्
दक्षिणायतया च जीवया प्रत्यंचया चतुर्विभागैरिव कृत्वा इत्यर्थः। तन्मंडलं चतुर्भिर्भागैर्विलिज्य दक्षिणपौरस्त्यदा
२० क्षिणपूर्वविभागे यो जातः इत्यर्थः। चतुर्भागमंडले सिद्धि। प्राकृतत्वात् दक्षिणापूर्वमंडलचतुर्भागे तस्य तस्य मं
डलस्य चतुर्भागस्य सूर्यसंवत्सरस्य द्वितीयषण्मा समाप्ते हि नवतिः सूर्यो मुतानि द्वानवति संख्यानि मं
डलानि सूर्य स्वयं गतानि। चीर्णानि। किंतु कं लव ति। पूर्वं सर्वाभ्यंतरान्मंडलान्निःक्रामता स्वयं चीर्णा
नि प्रतिचरतीति गम्यते। एतादवह्या वष्टाजारं सूरि अप्पणा चिण्णं पडियरइ इति यानि सूर्य
आत्मना स्वयं पूर्वं सर्वाभ्यंतरान्मंडलान्निःक्रमणे कालइति शेषः। चीर्णानि प्रतिचरति ता नि च द्वि
नवतिसंख्यानि मंडलानि चतुर्भागरूपाणि चीर्णानि प्र तिचरति न परिपूर्णं चतुर्भागमात्राणि। किंतु सूर्य
मंडलगत चतुर्विंशत्यधिकशतसत्काष्टादशाष्टादशभाग प्रमितानि ते चाष्टादशाष्टादश भागान् सार्वत्रा
मंडलेषु प्रतिनियतान् एव दा तु। किंतु का पि मंडल कुत्रापि कवलं दक्षिणपौरस्त्यरूप चतुर्भाग मध्यत
तो दक्षिणपूर्वे चतुर्भागमंडले सीत्फ का पव तु तरत पि मंडल चतुर्भागे अष्टादशाष्टादशभाग प्रमि
तं चेत्याव नीयं। सपत्वसा रत सूर्य स्वेषामव द्वितीयानां षण्मासानां मध्यवर्त्तनापश्चिमे चतुर्भागे मंडल चतुर्भा। *मंडले॥

एगाएकनवतिसंख्यानि मंडलानि सर्वमंडलगतचतुर्विंशत्यधिकशतसत्काशादशाशादशभागप्रमितानि सर्वा
ध्यगतानि सर्वं सूर्येण पूर्वसर्वाभ्यंतरान् मंडलानि क्रमेण कालवीर्याणि प्रतिचरतीति गम्यते। एतदेव व्याचष्टे
जाइं सूरिए अप्पणा चेव चिण्णाइं पडिचरति। एतत्सर्वं व्याख्येयं। इह सर्वबाह्यान्मंडलादारभ्य सर्वाणि मंडलानि
अशीत्यधिकशतसंख्यानि। तानि च द्वयोरपि सूर्ययोः द्वितीयषण्मासमध्ये आत्मकं परिभ्रमतः। सर्वत्रापि
च दिग्विभागेषु प्रत्येकमेकं मंडलमेकेन सूर्येण परि भ्रम्यते। द्वितीयमपरेण। एवं यावत्सर्वांतिमं मंडलं
तत्र दक्षिणपूर्वदिग्भागे द्वितीयषण्मासमध्ये भारतः सूर्यो द्विनवतिमंडलानि परिभ्रमति। एक
नवतिमंडलानि ऐरावतः। उत्तरपश्चिमदिग्वि भागे द्विनवतिमंडलान्यैरावतः परिभ्रमति। ए
कनवतिमंडलानि भारतः। एतच्च पट्टिकादौ मंडल स्थापनां कृत्वा परिभावनीयं। तत्र यत्का दक्षिणपूर्वे
द्विनवतिसंख्यानि मंडलानि उत्तरपश्चिमायां चैकनव तिसंख्यानि भारतः स्वयं चीर्णानि प्रतिचरतीति तदे
वं भारतसूर्यस्य स्वयं चीर्णप्रतिचरणपरिमाणमुक्तमिदानीं तस्यैव भारतसूर्यस्य परचीर्णप्रतिचरणप
रिमाणमाह॥ ३॥ तत्थ णं अयं भारहे इत्यादि। तत्र जंबूद्वीपे अयं प्रत्यक्षत उपलभ्यमानो जंबूद्वीपस्य सं
बंधी भारतः सूर्यो यस्मिन् यस्मिन् मंडले परिभ्रमति तत्र तन्मंडलं चतुर्विंशत्यधिकेन भागशतेन छित्वा
च प्राचीनापाचीनायतया उदग्दक्षिणायतया च जीवया तन्मंडलं चतुर्भिर्विभज्य उत्तरपूर्वस्मि २२

शतेन छित्वा इत्यर्थः। चतुर्भागमंडले तस्य तस्य मंडलस्य चतुर्भागे तत्रास्मिन् द्वितीयानां षण्मासानां मध्ये
ऐरावतस्य सूर्यस्य द्विनवतिसूर्यमतानि द्विनवतिसंख्यान्यैरावतेन सूर्येण पूर्वाणि क्रमेण कालेनातिक्र
तानि प्रतिचरति। एतदेव स्पष्टीकरोति। जाइं सूरिए परस्स चिण्णाइं पडिचरइत्यानि सूत्रे भारतः परस्स चिन्नाइं
इत्यत्र षष्ठी तृतीयार्थे परेण ऐरावतेन सूर्येण क्रमेण कालेन चीर्णानि प्रतिचरति। दक्षिणपश्चिमे च मं
डलचतुर्भागे एकनवतिमेकनवतिसंख्यानि ऐरा वतस्य सूर्यस्य तत्प्राप्तिमं बध्नाति। ततोयमर्थः ऐरा
वतस्य सूर्यस्य संबंधीनि सूर्यमतानि किमुक्तं भव ति। ऐरावतेन सूर्येण पूर्वाणि क्रमेण कालेनाती
कृतानि प्रतिचरति। एतदेवाह। जाइं सूरिए प रस्स चिन्नाइं पडिचरइ। एतत्सर्वं स्पष्टं व्याख्ये
यं। अत्राप्येकस्मिन् चतुर्भागे द्विनवतिरेकस्मि न् भागे एकनवतिरित्यत्र भावना प्रागिव भावनीया।
यथा तदेवं भारतः सूर्यो दक्षिणपूर्वे द्विनवतिसंख्या नि उत्तरपश्चिमे एकनवतिसंख्यानि स्वयं चीर्णानि।
उत्तरपूर्वे द्विनवतिसंख्यानि दक्षिणपश्चिमे एकनवतिसंख्यान्यैरावतसूर्यचीर्णानि प्रतिचरतीत्युपपादि
ता। सम्प्रति ऐरावतः सूर्य उत्तरपश्चिमे दिग्विभागे द्विनवतिसंख्यानि मंडलानि दक्षिणपूर्वे एकनवति
संख्यानि स्वयं चीर्णानि दक्षिणपश्चिमे द्विनवतिसंख्यान्युत्तरपूर्वे एकनवतिसंख्यानि भारतसूर्यची
र्णानि प्रतिचरतीत्येतदुपपादयति॥ ४॥ तत्थ अयं एरवए सूरिए तत्र चक्रकालमपि प्रागुक्त स्पष्टं व्याख्येयं

व्याख्यातु सारेण स्वयं व्याख्येयं संप्रत्युपसंहारमाह ॥ ता निक्खममाणा खलु इत्यादि अस्यायं भाव
र्थः। इह तावत् सूर्योऽभ्यंतरं प्रविशन् प्रतिमंडलमेकैकमर्द्धभागे स्वयं वा स्वप्रतिचरति। कोऽपरस्यार्द्धमि र
वतोऽभ्यंतरं प्रविशन् प्रतिमंडलमेकैकमर्द्धभागं स्वयं चीर्णं प्रतिचरति। कोऽपरचीर्णं विचिन्तितं सर्वसंख्यया प्र
तिमंडलमेकैकं कृत्वा तेनाप्यर्द्धेन तु स्वयं सूर्यचीर्णप्रतिचरणविवक्षायामष्टचत्वारिंशत् प्रतिचीर्णं प्राप्यते।
तच्च चतुरशीत्यधिकशतसंख्याष्टादशभाग प्रमितः। एतच्च प्राग्भावितं ततोऽष्टादशभिर्गुणिता
श्चतुश्चत्वारिंशदधिकं शतं भागानां भवति। तत एतदुक्तं भवति पविसमाणा खलु एए दुवे सूरिया अन्नमन्नस्स
चिन्नं पडिचरंति। तं जहा सयमेगं चोयालं मितिगा हा अत्र अप्येतदर्थप्रतिपादकाः काश्चनापि संग्रह
गाथा वर्तन्ते। ता श्रुतछिन्ना इति न कृतः प्रयत्नः॥ केवलं योग्यायाः संप्रदायादवगन्तव्यं तेन तथा व्या
ख्या। यदवक्तव्यता टीकां विस्तरेणाभिहितं मयाऽत्र तत्र तत्र भवत्या धीमद्भिर्विशेषतः॥ इति मलयगिरिवि
रचितायां सूर्यप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य द्वितीयं प्राभृतप्राभृतं समाप्तं॥ ॥श्री॥ तदेवमुक्तं द्वितीयं
प्राभृतप्राभृतं संप्रति तृतीयं वक्तव्यं तस्य चायमर्थाधिकारः कियत्प्रमाणं परस्परमंतरं कृत्वा चारं चरत इति
ततस्तद्विषयं प्रश्नसूत्रमाह। ता केवइयं एए दुवे सूरिया इत्यादि ता इति प्राग्वत् तौ चापि सूर्यौ जंबूद्वीपग
तौ कियत्प्रमाणं परस्परमंतरं कृत्वा चारं चरतः। चरंतावाख्याताविति भगवान् वदेत्। एवं भगवता गौतमेन प्रश्ने २२

कृते भगवानेतद्विषयतत्त्वमध्ये यदा सार्थपरमतरूपाः प्रतिपत्तीर्दर्शयति ॥ तत्थ खलु इमाओ इत्यादि
तत्र परस्परमंतरविचारणायां खलु निश्चितमिमा वक्ष्यमाणस्वरूपाः षट् प्रतिपत्तयः प्रज्ञप्ताः तद्यथा स्वरूपविवक्षास्फुटगम
लक्षणा स्वस्वशिष्यैस्तीर्थांतरीयैः क्रियमाणा प्रज्ञप्ताः तावद्दर्शयति॥ तत्थेगे इत्यादि तेषां षण्णां प्रतिपत्ति
प्ररूपकाणां तीर्थिकानां मध्ये एके तीर्थांतरीयाः प्रथमं व्याख्यात्प्रवादिन एवमाहुः। ता एगमित्यादि ता इति पूर्ववद्
वनीयः एकं योजनसहस्रमेकं च त्रयस्त्रिंशं योजनशतं च त्रयस्त्रिंशदधिकं योजनशतं परस्परस्यान्तरं कृत्वा जंबूद्वीपे
द्वौ सूर्यौ चारं चरतश्चरंतावाख्याताविति वदेत् स्वशिष्येभ्यो वदेत्। अत्रैवोपसंहारमाह। एके एवमाहुरि
ति एवं सर्वत्रापि क्रमेण योजनीयाः। एके पुन द्वितीयास्तीर्थांतरीया एवमाहुः। एकं योजनसह
स्रमेकं च चतुस्त्रिंशं च चतुस्त्रिंशदधिकं योजनशतं परस्परमंतरं कृत्वा चारं चरतः। एके तृतीयाः पुन
रेवमाहुः। एकं योजनसहस्रमेकं च पंचत्रिंशदधिकं योजनशतं परस्परमंतरं कृत्वा चारं चरतः। एके च ३
श्रीपं०कं० तुर्थाः पुनरेवमाहुः। एकं द्वीपं समुद्रं परस्परमंतरं कृत्वा चारं चरतः। एके पुनः पंचमा एवमाहुः। द्वौ द्वीपौ समुद्रौ
परस्परमंतरं कृत्वा चारं चरतः। एके षष्ठाः पुनरेवमाहुः। त्रीन् द्वीपान् त्रीन् समुद्रान् परस्परमंतरं कृत्वा चारं चर
त इति। एते च सर्वेऽपि तीर्थांतरीया मिथ्यावादिनो यथावस्थितवस्तुस्थापनानुगतप्रवादाः॥ वयं पुण इत्यादि वयं पु
नरुत्पन्नकेवलज्ञानालोकाः परतीर्थिकव्यवस्थापितवस्तुव्यवस्थाव्युदासेन पुनरेवं वक्ष्यमाणप्रकारेणो

वलज्ञानेन यथावस्थितं वस्तुतत्त्वमुपलभ्य वदाम ॥ कथं वदथ यूयं भगवंतस्ताहा ता पंचेत्यादि। ता इति अस्मामन्यत्र।
रूपमिदं। तावत्कथ्यात द्वावपि सूर्यौ सर्वाभ्यंतरान्मंडलान्निःक्रामंतौ प्रतिमंडलं पंच पंच योजनानि पंचत्रिं-
शतं चैकषष्टिभागान् योजनस्य पूर्वपूर्वमंडलगतांतरपरिमाणे अभिवर्द्धयंतौ वा ॥ एतच्चैकविकल्पापेक्ष-
या समुच्चये निवुड्ढमाणा वा ॥ इति सर्वबाह्यान्मंडलादभ्यंतरं प्रविशंतौ प्रतिमंडलं पंच पंच योजनानि पंचत्रिं-
शतं च एकषष्टिभागान् योजनस्य निविष्टयंतौ पूर्वपूर्वमंडलगतांतरपरिमाणान्नापयंतौ वा ॥ ष्टः ॥ द्व-
वविकल्पापेक्षया समुच्चये स्वापि विचरतावरं ताभावर्थ्याता वितिष्ठ शिष्यम्यावदेत्युवमुक्ते
भगवान् गौतमादिनि शिष्यति । शंकितवद्य वस्थापनार्थं सूत्रः प्रश्नयति ॥ ७ ॥ तदेणमित्यादि
॥ तत्र एवं विधया वस्तुतत्त्वव्यवस्थाया अवगमको हेतुः । का उपपत्तिरिति प्रसादं कृत्वा वदेतु भगवानाह
॥ ७ ॥ अयमन्नमित्यादि । इदं जंबूद्वीपसूत्रं प्रतिपादकं ॥ वाक्यं पूर्ववत्परिभ्रमंतं सूर्यपरिलावनीयं ता जयाणमि-
या त्यादि । तत्र ज्ञदाणमिति वाक्यालंकारे यदा जंबूद्वीपे प्रसिद्धौ भारतैरावतौ द्वावपि सूर्यौ सर्वाभ्यंतरं मंडलमुप-
संक्रम्य चारं चरतः । तदा नवनवतिः योजनसहस्राणि षट्योजन शतानि चत्वारिंशानि चत्वारिंशदधिकानि पर-
स्परमंतरं कृत्वा चारं चरतः । चरंता ब्याख्याता चिति वदेत् । कथं सर्वाभ्यंतरमंडले ठावयोः सूर्ययोः परस्परमे-
तावत्प्रमाणमंतरमिति चेत् उच्यते । इह जंबूद्वीपो योजनलक्षप्रमाणविष्कंभः सर्वोऽपि सूर्योऽपि जंबू- २४

द्वीपस्य मध्ये अशीत्यधिकं योजनशतमवगाह्य सर्वाभ्यंतरे मंडले चारं चरति । द्वितीयोऽपि अशीत्यधिकं योजनशतम-
वगाह्य अशीत्यधिकं च शतं द्वाभ्यां गुणितं त्रीणि शतानि षष्ट्यधिकानि भवंति एतानि जंबूद्वीपविष्कंभपरिमाणाल्ल-
क्षरूपादपनीयंते । ततो यथोक्तमंतरपरिमाणं भवति । तयाणमित्यादि । तदा सर्वाभ्यंतरचारापि सूर्ययोश्चरण-
काले उत्तमकाष्ठाप्राप्तः परमप्रकर्षप्राप्तः उत्कर्षकः अष्टादशमुहूर्त्तो दिवसो भवति । जघन्या सर्वजघन्या
द्वादशमुहूर्त्ता रात्रिः ॥ ७ ॥ एतन्निरक्रममाण इत्यादि । तत सस्मात्सर्वाभ्यंतरमंडलान्निष्कामंतौ द्वावपि सूर्यौ निःक्रा-
मंतौ नवे सूर्यसंवत्सरमाददानौ नवस्य सूर्यसंवत्सरस्य प्रथमे अहोरात्रे अभितरानंतरमिति सर्वाभ्यं-
तरान्मंडलादनंतरं द्वितीयमंडलमुपसंक्रम्य चारं च रतः ॥ ता जयाणमित्यादि ॥ ततो यदा द्वावपि सू-
र्यौ सर्वाभ्यंतरानंतरमंडलमुपसंक्रम्य चारं चरतस्तदा नवनवतिर्योजनसहस्राणि षट्शतानि पंचचत्वारिं-
शदधिकानि योजनानां पंचत्रिंशतं चैकषष्टिभागाः योजनस्य एतावत्प्रमाणं परस्परमंतरं कृत्वा चारं चरतः
चरता व्याख्याता विति वादत्यात दा कथमेतावत्प्रमाणमंतरमिति चेदुच्यते इह एकोऽपि सूर्यः सर्वाभ्यंतरमंडलग-
तान् अष्टचत्वारिंशदेकषष्टिभागान् योजनस्य अपरं च द्वियोजनविकंप्य सर्वाभ्यंतरानंतरे द्वितीयमंडले चरते
एवं द्वितीयोऽपि । ततो द्वे योजने अष्टचत्वारिंशच्चैकषष्टिभागा योजनस्येति । द्वाभ्यां गुण्यते गुणितं च सति
पंच योजनानि पंचत्रिंशच्चैकषष्टिभागा योजनस्येति भवति । एतावदधिकं पूर्वमंडलगतादंतरपरिमाणं

द्वयं प्राप्यते। ततो यथोक्तमंतरपरिमाणं भवति। तयाणमित्यादि। तदा सर्वाभ्यंतरानंतरद्वितीयमंडलचारचरणकाले
अष्टादशमुहूर्त्तो दिवसो भवति द्वाभ्यां एकषष्टिभागमुहूर्त्ताभ्यां हीन इति। मुहूर्त्तैकषष्टिभागाभ्यां हीनो। द्वादशमुहूर्त्ता रात्रि
द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिका। ते निक्खममाणा इत्यादि। ततः सूर्यौ तस्माद् द्वितीयान्मंडलान्निष्क्रामंतौ सूर्यौ
नवसंवत्सरस्य द्वितीये अहोरात्रे अभ्यंतरस्य सर्वाभ्यंतरस्य मंडलस्य तृतीयं मंडलमुपसंक्रम्य चारं चरतः। ता
जयाणमित्यादि। ततो यदा णमिति पूर्ववद् भणितौ। सूर्यौ अभ्यंतरतृतीयं सर्वाभ्यंतरस्य मंडलस्य तृतीयं मं
डलमुपसंक्रम्य चारं चरतः। तदा तस्मिन् तृतीयमंडलचा रचरणकाले नवनवतिर्योजनसहस्राणि षट् च शता
नि एकपंचाशदधिकानि योजनानां नव च एकष ष्टिभागा योजनस्य परस्परमंतरं कृत्वा चारं चर
तो वा ख्याता इति वदेत्। तदा कथमेतावत्प्रमाण मंतरकरणमिति चेदुच्यते। इहाप्येकः सर्वाभ्यंतरद्वि
तीयमंडलगतान् पंचत्रिंशदेकषष्टिभागान् योजन स्यापरेऽप्येवं इति विकंप्य चारं चरति द्वितीयोऽपि तो
द्वे योजने अष्टाचत्वारिंशच्चैकषष्टिभागा योजनस्य इति द्वाभ्यां गुणिते द्विगुणमेव पंच योजनानि पंचत्रिंशच्चै
कषष्टिभागा योजनस्य इति भवति। एतावत् पूर्वमंडलगतादंतरपरिमाणादभ्यधिकं प्राप्यते इति भवति यथोक्त
मंतरपरिमाणं। तयाणमित्यादि। तदा सर्वाभ्यंतरान्मंडलात् तृतीये मंडले चारं चरतः सदा अष्टादशमुहूर्त्तो २५
दिवसो भवति चतुर्भिरेकषष्टिभागमुहूर्त्तैर्हीन इति प्राकृतत्वात् पदव्यत्ययः समासोऽयमपि। मुहूर्त्तैकषष्टिभागैर्ही

नो। द्वादशमुहूर्त्ता रात्रिश्चतुर्भिर्मुहूर्त्तैकषष्टिभागैरधिका। एवमित्यादि। एवमुक्तेन प्रकारेण खलु निष्क्रा
मंतौ एतौ द्वावपि प्रतिमंडलमेकैकोऽप्येकः सूर्यो द्वे योजने अष्टचत्वारिंशतं चैकषष्टिभागान् विकंप्य चारं चर
त्यपरोऽप्यपरः सूर्य इत्येवं सूर्यौ निष्क्रामंतौ पूर्वस्मात्पूर्वस्मात् तदनंतरान्मं
डलात् तदनंतरमंडलं संक्रामंतौ एकैकस्मिन् मंडले पूर्वपूर्वमंडलगतांतरपरिमाणापेक्षया पंच पंच यो
जनानि पंचत्रिंशतं चैकषष्टिभागान् योजनस्य पर स्परमंतरं वर्द्धयंतौ वर्द्धयंतौ नवसूर्यसंवत्सर
त्र्यशीत्यधिकशततमे अहोरात्रे द्वयमप्य पि मासपर्यवसाने सर्वबाह्यं मंडलमुपसंक्र
म्य चारं चरतः। ता जयाणमित्यादि। ततो यदा तौ द्वौ सूर्यौ सर्वबाह्यं मंडलमुपसंक्रम्य चारं च
रतस्तदा एकं योजनशतसहस्रं षट् च शता नि षष्ट्यधिकानि १००६६० परस्परमंतरं कृत्वा चारं
चरतः। कथमेतदवसेयमिति चेदुच्यते। इह प्र तिमंडलं पंच योजनानि पंचत्रिंशच्चैकषष्टिभागा यो
जनस्यांतरपरिमाणचिंतायामभिवर्द्धमानं प्राप्यते सर्वाभ्यंतराच्च मंडलात् सर्वबाह्यं मंडलं त्र्यशीत्यधिकश
ततमं ततः पंच योजनानि त्र्यशीत्यधिकेन शतेन गुण्यंते जातानि नव शतानि पंचदशोत्तराणि योजनानां ९१५
एकषष्टिभागाः पंचत्रिंशत्संख्यास्त्र्यशीत्यधिकेन शतेन गुण्यंते गुणिते जातानि षट् सहस्राणि चत्वारि शता
नि पंचोत्तराणि ६४०५ एतेषामेकषष्ट्या भागो ह्रियते लब्धं पंचोत्तरं योजनशतं १०५ एतस्मात् योजनराशौ प्रक्षि

सूर्यप्र०वृत्ति प्यते जातानि दशशतानि विंशत्यधिकानि योजनानि १०२० एतत्सर्वाभ्यंतरमंडलगतेऽन्तरपरिमाणे नवनवतियोज
॥२६ नसहस्राणि षट्शतानि चत्वारिंशदधिकानि ९९६४० इत्येवंरूपे प्रक्षिप्यते तदा यथोक्तं सर्वबाह्यमंडलस्यां
तरपरिमाणं भवति 'तयाणं' मित्यादि तदा सर्वबाह्यमंडलचारचरणकाले उत्तमकाष्ठाप्राप्ता परमप्रकर्षप्राप्ता उ
त्कृष्टा अष्टादशमुहूर्ता रात्रिर्भवति जघन्यश्च द्वादशमुहूर्तो दिवसः । एस णं पढमे छम्मासे इत्यादि प्राग्वत् । तेपविस
माणे इत्यादि । ततः सर्वबाह्यान्मंडलादनंतरं प्रविशन्नसौ सूर्यो द्वितीयं षण्मासमाददानो द्वितीयस्य षण्मा
सस्य प्रथमेऽहोरात्रे बाह्यानंतरं सर्वबाह्यान्मंडलादर्वागनंतरं द्वितीयं मंडलमुपसंक्रम्य चारं चरति ।
'ता जया णं' मित्यादि तत्र यदा एतौ द्वौ सूर्यौ सर्वबाह्यादनंतरमर्वाक्तनं द्वितीयं मंडलमुपसंक्र
म्य चारं चरतस्तदा एकं योजनशतसहस्रं षट्शतानि चतुःपंचाशदधिकानि षट्त्रिंशतं चैकषष्टिभागान्
योजनस्य परस्परमंतरं कृत्वा चारं चरतः । चरंतावाख्यातौ । इति वदेत् । कथमेतावदंतरमिति चेत् सर्वबाह्यान्मंडलाद
र्वाक्तने द्वितीये मंडले परस्परमंतरकरणमिति चेदुच्यते इह एकोऽपि सूर्यः सर्वबाह्यमंडलगतान्नष्टाचत्वारिं
शदेकषष्टिभागान् योजनस्यापरे च द्वे योजने अभ्यंतरं प्रविश्य सर्वबाह्यान्मंडलादर्वाक्तनं द्वितीयं मंड
लं चारं चरति । अपरोऽपि ततः सर्वबाह्यगतादंतरपरिमाणादन्तरपरिमाणे पंच योजनानि पंचत्रिंशतं
चैकषष्टिभागैर्योजनस्योनं प्राप्यते इति भवति यथोक्तमंतरपरिमाणं 'तयाणं' मित्यादि तदा सर्वबा २६

भवति यथोक्तमंतरपरिमाणं 'तयाणं' मित्यादि तदा सर्वबाह्यानंतरार्वाक्तनद्वितीयमंडलसंचरणकाले अष्टा
दशमुहूर्ता रात्रिर्भवति द्वाभ्यां मुहूर्तैकषष्टिभागाभ्यामूना । द्वादशमुहूर्तो दिवसो द्वाभ्यां मुहूर्तैकषष्टिभागा
भ्यामधिकः । 'ते पविसमाणा' इत्यादि । ततस्तस्मादपि सर्वबाह्यमंडलादर्वाक्तनाद्द्वितीयमंडलादनंतरं प्रविशंतौ तौ
सूर्यौ द्वितीयस्य षण्मासस्य द्वितीये अहोरात्रे सर्वबाह्यान्मंडलादर्वाक्तनं तृतीयं मंडलमुप
संक्रम्य चारं चरतः । 'ता जया णं' मित्यादि तत्र यदा एतौ द्वौ सूर्यौ सर्वबाह्यान्मंडलादर्वाक्तनं तृतीयं मंडल
मुपसंक्रम्य चारं चरतस्तदा एकं योजनशतसहस्रं षट् च योजनशतानि अष्टचत्वारिंशदधिकानि द्विपं
चाशतं चैकषष्टिभागान् योजनस्य परस्परमंतरं कृत्वा चारं चरतः । प्रागुक्तयुक्त्या पूर्वमंडलग
तादंतरपरिमाणादन्तरपरिमाणमस्य पंच योजनानि पंचत्रिंशता चैकषष्टिभागैर्योजनस्य हीनत्वात्
'तयाणं' मित्यादि तदा सर्वबाह्यान्मंडलादर्वाक्तनतृतीयमंडलचारचरणकाले अष्टादशमुहूर्ता रात्रिर्भवति
चतुर्भिर्मुहूर्तैकषष्टिभागैरूना द्वादशमुहूर्तो दिवसश्चतुर्भिरेकषष्टिभागैर्मुहूर्तस्याधिकः । 'एवं खलु' इ
त्यादि । एवमुक्तप्रकारेण खलु निश्चितमेतेनोपायेनैकैकः सूर्यस्तदनंतरं प्रविशन् पूर्वपूर्वमंडल
गतादंतरपरिमाणादनंतरानंतरार्वाक्तनमंडले अन्तरपरिमाणस्याष्टाचत्वारिंशतमेकषष्टिभागान् द्वे
च योजने हापयन्नपरोऽप्यपरः सूर्य इत्येवंरूपेण एतौ द्वौ सूर्यौ प्रतिदिनं तदनंतरान्मंडलादनंतरं मं

सूर्यप्र० वृत्ति ॥२७ डलं संक्रामंस्तावत् एकैकस्मिन्मंडले पूर्वपूर्वमंडलगतादंतरपरिमाणादनंतरमनंतरं विवक्षितमंडलं पंच पंच
योजनानि पंचत्रिंशतं चैकषष्टिभागान् योजनस्य परस्परमंतरपरिमाणं निवर्द्धयंतौ २ तौ हापयंतौ हापयंतौ वि
त्यर्थः। द्वितीयस्य षण्मासस्य त्र्यशीत्यधिकशततमे अहोरात्रे सूर्यसंवत्सरपर्यवसाने सर्वाभ्यंतरं मंडलमुपसं
क्रम्य चारं चरतः। तान् अयनमित्यादि। तत्र यदा एतौ द्वौ सूर्यौ सर्वाभ्यंतरं मंडलमुपसंक्रम्य चारं चरतः। तदा नवन
वति योजनसहस्राणि षट् योजनशतानि चत्वारिं शानि निवद्धा त्रिंशदधिकानि परस्परमंतरं कृत्वा चारं चरतः॥
अत्रापि च रूपांतरपरिणामभावना प्राग्वत्कृता। व्याख्येयं सुगमं॥१॥ इति श्रीमलयगिरिविरचितायां सूर्य
प्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य चतुर्थं प्राभृतप्राभृतं समाप्तं॥ तदेवमुक्तं चतुर्थं प्राभृतप्रा
भृतं संप्रति पंचममारभ्यते। तस्य चायं पूर्वोपदर्शितोऽर्थाधिकारो यथा। कियंतं द्वीपं समुद्रं वा सूर्यो विगाह्य
ता इति तद्विषयं प्रश्नसूत्रमाह॥१॥ ता केवइयं दीवं समुद्दं वा ओगाहित्ता सूरिए चारं चरइ इत्यादि। ता इति
पूर्ववत् कियंतं कियत्प्रमाणं द्वीपं समुद्रं वा अवगाह्य सूर्यश्चारं चरति। चरन्नाख्यात इति वदेत्। एवं प्रश्नकरणादनं
तरं भगवानेतद्विषये परतीर्थिकप्रतिपत्तिमिथ्याभावोपदर्शनार्थं प्रथमतस्ता एव परती
र्थिकप्रतिपत्तीः सामान्यत उपन्यस्यति॥१॥ तत्थ खलु इत्यादि। तत्र सूर्यस्य चारं चरतो द्वीपसमुद्रावगाहनविष
ये पंच वक्ष्यमाणस्वरूपाः प्रतिपत्तयः परमतरूपाः प्रज्ञप्ताः। तद्यथा एके तीर्थान्तरीया एवमाहुः। ता इति २७

वक्ष्यमाणानां तीर्थांतरीयाणां प्रकृतवक्तव्यतोपक्रमे क्रमोपदर्शनार्थः। एकं योजनसहस्रमेकं च त्रयस्त्रिंशदधिकं योजनश
तं द्वीपं समुद्रं वा अवगाह्य सूर्यश्चारं चरति। किमुक्तं भवति। यदा सर्वाभ्यंतरं मंडलमुपसंक्रम्य चारं चरति तदा एकं यो
जनसहस्रमेकं च त्रयस्त्रिंशदधिकं योजनशतं जंबूद्वीपमवगाह्य चारं चरति। तदा च परमप्रकर्षप्राप्तोऽष्टादशमुहू
र्त्तो दिवसो भवति। सर्वजघन्या च द्वादशमुहूर्त्ता रात्रिः। यदा तु सर्वबाह्यं मंडलमुपसंक्रम्य चारं चरति तदा
लवणसमुद्रमेकं योजनसहस्रमेकं च त्रयस्त्रिंशदधिकं योजनशतमवगाह्य सूर्यश्चारं चरति। तदा च
परमप्रकर्षप्राप्ता अष्टादशमुहूर्त्तप्रमाणा रात्रिर्भवति। सर्वजघन्यो द्वादशमुहूर्त्तप्रमाणो दिवसः। अत्रै
वोपसंहारमाह। एगे एवमाहंसु॥१॥ एके पुनर्द्वितीया एवमाहुः। ता इति पूर्ववत्। एकं योजन
सहस्रमेकं च चतुस्त्रिंशदधिकं योजनशतं द्वीपं समुद्रं वा अवगाह्य सूर्यश्चारं चरति। भावना प्राग्वत्। अत्रै
वोपसंहारमाह। एगे एवमाहंसु॥२॥ एके पुनस्तृतीया एवमाहुः। एकं योजनसहस्रमेकं च पंचत्रिंशदधिकं
योजनशतमवगाह्य सूर्यश्चारं चरति। अत्रापि भावना प्राग्वत्। अत्राप्युपसंहारमाह। एगे एवमाहंसु॥३॥ एके
पुनश्चतुर्थास्तीर्थान्तरीया एवमाहुः। अवड्ढं इति। अपगतं सदपगतार्द्धं तावतो न विवक्षितमर्द्धं यस्य तदपार्द्धमर्द्धद्वी
पमर्द्धमात्रमित्यर्थः। द्वीपं समुद्रं वा अवगाह्य सूर्यश्चारं चरति। इयमत्र भावना। यदा सर्वाभ्यंतरमंडलमुपसंक्रम्य सू
र्यश्चारं चरति तदा अर्द्धं जंबूद्वीपमवगाहते। तदा च दिवसः परमप्रकर्षप्राप्तोऽष्टादशमुहूर्त्तप्रमाणो भवति। स

र्वजघन्या च द्वादशमुहूर्त्तप्रमाणा रात्रिः ॥ यदा पुनः सर्वबाह्यं मंडलमुपसंक्रम्य सूर्यश्चारं चरति तदा जंबूद्वीपं परिहृत्य लि
वणसमुद्रमवगाहते । तदा च सा परमप्रकर्षप्राप्ता अष्टादशमुहूर्त्तप्रमाणा रात्रिः सर्वजघन्यो द्वादशमुहूर्त्तो दिवस
॥ अत्रैवोपसंहारमाह एगे एवमाहंसु ॥ एके पुनः पंचमास्तीर्थान्तरीया एवमाहुः ॥ न किंचिद्द्वीपं समुद्रं वा अवगा
ह्य सूर्यश्चारं चरति । अत्रार्थे तावदेषा ॥ यदापि सर्वाभ्यंतरं मंडलमुपसंक्रम्य सूर्यश्चारं चरति तदापि न किमपि जंबूद्वी
पमवगाहते । किं पुनः ॥ शेषमंडलपरिभ्रमणकाले यदापि सर्वबाह्यं मंडलमुपसंक्रम्य सूर्यश्चारं चरति तदा
पि लवणसमुद्रं किमप्यवगाहते । किं पुनः शेष मंडलपरिभ्रमणकाले । किंतु द्वीपसमुद्रयोरपांतरा
ल एव स काले पि मंडलेषु चारं चरति । अत्रोप संहारमाह ॥ एगे एवमाहंसु यता दक्षुक्तागदश
तः पंचापि प्रतिपत्तयः ॥ संप्रत्येता एव स्पष्टं सा वय ति ॥६॥ तत्र जे ते एवमाहंसु इत्यादि । प्रायः समस्तम
पीदं व्याख्यातार्थं सुगमं च नवरं तावत्तीसविवित्रिएवउ त्रयस्त्रिंशदधिकयोजनशतविषयप्रतिपत्तिवत्चत्र
द्विशत्यातया प्रतिपत्तिस्वरूपा आलापको वक्तव्यः ॥ सा चैवं तत्थ जे ते एवमाहंसु एगं जोयणसहस्सं एगं च
तेत्तीसं जोयणसयं दीवं समुद्दं वा ओगाहित्ता चारं चरइ ते एवमाहंसु जया णं सूरिए सव्वब्भंतरं मंडलं उवसंकमि
त्ता चारं चरति तया णं जंबुद्दीवं एगं जोयणसहस्सं एगं च तेत्तीसं जोयणसयं ओगाहित्ता चारं चरति तया णं उ
त्तमकट्ठपत्ते उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ जहन्निया दुवालसमुहुत्ता राई भवइ जया णं सूरिए स २८

व्वबाहिरं मंडलं उवसंकमित्ता चारं चरइ तया णं लवणसमुद्दं एगं जोयणसहस्सं एगं च तेत्तीसं जोयणसयं ओगा
हित्ता चारं चरइ तया णं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राई भवति जहन्नए दुवालसमुहुत्ते दिवसे भ
वइ पणत्तीसु विचित्तं वत्तानियत्रं पच्छुक्तेन प्रकारेण पंचत्रिंशदधिकयोजनशतविषयायामपि प्रतिपत्तौ
सर्वं भणितव्यं तच्च सुगमत्वात् स्वयं भावनीयं एवं सर्वबाह्ये विज्ञेयं सर्वाभ्यंतरमंडल इव सर्वबाह्यमपि मंडलेष्वा
लापको वक्तव्यः । नवरं जंबूद्वीपस्थाने अवद्ध लवणस मुद्दं ओगाहित्ता इति वक्तव्यं तथा जया णं सूरिए सव्वबाहि
रं मंडलं उवसंकमित्ता चारं चरइ तया णं लवणस मुद्दं ओगाहित्ता चारं चरति इति तया णं राइंदियप्प
माणं प्राग्वत् तथा एतेनैवानुपूर्वकेन त्रिदिवपरिमाणं जंबूद्वीपापेक्षया विपरीतं वक्तव्यं
जंबूद्वीपावगाहे दिवसप्रमाणं यदुक्तं तद्रात्रेर्वक्तव्यं यं यद्रात्रेः दिवसस्यातद्रेवं तथा णं उत्तमकट्ठपत्ता उ
क्कोसिया अट्ठारसमुहुत्ता राई भवइ जहन्नए दुवाल समुहुत्ते दिवसे भवइ । एवमुत्तरसूत्रेष्वपि द्रष्टव्यं योजनानि भाव
नीया । तदेवं परतीर्थिकप्रतिपत्तीरुपदर्श्य संप्रति स्वमतमुपदर्शनार्थं स्वमतमुपदर्शयति ॥७॥ व
यं पुण एवं वयामो इत्यादि वयं पुनरुत्पन्नकेवलज्ञानदर्शना एवं वक्ष्यमाणप्रकारेण वदामस्तामेव प्रकारमाह । यदा सू
र्यः सर्वाभ्यंतरं मंडलमुपसंक्रम्य चारं चरति तदा जंबूद्वीपमशीत्यधिकं योजनशतमवगाह्य चारं चरति तदा चो
त्तमकाष्ठाप्राप्त उत्कर्षकोऽष्टादशमुहूर्त्तो दिवसो भवति सर्वजघन्या द्वादशमुहूर्त्ता रात्रिः ॥ एवं सर्वबाह्येऽपि

त्ता णं सर्वाभ्यंतरमंडलमुपसर्पावाद्योपि मंडले आलापका वक्तव्याः सा चैवं जया णं सव्वबाहिरं मंडलं उवसंकमि
त्ता चारं चरइ इत्यादि नवरमिति सर्वबाह्यमंडलगावादो आलापकाद्यस्यालापकस्य विशेषाय दर्शनीयाः ता मेव वि
वक्षामाह ता आ णं लवणसमुद्दं तिन्नि तीसा जोयणसए ओगाहित्ता चारं चरइ तया णं उत्तमकट्ठपत्ता उक्कोसिया
अट्ठारसमुहुत्ता राई भवति जहन्नए दुवालसमुहुत्ते दिवसे भवइ इति इदं च सूत्रगमं केचित्तु सब्बबाहिरवात्पतिदर्शि
मंतरेण सकलमपि सूत्रं साक्षाल्लिखितं दृश्यते। गाथा ॥ छेलणिय ब्बा ३ अत्रापि काचन प्रसिद्धा विवक्षिता च संग्रा
हिका गाथा संति ता न ण तद्व्याख्यात सांप्रतं व्यवच्छिन्ना इति न कथयितुं व्याख्यातुं वा शक्यंते यथासंप्रदायं वा व्या
ख्या इति ॥५॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य पंचमं प्राभृतप्रा
भृतं समाप्तं ॥५॥ तदेवमुक्तं पंचमं प्राभृतप्राभृतं संप्रति षष्ठं वक्तव्यं तस्य चायमर्थाधिकारः ॥ कियन्मात्रं
क्षेत्रमेकेन रात्रिंदिवेन सूर्यो विकंपते इति ततस्तद्विषयं प्रश्नसूत्रमाह ॥ ता केवइयं ते एगमेगेणं राइंदि
एणं विकंपइत्ता इत्यादि ता इति पूर्ववत् कियत्प्रमाणं क्षेत्रमिति गम्यते एगमेगेणं ति अत्र प्रथमादिकत्वात्स
मकारो लाक्षणिकः सूत्रे एकैकेन रात्रिंदिवेन अहोरात्रेण विकंप्य विकंप्य विकंपनं नाम स्वस्वमंड
लाद्बहिरभ्यंतरप्रवेशनं वा सूर्य आदित्यः चारं चरति चारं चरन् आख्यात इति वदेत् एवं भगवता गौ
तमेन प्रश्ने कृते सति एतद्विषये परतीर्थिकप्रतिपत्तिमिथ्याभावोपदर्शनाय प्रथमतस्ताः प्रतिपत्तीराह ॥ तत्थ खलु 

दि ॥ तत्र सूर्यविकंपविषये खल्विमाः सप्त प्रतिपत्तयः परमतरूपाः प्रज्ञप्ताः तद्यथा तत्थेगे एवमाहंसु इत्यादि तत्र तेषां सप्ता
नां प्रवादिनां मध्ये एके प्रवादिन एवमाहुः ॥ छ योजनानि अर्धद्विचत्वारिंशतं त्र्यशीतिभागान् अर्धद्विचत्वारिंशत्सार्धैक
चत्वारिंशत्संख्यानित्यर्थः। त्र्यशीत्यधिकशतभागान् योजनस्य किमुक्तं भवति त्र्यशीत्यधिकशतसंख्ये
र्भागैः प्रविभक्तस्य योजनस्य संबंधिनः अर्धाधिकान् चत्वारिंशत्संख्यान् भागानेकेन रात्रिंदिवेन वि
कंप्य विकंप्य सूर्यश्चारं चरति। अत्र चोपसंहारमाह एगे एवमाहंसु ॥१॥ एके पुनर्द्वितीया एवमाहुः ॥ अर्ध
तृतीयानि योजनानि एकेन रात्रिंदिवेन विकंप्य सूर्यश्चारं चरति। अत्राप्युपसंहारः एगे एव
माहंसु ॥२॥ एके पुनस्तृतीया एवमाहुः ॥ त्रिभागोनानि त्रीणि योजनानि एकेन रात्रिंदिवे
न विकंप्य सूर्यश्चारं चरति। अत्रोपसंहारः एगे एवमाहंसु ॥३॥ एके पुनश्चतुर्थास्तीर्थान्तरीया एवमाहुः ॥ त्री
णि योजनानि अर्धसप्तचत्वारिंशतं सार्धषट्चत्वारिंशतमित्यर्थः त्र्यशीत्यधिकशतभागान् योजनस्य
एकेन रात्रिंदिवेन विकंप्य सूर्यश्चारं चरति। अत्रापि उपसंहारमाह एगे एवमाहंसु ॥४॥ एके पुनः पंचमा ए
वमाहुः ॥ अर्धचतुर्थानि योजनानि एकेन रात्रिंदिवेन विकंप्य सूर्यश्चारं चरति। अत्रोपसंहारवाक्यं एगे
एवमाहंसु ॥५॥ एके पुनः षष्ठास्तीर्थान्तरीया एवमाहुः ॥ चतुर्भागोनानि चत्वारि योजनानि एकेन रात्रिंदिवेन
विकंप्य सूर्यश्चारं चरति। अत्रोपसंहारवाक्यं एगे एवमाहंसु ॥६॥ एके पुनः सप्तमा एवमाहुः ॥ चत्वारि योजनानि

अर्द्धद्विपंचाशतश्च साद्धैकपंचाशन्नसंख्या अष्टाशीत्यधिकशततमभागान् योजनस्य एकैकेन रात्रिंदिवेन सूर्यो
विकंप्य विकंप्य चारं चरति । उपसंहारवाक्यं एगेणं एवमाहंसु ॥ एतावत्येव मिथ्यारूपाः परप्रतिपत्तीरुपदर्श्य संप्रति
स्वमतं दर्शयति । वयं पुण इत्यादि । वयं पुनरेवं वक्ष्यमाणप्रकारेण केवलज्ञानोपलब्धस्वरूपं वदामः ।
यदुत द्वे योजने अष्टाचत्वारिंशतं चैकषष्टिभागान् योजनस्य एकैकेन रात्रिंदिवेन सूर्यो विकंप्य चा
रं चरति । चारं चरन्नाख्यात इति वदेत् । सांप्रतमस्य वाक्यस्य स्पष्टावगमनिमित्तं प्रश्नसूत्रमुपन्यस्यति
तत्र को हेतुरिति वएज्जा तत्र एवं विधवस्तुतत्वावगतौ को हेतुः । कारणमुपपत्तिरिति वदेत् भगवान्
एवमुक्ते भगवानाह । ता अयण्णमित्यादि इदं जंबूद्वीपवाक्यं पूर्ववत् परिभावनीयं । ता जयाणं
नीयं ता जयाणमित्यादि । तत्र यदा सूर्यः सर्वाभ्यंतरमंडलमुपसंक्रम्य चारं चरति तदोत्तमकाष्ठा
प्राप्तः परमप्रकर्षप्राप्त उत्कर्षकोऽष्टादशमुहूर्त्तो दिवसो भवति जघन्या द्वादशमुहूर्त्ता रात्रिः
निक्खममाणे इत्यादि ॥ ततः सर्वाभ्यंतरान्मंडलान्निःक्रामन् सूर्यो नवं संवत्सरमाददानो नवस्य संवत्सरस्य प्र
थमे अहोरात्रे अभ्यंतरानंतरे इति सर्वाभ्यंतरस्य मंडलस्यानंतरं बहिर्वर्त्तिनि द्वितीयमंडलमुपसंक्रम्य चारं चरति । ता ज
याणमित्यादि तत्र यदा तस्मिन्नवसंवत्सरस्य प्रथमे अहोरात्रे सर्वाभ्यंतरानंतरं द्वितीयमंडलमुपसंक्रम्य
सूर्यश्चारं चरति । चारं चरितुमारभते तदाणमिति प्राग्वत् द्वे योजने अष्टाचत्वारिंशतं च एकषष्टिभागान् योज



नस्य एकैकेन रात्रिंदिवेन एतावत्या एतावदहोरात्रेण विकंप्य चारं चरति । इयमत्र भावना । सर्वाभ्यंतरे मंडले प्रवि
ष्टः प्रथमक्षणादूर्द्ध्वं शनैः शनैः स तदनंतरं द्वितीयमंडलाभिमुखं तथा कथंचन मंडलगत्या परिभ्रमति यथा त
स्याहोरात्रस्य पर्यंते सर्वाभ्यंतरमंडलगतान् द्वे अष्टाचत्वारिंशतमेकषष्टिभागान् योजनस्य परिचारात् योज
ने अतिक्रांतो भवति । ततो द्वितीये अहोरात्रे प्रथमक्षणे एव द्वितीयं मंडलमुपसंपन्नो भवति । तत उक्तं त
याणं दो जोयणाइं अडयालीसं च एगसट्ठिभागे जोयणस्स एगेणं राइंदिएणं विकंपइत्ता सूरिए चारं चरति
तेयाए णमित्यादि । तदा सर्वाभ्यंतरानंतरद्वितीयमंडलचारचरणकाले णमिति पूर्ववत् अष्टादश मु
हूर्त्तो दिवसो भवति । द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामूनः । द्वादश मुहूर्त्ता रात्रिः द्वाभ्यां मुहू
र्त्तैकषष्टिभागाभ्यामधिका । तस्मिन्नपि द्वितीये मंडले प्रथमक्षणादूर्द्ध्वं तथा कथंचनापि तृतीयमंडला
भिमुखं मंडलपरिभ्रमणगत्या चारं चरति यथा तस्या अहोरात्रस्य पर्यंते द्वितीयमंडलगतान् द्वे अष्टाचत्वारिंशतमे
कषष्टिभागान् योजनस्य परिचरितद्वे द्वे ते योजने अतिक्रांतो भवति ततो नवसंवत्सरस्य द्वितीये अहो
रात्रे प्रथमक्षणे एव तृतीयमंडलमुपसंक्रामति । तत आह । से निक्खममाणे इत्यादि । स सूर्यो द्वितीयान्मं
डलात् प्रथमक्षणादूर्द्ध्वं शनैः शनैः निःक्रामन् बहिर्मुखं परिभ्रमन् नवसंवत्सरस्य द्वितीये अहोरात्रे अभ्यं
तरतृतीयं सर्वाभ्यंतरान्मंडलान्तृतीयमंडलमुपसंक्रम्य चारं चरति । तदा अहोरात्रिंदिवास्याच्च वक्ष्यमाणं

सूर्यप्र०वृत्ति
॥३१

क्रमेण विकंपमानश्चारं चरति। तावन्निरूपयितुमाह। ता जया णमित्यादि। तत्र यदा सूर्यः सर्वाभ्यंतरान्मंडलाद् द्वितीयं मं-
डलमुपसंक्रम्य चारं चरति तदा अस्यां रात्रिंदिवायां सर्वाभ्यंतरमंडलगततदनंतरद्वितीयमंडलगतयोः पंचयो-
जनानि पंच त्रिंशतं च एकषष्टिभागान् योजनस्य विकंपते अत्र एकेनाहोरात्रेण द्वे योजने अष्टाचत्वारिंशच्च यो-
जनस्यैकषष्टिभागा विकंपिता द्वितीयेनाप्यहोरात्रेण तत्र च सूर्यमीलनेन योक्तं विकंपपरिमाणं भवति। एतावन्मात्र-
विकंपं चारं चरति तयाणमित्यादि रात्रिंदिवपरिमा      णं सुगमं। संप्रति शेषमंडलेषु गममाह। एवं खलु इत्या-
दि। एवमुक्तेन प्रकारेण खलु निश्चितमेतेनोपा      येन तत्तन्मंडलप्रवेशप्रथमक्षणादूर्ध्वं शनैः शनैर्निष्क्रमन् द्वि-
र्द्वितमंडलान्निर्गमनगमनरूपेण तस्मात्तस्मान्मं      डलात् निष्क्रामन् तदनंतरान्मंडलात्तदनंतरं मंडलं सं-
क्रामन् एकैकेन रात्रिंदिवेन द्वे योजने अ      ष्टाचत्वारिंशतं चैकषष्टिभागान् योजनस्य विकंप-
यन् प्रथमषण्मासपर्यवसाने त्र्यशीत्यधिक॥      शततमे अहोरात्रे सर्वबाह्यं मंडलमुपसंक्रम्य चारं च-
रति सुगमं। तयाणमित्यादि तदा सर्वाभ्यंतरं मंडलं प्रणिधाय अवधीकृत्य तत्र कृतमहोरात्रमादिं कृत्वा इत्यर्थः। त्र्य- ३४
शीत्यधिकेन रात्रिंदिवशतेन पंचदशोत्तराणि योजनशतानि विकंप्यते यत एकस्मिन्नहोरा-
त्रे द्वे योजने अष्टाचत्वारिंशतं च एकषष्टिभागान् योजनस्य विकंपते। ततो द्वे योजने त्र्यशीत्यधिके-
न शतेन गुण्यंते जातानि त्रीणि शतानि षट्षष्ट्यधिकानि। अष्टाचत्वारिंशदपि एकषष्टिभागास्त्र्यशीत्यधिके ३१

सातं १४४० अस्मिन् योजन
*३२

न शतेन गुण्यंते जातानि सप्ताशीतिशतानि च त्र्यशीत्यधिकानि ॥८७८३॥ तेषां योजनानयनाय एकषष्ट्या भा-
गो ह्रियते लब्धं चतुश्चत्वारिंशं योजनशतं शेषा द्विषष्टितो जातानि पंचशतानि दश योजनानि ५१० एतावत्प्रमा-
णं विकंप्य चारं चरति। तयाणमित्यादि। रात्रिंदिवपरिमाणं सुगमं॥ सर्वबाह्यं च मंडलं प्रविष्टः सन् प्रथमक्ष-
णादूर्ध्वं शनैः शनैरभ्यंतरं सर्वबाह्यानंतरद्वितीयमंडलाभिमुखं गमनाय कथंचनापि मंडलगत्या परिभ्रमणेन प्र-
थमषण्मासपर्यवसानभूतात् अहोरात्रपर्यवसानात् स      र्वबाह्यमंडलगतात् द्वे योजने अष्टाचत्वारिंशतमेकषष्टिभागान्
योजनस्यापरे च द्वे योजने अतिक्रम्य सर्वब      ाह्यानंतरद्वितीयमंडलसीमायां वर्तते तथानंतर
द्वितीयस्य षण्मासस्य प्रथमे अहोरात्रे प्रथम      क्षणे सर्वबाह्यानंतरद्वितीयमभ्यंतरं मंडलं प्रवि-
शति तथा चाह। से पविसमाणे इत्यादि। स सूर्यः      सर्वबाह्यान्मंडलादुक्तप्रकारेणाभ्यंतरं प्रविशन् द्वि-
तीयषण्मासस्य प्रथमे अहोरात्रे एवाभ्यंतरं ति।      सर्वबाह्यस्य मंडलस्याभ्यंतरं द्वितीयमनंतरं मंडलमुप-
संक्रम्य चारं चरति। ता जया णमित्यादि। ता इति तत्र यदा सूर्यः सर्वबाह्यानंतरं सर्वबाह्यमंडलानंतरमभ्यंतरं द्वितीयं मं-
डलमुपसंक्रम्य चारं चरति तदा एकेन रात्रिंदिवेन सर्वबाह्यमंडलगतेन प्रथमषण्मासपर्यवसानभूतेनाहोरा-
त्रेण अष्टाचत्वारिंशतमेकषष्टिभागान् योजनस्य विकंप्य एतावता अंतरमवगाह्य चारं चरति। चारं चरतीत्यप्या-
ति। तयाणमित्यादि। रात्रिंदिवपरिमाणं सुगमं॥ से पविसमाणे इत्यादि। स सूर्यः सर्वबाह्यामंतरात् अनंतरं द्वि-

तीयमंडलादपि प्रथममंडलमनुप्रविशति। ततोऽभ्यंतरं प्रविशन् द्वितीयस्य षण्मासस्य द्वितीयेऽहोरात्रे वा दि-
तत्र्वति। सर्वबाह्यस्य मंडलस्यानंतरं द्वितीयमुपसंक्रम्य चारं चरति॥ ता जया णमित्यादि। तत्र यदा सूर्यः सर्व-
बाह्यान्मंडलादनंतरं द्वितीयमंडलमुपसंक्रम्य चारं चरति तदा अस्यां रात्रिंदिवायां सर्वबाह्यमंडलगतसर्व-
बाह्यानंतरद्वितीयमंडलगतायां पंच योजनानि पंचत्रिंशतं चैकषष्टिभागान् योजनस्य विकंपयन्नासौ
एकेनाप्यहोरात्रेण प्रथमषण्मासपर्यवसाने | तेनैव योजनमष्टाचत्वारिंशतं चैकषष्टिभागान् यो-
जनस्य विकंपयति। द्वितीयेनाप्यहोरात्रेण द्वि- | तीयषण्मासप्रथमेन ततश्च एतयोर्मीलने तयोरंकवि-
कंपपरिमाणं भवति। तया णमित्यादि। रात्रिं- | दिवपरिमाणं सुगमं। एवं खलु एएणं उवाएणं पवि-
समाणे इत्यादि। एवं प्राग्वत्सूत्रानुसारेण स्वयं | परिभावनीयं॥७॥ इति श्रीमलयगिरिविरचितायां सू-
र्यप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य सप्तमं प्राभृत- | प्राभृतं समाप्तं॥७॥ तदेवमुक्तं सप्तमं प्राभृतप्राभृतं संप्र-
ति अष्टममारभ्यते तस्य चायमर्थाधिकारः पूर्वोक्तदिष्टानां मंडलानां संस्थानं वक्तव्यमिति ततस्तद्विषयं
प्रश्नसूत्रमाह॥७॥ ता कहं ते मंडलसंठिई इत्यादि। ता इति पूर्ववत् कथं भगवन् त्वया मंडलसंस्थितिराख्या-
तेति वदेत्। भगवानाह। एवं भगवता गौतमेन प्रश्ने कृते सति तद्विषयपरतीर्थिकप्रतिपत्तीनां मिथ्याभावो-
पदर्शनार्थं प्रथमतस्ता एवोपदर्शयति। तत्थ खलु इत्यादि। तत्र तस्यां मंडलसंस्थितौ विषये खल्विमा वक्ष्य- ३२

माणस्वरूपा अष्टौ प्रतिपत्तयः प्रज्ञप्तास्तद्यथा। तत्र तेषामष्टानां परतीर्थिकानां मध्ये एके प्रथमतीर्थांतरीया ए-
वमाहुः॥ ता इति। तेषामेव तीर्थांतरीयाणामनेकवक्तव्यतोपक्रमे क्रमोपदर्शनार्थः। सव्वावि मंडलवयत्ति
मंडलं मंडलपरिभ्रमणमेषामस्तीति मंडलवंति चंद्रादिविमानानि तेषां यो मंडलवत्तात्वात्तदीयवशात्
या इति चंद्रादिविमानानीत्येवं मंडलवत्ता इत्युच्यते। तथा चाह। सर्वाण्यपि समस्तानि मंडलवत्ता मंडलपरिभ्रम-
णवंति चंद्रादिविमानानि। समचतुरस्रसंस्थानसं- | स्थानसंस्थिता प्रज्ञप्ता अत्रोपसंहारः एगे एवमाहंसु। एवं
सर्वेष्वप्युपसंहारवाक्यानि भावनीयानि। एगे पु- | ण द्वितीया एवमाहुः। सर्वाण्यपि मंडलवत्ता विषमचतु-
रस्रसंस्थानसंस्थिताः प्रज्ञप्ताः॥ २ तृतीया एव- | माहुः॥ सर्वाण्यपि मंडलवत्ताः समचतुष्कोण-
संस्थिताः॥ प्रज्ञप्ताः॥ ३ चतुर्था आहुः॥ सर्वाण्यपि मं- | डलवत्ता विषमचतुष्कोणसंस्थिताः॥ ४ पंचमा आ-
हुः॥ सर्वाण्यपि मंडलवत्ता समचक्रवालसंस्थिता | ः प्रज्ञप्ताः॥ ५ षष्ठा आहुः॥ सर्वाण्यपि मंडलवत्ता विषम-
चक्रवालसंस्थिताः प्रज्ञप्ताः॥ ६ सप्तमा आहुः॥ सर्वाण्यपि मंडलवत्ता चक्रार्धचक्रवालसंस्थिताः प्रज्ञप्ताः ७
अष्टमाः पुनराहुः सर्वाण्यपि मंडलवत्ता छत्राकारसंस्थिताः प्रज्ञप्ताः। तत्र [illegible] छत्राकारसंस्थिताः एवम-
ष्टावपि परप्रतिपत्तीरुपदर्श्य संप्रति स्वम- | तमुपदिदर्शयिषुराह॥७॥ तत्थ इत्यादि॥ तत्र तेषामष्टानां ती-
र्थांतरीयाणां मध्ये ये एवमाहुः॥ सर्वाण्यपि मंडलवत्ताश्छत्राकारसंस्थिताः प्रज्ञप्ता इति। एतेन नयेन नयो ता

सूर्यप्र० वृत्ति मप्रतिनियतकचक्रवालसंस्थितं॥ विषयोऽभिप्रायविशेषो ऽदादाः। समंतत्त्वादयो। तथो ज्ञा उरभिप्राय इति। ततः एतेन
॥३३ नायेन एतेनाभिप्रायविशेषेण सर्वमपि चंद्रादिविमानजातं ज्ञानयं सर्वेषामप्युत्तानीकृतकपित्थसंस्थानसं॥
स्थितत्वाचैवापेव वस्तारः। शेषैर्नायैस्तु यावत्सूर्यत्वात्तत्रालावास्तु प्राकृइगात्तरलणीयवात इति। अत्रापि च यथितू
प्राभृतप्राभृतार्थप्रतिपादिकाः क्वचनगाथा वर्त्तते ता यथासंप्रदायं वर्णनीया इति॥ ७॥ इति श्रीमलयगिरि
विरचितायां सूर्यप्रज्ञप्तिटीकायां प्रथमस्य प्राभृतस्य सप्तमं प्राभृतप्राभृतं समाप्तं॥ ७॥ तदेवमुक्तं सप्तमं प्राभृ
तप्राभृतं। सांप्रतमष्टममारभ्यते तस्य चायमर्थाधिकारो मंडलानां विष्कंभो वक्तव्य इति तद्विषयप्र
श्नसूत्रमाह॥ ७॥ ता सव्वावि णं मंडलवया इ॥ त्यादि। ता इति पूर्ववत्। सर्वाण्यपि मंडलपदानि मं
डलरूपाणि पदानि मंडलपदानि सूर्यमंडलानि॥ नातीत्यर्थः। कियान्मात्रं बाहल्येन कियदायामवि
ष्कंभाभ्यां कियत्परिक्षेपाणि परिक्षिताख्याता इति वदेत्। सूत्रे स्त्रीत्वनिर्देशः प्राकृतत्वात्। प्राकृते
हि लिंगं व्यभिचार्यपि यदाह पाणिनिः स्वप्राकृतलक्षणे लिंगं व्यभिचार्यपीति एवं भगवता गौतमेन प्रश्ने
कृते सति भगवानेतद्विषये परप्रतिपत्तीनां मिथ्यात्वोपदर्शनाय प्रथमतस्ता एवोपदर्शयति॥ ७॥
तत्थ खलु इत्यादि। तत्र मंडलबाहल्यादिविचारविषये खल्विमास्तिस्रः प्रतिपत्तयः प्रज्ञप्ताः। तद्यथा। तत्रैके
परतीर्थिकानामेके एवमाहुः। ता इति प्राग्वत्। सर्वाण्यपि मंडलपदानि सू ३३

र्यमंडलानि योजनमेकं बाहल्येन पिंडेन एकं योजनसहस्रमेकं च त्रयस्त्रिं
शदधिकं योजनशतं आयामविष्कंभेणेति। आयामश्च विष्कंभश्च आयामविष्कंभं समाहारो द्वंद्वः तेन प्र
त्येकमायामेन विष्कंभेन चेत्यर्थः। त्रीणि योजनसहस्राणि त्रीणि च नवनवतानि योजनशतानि परिक्षे
पतः प्रज्ञप्तानि इह येषां तीर्थांतरीयाणां मतेन मंडलस्यायामविष्कंभ एकं योजनसहस्रमेकं च यो
जनशतं त्रयस्त्रिंशदधिकमायामविष्कंभाभ्यां तेषां परिक्षेपपरिमाणं वृत्तपरिमाणं त्रिगुणमेव परिवृ
त्तमभिहितं न विशेषाधिकं ततस्त्रीणि योजनसहस्राणि त्रीणि शतानि नवनवत्यधिकानि तथाहि
१० सहस्रस्य त्रीणि सहस्राणि शतस्य त्रीणि शतानि। त्रयस्त्रिंशतस्तु नवनवतिरिति। इदं परिरयपरि
रयपरिमाणं विष्कंभवर्गो दशगुणकरणीवृत्तस्य परिरय इति परिरयगणितेन व्यभिचारि
ति न हि परिरयपरिमाणं त्रीणि योजनसहस्राणि पंचदशानि पंचशतानि किंचिद्विशेषाधिकानि किं
चिद्विशेषाधिकान्यागच्छंति। तथाहि एकं योजनसहस्रमेकं च योजनशतं त्रयस्त्रिंशदधिकमित्येकादश शतानि यो
जनशतानि त्रयस्त्रिंशदधिकानि ११३३ एतेषां वर्गो विधीयते जाता एका कोटी द्वादश लक्षाः त्र्यशीतिः सहस्राणि षट्
षट् शतानि नवकः १२८३६८९॥ ता दशभिर्गुणितं जातमेकमधिकं शून्यं १२८३६८९० एतेषां वर्गमूलानय
ने आगच्छति यथोक्तं परिरयपरिमाणमतश्च मतेन परिरयपरिमाणं व्यभिचारि। एवमुत्तरमपि मतद्वयं प

सूर्यप्र० वृ० रिताव्यमेयां॥ अविवक्षणमसतेऽप्यसंहारपगे एवमाहंसु १ एके एवमाहुः॥ सर्वाण्यपि सूर्यमंडलपदानि
॥२४ प्रत्येकमेकं योजनं बाहल्येनायामेकं योजनसहस्रमेकं च योजनशतं त्रयस्त्रिंशदधिकमायामविष्कं
भाभ्यां ॥ त्रीणि योजनसहस्राणि चत्वारि योजनशतानि नवनवत्यधिकानि ३४९९ परिक्षेपतः प्रज्ञप्तानि तथा
मपि मतेन विष्कंभपरिमाणानुसारेण परिमाणपरिधिः सविशेषं त्रिगुणं स्यात् ततः सहस्रस्य त्रीणि सहस्राणि शता
स्य त्रीणि शतानि त्रयस्त्रिंशतश्च नवनवतिर्भवति॥ द्वितीयप्रतिपत्तिसंहारपरमं एवमाहंसु २ एके पुनरेवमाहुः
॥सर्वाण्यपि मंडलपदानि सूर्यमंडलानि प्रत्ये कमेकं योजनं बाहल्येनायामेकं योजनसहस्रमे
कं च योजनशतं चतुस्त्रिंशं पंचत्रिंशदधिक मायामविष्कंभमायामविष्कंभाभ्यां॥ त्रीणि
योजनसहस्राणि चत्वारि योजनशतानि पंचोत्त राणि ३४०५ परिक्षेपतः॥ तथाहि॥ एकस्य योजनस
हस्रस्य त्रीणि योजनसहस्राणि शतस्य त्रीणि श तानि पंचत्रिंशतः पंचोत्तरं शतमिति। एतानि त्रीण्यपि
मतानि मिथ्यारूपाणि परिरयपरिमाणमात्रे विप्रतिपत्तिरुपात्ता अत्र तु भगवान् स्वमतमुपद
र्शयति॥ वयं पुण इत्यादि वयं पुनरेवं वक्ष्यमाणप्रकारेण वदामः स्वमेव प्रकारमाह। ता सव्वा वि त्यादि
ता इति पूर्ववत् सर्वाण्यपि मंडलपदानि सूर्यमंडलानि बाहल्येनाष्टचत्वारिंशदेकषष्टिभागा
योजनस्य आयामविष्कंभपरिक्षेपेण आयामविष्कंभपरिक्षेपो पुनरनियतानि आख्यातानि क ३४

स्यापि मंडलस्य कियान् आयामो विष्कंभः परिक्षेपश्चेति सा वदति स्वशिष्यान् वाद एवमुक्ते भगवान् स्यो
गौतमः पृच्छति ता कहं णं किं ते इत्यादि ता कथं केन प्रकारेण ते त्वया मंडलपदानामायामविष्कंभपरिक्षेपा अनियता वेको हेतुः
कारणमिति वदेत् भगवानाह। ता अयन्नमित्यादि अयं जंबूद्वीपवाक्यं पूर्ववत् परिपूर्णं वच्य
परिभावनीयं यावत् परिक्षेपेणेति ता जया णमित्यादि तत्र यदा णमिति वाक्यालंकारे सूर्यः सर्वाभ्यंतरं
मंडलमुपसंक्रम्य चारं चरति तदा तन्मंडलपदं स विशेषनिर्दिष्टम् ... बाहल्येनाष्टचत्वारिं
शदेकषष्टिभागा योजनस्य ... आया मविष्कंभाभ्यां नवनवति योजनसहस्राणि षट्
शतानि चत्वारिंशदधिकानि ९९६४० ... सर्वाभ्यंतरमंडलं मेरोरभि
काक्षयोजनशतं जंबूद्वीपमवगाह्य स्थितमपर तोऽपि ततोऽशीत्यधिकं योजनशतं द्वाभ्यां गुणि
ते जाते त्रीणि शतानि षष्ट्यधिकानि ३६० ते जंबूद्वीपविष्कंभपरिमाणाल्लक्षरूपान्निशोध्यंते
ततो यथोक्तमायामविष्कंभपरिमाणं नवनवति योजनसहस्राणि षट्शतानि ... एकोनचत्वा
रिंशदधिकानि॥ ३१५०८९ परिक्षेपतः प्रज्ञप्तं तथाहि तस्य सर्वाभ्यंतरस्य मंडलस्य विष्कंभो नवनवतियोजनस
हस्राणि षट्शतानि चत्वारिंशदधिकानि॥ ९९६४० एतेषां वर्गो विधीयते जातानि नव कोटिनव
ति कोटि ... कोटिनवकः ... ॥ ९९२८१२९६०० ततो दशगुणितं जातम्

कमधिकं सप्तं १९९२८१२९६०००० अस्य वर्गमूलानयनेन लब्धं यथोक्तं परिरयपरिमाणं शेषं तिष्ठति द्विकप
ककोष्टकः सप्तसप्तको नवकः १२१९०७९ एतत्पर्यन्तं। तयाणमित्यादिना रात्रिंदिवपरिमाणं सुगमं। संप्रति निक्ख
ममाणे इत्यादि। स सूर्यः सर्वाभ्यंतरान्मंडलात्प्रागुक्तप्रकारेण निःक्रामन् नवं संवत्सरमाददानो नवस्य
संवत्सरस्य प्रथमे अहोरात्रे सर्वाभ्यंतरानंतरं द्वितीयमंडलमुपसंक्रम्य चारं चरति। तत्र यदा सर्वाभ्यं
तरानंतरं द्वितीयं मंडलमुपसंक्रम्य चारं चरति ३ यदा सर्वाभ्यंतरानंतरं द्वितीयमंडलमुपसंक्रम्य चा
रं चरति। तदा तन्मंड लपदमष्टाचत्वारिंशच्चैक षष्टिभागा योजनस्य बाहल्येन भवति। योज
नसहस्राणि षट्शतानि पंचचत्वारिंशदधि कानि पंचत्रिंशच्चैकषष्टिभागा योजनस्यआ
मविष्कंभस्य तस्मादेकोऽपि सूर्यः सर्वाभ्यंत रमंडलगतानष्टचत्वारिंशतमेकषष्टिभागान्यो
जनस्यापरांश्च द्वयोर्योजनयोर्बहिरवष्टभ्य द्वितीयमं डलं चारं चरति। द्वितीयेऽपि ततो द्वयोर्योजनयोरष्ट
चत्वारिंशतश्चैकषष्टिभागानां योजनस्य द्वाभ्यां गुणने पंचयोजनानि पंचत्रिंशच्चैकषष्टिभागा योजन
स्येति भवति। एतत्प्रथममंडलविष्कंभपरिमाणे अधिकत्वेन प्रक्षिप्यते ततो भवति यथोक्तं द्वितीयमंड
लविष्कंभायामपरिमाणमिति। तत्र त्रीणि योजनशतसहस्राणि पंचदशसहस्राणि एकं च सप्तोत्तरं
योजन शतं किंचिद्विशेषाधिकं परिरयेण प्रज्ञप्तं। तथाहि पूर्वमंडलविष्कंभायामपरिमाणादस्य ३५

मंडलस्य विष्कंभायामपरिमाणे पंचयोजनानि पंचत्रिंशच्चैकषष्टिभागा योजनस्याधिकत्वेन प्राप्यंते। ततोऽस्य
राशेः प्रथमक्षपरिरयपरिमाणमानेतव्यं। तत्र पंच योजनान्येकषष्टिभागकरणार्थमेकषष्ट्या गुण्यंते। जातानि त्री
णि शतानि पंचोत्तराणि ३०५ एतेषां मध्ये उपरितनाः पंचत्रिंशदेकषष्टिभागाः प्रक्षिप्यंते। जातानि त्रीणि शतानि च
त्वारिंशदधिकानि ॥ ३४० एतेषां वर्गो विधीयते। वर्गश्च द्वादशलिगुणना ततो जात एककः एककः पंच
कः षट्कः अष्टौ शून्यानि ॥ ११५६०००० तत एतेषां वर्गमूलानयने लब्धानि चत्वारि शतानि पंचसप्तत्यधिकानि ४७
५ एतेषां योजनानयनार्थमेकषष्ट्या भागो ह्रियते लब्धानि सप्तदश योजनानि त्रिचत्वारिंशच्चैकषष्टि
भागा योजनस्य १७ ४३ एतत्पूर्वमंडलपरि रयपरिमाणे अधिकत्वेन प्रक्षिप्यते। ततो यथोक्त
मधिकृतमंडलपरिरयपरिमाणं भवति किं। चिद्विशेषोनता च किंचिद्न्यूनया विंशत्या एकषष्टि
भागैर्न्यूनता द्रष्टव्या। तयाणं दिवसराइपमा णं तह चेव त्ति यदा द्वितीयमंडलचारचरणकाले दि
वसरात्रिप्रमाणं तदेव प्रायः स्थातव्यं। तयाणं अट्ठारसमुहुत्ते दिवसे हवइ। दोहिं एगट्ठिभागमु
हुत्तेहिं ऊणे दुवालसमुहुत्ता राई भवति। दोहिं एगट्ठिभागमुहुत्तेहिं अहिया। से निक्खममाणे इत्या
दि। ततः स सूर्यो द्वितीयस्मान्मंडलादुक्तप्रकारेण निःक्रामन् नवस्य संवत्सरस्य द्वितीये अहोरात्रे अभ्यंतर
तृतीयं। सर्वाभ्यंतरान्मंडलात्तृतीयं मंडलमुपसंक्रम्य चारं चरति। ताजयाणमित्यादि ततो यदा सूर्यः सर्वा

भ्यंतरानंतरं मंडलात् तृतीयं मंडलमुपसंक्रम्य चारं चरति तदा तत् तृतीयं मंडलं पदं अष्टाचत्वारिंशदेकषष्टिभागा यो
जनस्य बाहल्येन नवनवतिर्योजनसहस्राणि षट्शतानि एकपंचाशदधिकानि नव चैकषष्टिभागा यो
जनस्य ९९६५१ ९/६१ आयामविष्कंभेन आयामविष्कंभाभ्यां तथाहि प्रागिवात्रापि पूर्वमंडलविष्कंभायाम
परिमाणात् पंच योजनानि पंचत्रिंशच्चैकषष्टिभागा योजनस्याधिकत्वेन प्राप्यन्ते ततो यथोक्तमत्रायामविष्कं
भपरिमाणं त्रीणि योजनशतसहस्राणि पंचदश सहस्राणि एकं च पंचविंशत्यधिकं योजनशतं परिक्षे
पेण प्रज्ञप्तं तथाहि पूर्वमंडलादस्य विष्कंभे पंच यो जनानि पंचत्रिंशच्चैकषष्टिभागा योजनस्याधिकत्वेन
प्राप्यंते ततो यथाक्रममायामविष्कंभपरिमा णं भवति तस्य च वृत्तक्षेत्रपरिरयपरिमाणं सप्तदश
योजनानि अष्टात्रिंशच्चैकषष्टिभागा योजनस्य अपत निश्चयनयमतेन परं सूक्ष्मता व्यवहारनयम
तमवलंब्य परिपूर्णान्यष्टादश योजनानि विवक्षि तानि व्यवहारनयमतेन हि लोके किंचिन्न्यूनमपि परिपू
र्णमिति विवक्ष्यते यथा यदपि पूर्वमंडलात् परिरयपरिमाणे किंचिन्न्यूनत्वमुक्तं तदपि व्यवहारनयमतेन परिपू
र्णमिव विवक्ष्यते ततः पूर्वमंडलपरिरयपरिमाणे अष्टादश योजनान्यधिकत्वेन प्रक्षिप्यंते इति भवति
यथोक्तमधिकृतमंडलपरिरयपरिमाणं तया णं दिवराइ तहेव इति तदा तृतीयमंडलचारचरणकाले दि
वसरात्रिप्रमाणं प्रागिव वक्तव्यं तच्चैवं तया णं अट्ठारसमुहुत्ते दिवसे भवति चउहिं एगट्ठिभागमुहुत्तेहिं २६

---

अहिया। एवं खल्वित्यादि एवमुक्तप्रकारेण खलु निश्चितमेतेनोपायेन प्रत्यहोरात्रमेकैकमंडलमो
चनरूपेण निःक्रामन् सूर्यस्तदनंतरान्मंडलात्तदनंतरं मंडलं संक्रामन् संक्रामन् एकैकस्मिन् मंडले पं
च पंच योजनानि पंचत्रिंशच्चैकषष्टिभागा योजनस्यैतावत्परिमाणं विष्कंभवृद्धिमभिवर्द्धयन् अभिवर्द्धयन्
एकैकस्मिन् मंडले अष्टादश अष्टादश योजनानि परिरयवृद्धिमभिवर्द्धयन् अभिवर्द्धयन् इहाष्टाद
श अष्टादशेति व्यवहारत उक्तं निश्चयनयम तेन तु सप्तदश सप्तदश योजनानि अष्टात्रिंशतं चैक
षष्टिभागा योजनस्येति द्रष्टव्यं एतच्च प्रागेव भावितं न चैतदस्वमनीषिकाविजृंभितं यत उक्तं
तद्विचारप्रक्रमे एवं करणविभावनीयामत्र रसजोयणाइं अट्ठत्तीसं च एगट्ठिभागा ॥१७०॥ ए
णय निच्छएणं ववहारेण पुण अट्ठारस जोय णाइं इति प्रथमषण्मासपर्यवसानसूत्रं। द्वा
त्रीत्यधिकशततमे अहोरात्रे सर्वबाह्यमंडलमु पसंक्रम्य चारं चरति। ता जया णमित्यादि तत्र यदा णमिति
वाक्यालंकारे सूर्यः सर्वबाह्यं मंडलमुपसंक्रम्य चारं चरति तदा तत् सर्वबाह्यमंडलपदं अष्टचत्वारिंशदेक
षष्टिभागा योजनस्य बाहल्येन एकं योजनशतसहस्रं षट्शतानि षष्ट्यधिकानि १००६६० आयामविष्कं
भेन आयामविष्कंभाभ्यां तथाहि सर्वाभ्यंतरान्मंडलादनंतरं सर्वबाह्यमंडलपर्यवसानं त्र्यशीत्यधिकं
मंडलशतं भवति मंडले च विष्कंभे च परिवर्द्धते पंच पंच योजनानि पंचत्रिंशच्चैकषष्टिभागा योजनस्य ततः

सूर्यप्र० वृत्ति पंच योजनानि अष्टत्रिंशत्यधिकेन शतेन गुण्यंते जातानि नव शतानि पंचदशोत्तराणि । एषोपि च पंचविंशादेक
१२७ षष्टिभागा योजनस्य तेपि अष्टत्रिंशत्यधिकेन शतेन गुण्यंते जातानि चतुःषष्टिशतानि पंचोत्तराणि ॥ ६४०५ तेषा
मेकषष्ट्या भागो ह्रियते लब्धं पंचोत्तरं योजनशतं १०५ एतत् पूर्वस्मिन् राशौ प्रक्षिप्यते जातानि दश शतानि विंश
त्यधिकानि १०२० एतानि सर्वाभ्यंतरमंडलविष्कंभायामपरिमाणे अधिकानि प्रक्षिप्यंते ततो यथोक्तं सर्वबा
ह्यमंडलगतविष्कंभायामपरिमाणं भवति तथा । त्रीणि योजनशतसहस्राणि अष्टादश सहस्राणि त्री
णि शतानि पंचदशोत्तराणि ३१८३१५ परिक्षेपतः नवरं पंचदशोत्तराणि किंचिन्न्यूनानि द्रष्टव्यानि
तथाहि अस्य मंडलस्य विष्कंभायामो लक्षं षट् योजनशतानि षष्ट्यधिकानि । १००६६० अ
स्य वर्गो विधीयते जाता एका कोटाकोटिः त्रयोदश लक्षाः पंचकः षट्कोटिलक्षाणि १०१३२४३५६
०० ततो दशगुणेन जातमेकमधिकं शून्यं १० । १३२४३५६००० अस्य वर्गमूले लब्धानि त्रीणि
योजनशतसहस्राणि अष्टादश सहस्राणि शतानि चतुर्दशोत्तराणि ३१८३१४ शेषमुद्धरति पंचकः पं
चकः त्रिकः चतुष्कः ॥ ५५३४५०४ छेदराशिः षट्कस्त्रिकः षट्कः षट्कोऽष्टकः ॥ ६३६६२८ ततस्ते
न पंचदशं योजनं किंचिद्विशेषोनं किलत्वस्य ते इति व्यवहारतः सूत्रकृता परिपूर्णं विवक्षित्वा पंचदशोत्तराणीत्युक्तं
अथवा मंडले पूर्वस्मंडलाद्बहिरिधायोः सप्तदश योजनानि अष्टाविंशादेकषष्टिभागा योजनस्य एतस्यैते ३७

तन्महत्रदशयोजनानि अष्टत्रिंशत्यधिकेन शतेन गुण्यंते जातान्येकविंशतिशतानि एकादशोत्तराणि २१११ येपि
चाष्टाविंशादेकषष्टिभागास्तेपि अष्टत्रिंशत्यधिकेन शतेन गुण्यंते जातान्येकत्रिंशच्छतानि चतुःपंचाशद
धिकानि ३१५४ तेषां योजनानयनार्थमेकषष्ट्या भागो ह्रियते लब्धं चतुर्दशोत्तरं योजनशतं ११४ तच्च
पूर्वराशौ प्रक्षिप्यते जातानि द्वाविंशतिशतानि पंचविंशत्यधिकानि २२२५ एतानि सर्वाभ्यंतरमंडलपरि
रयपरिमाणे त्रीणि लक्षाणि पंचदशसहस्राणि नवाशीत्यधिकानि ३१५०८९ इत्येवंरूपे अधिकत्वेन
प्रक्षिप्यंते जातानि त्रीणि लक्षाणि अष्टादश सहस्राणि त्रीणि शतानि चतुर्दशोत्तराणि ३१८३१४
योजनानां तथा सप्तदशानां अष्टाविंशादेकषष्टिभागानां परिरयानि त्रीणि शतानि पंचसप्तत्यधि
कानि ३७५ पराशौ प्रक्षिप्यंते तानि अष्टत्रिंशत्यधिके शतेन गुण्यंते जातान्यष्टषष्टिसहस्राणि षट्शता
नि पंचविंशत्यधिकानि ६८६२५ तेषां द्वादशभि नात्पंचादशाधिकैकविंशतिशतरूपेण २१५ भागो ह्रियते
लब्धा एकत्रिंशादेकषष्टिभागा योजनस्य एतावता प्रक्षेपेण च अत्युक्तं परंतु व्यवहारतः परिपूर्णं योजनं विवक्षितमि
ति पंचदशोत्तराणीत्युक्तं । तथा एतेन पूर्वस्मिन् दिनरात्रिदिवपरिमाणं प्रथमषण्मासपर्यवसानमुपगमं सैव विसमाप्येड
त्यादि ततः सूर्यः सर्वबाह्यमंडलादभ्यंतरं प्रविशन् द्वितीयं षण्मासमाददानो द्वितीयस्य
षण्मासस्य आददानो द्वितीयस्य षण्मासस्य प्रथमे अहोरात्रे सर्वबाह्यानंतरमर्वाक्तनं द्वितीयमंडलमुपसंक्रम्य

चारं चरति। ता जयाणं मित्यादि। तत्र यदा णं मित्यादि। तत्र यदा णं मिति वाक्यालंकारे सर्वबाह्यानंतरमर्वाक्तनं द्वि
तीयमंडलमुपसंक्रम्य चारं चरति तदा तन्मंडलपदं अष्टाचत्वारिंशदेकषष्टिभागा योजनस्य बाहल्येन। एकं
योजनशतसहस्रं षट्शतयोजनशतानि चतुःपंचाशदधिकानि षड्विंशतिश्चैकषष्टिभागा योजनस्य १००
६५४ २६ आयामविष्कंभाभ्यां तत्र आयामविष्कंभस्यांतरघा हि पूर्वोक्तात् सर्वबाह्यमंडलगता अष्टाच
त्वारिंशतामेकषष्टिभागा द्वाभ्यां योजनस्य परवाह्यो इति विशुद्ध्या स्यंतरमवस्थितमपरतोपि तावद्योजनद्वय
स्याष्टाचत्वारिंशताश्चैकषष्टिभागानां। हासयं च पंचयोजनानि पंचत्रिंशच्चैकषष्टिभागा योज
नस्य तिष्ठति। एतत् सर्वबाह्यमंडलगत विष्कं तायाम परिमाणात् शोध्यते। ततो यथोक्तमधि
कृतमंडलविष्कंभायामपरिमाणं भवति। तथा च एकं योजनशतसहस्रं षट्शतानि चतुःपंचाशदधिकानि षड्विंशतिश्चैकषष्टिभागा
योजनस्येति। पुनर्भवति परिक्षेप ३१८२६७ परिक्षेपः तत्र पूर्वमंडलादस्य मंडलस्य विष्कंभा
यामपरिमाणे पंच योजनानि पंचत्रिंशच्चैकषष्टिभागा योजनस्य तिष्ठंति। पंचानां योजनानां पंचत्रि
शत एकषष्टिभागानां परिरयः सप्तदश योजनानि अष्टाविंशतिश्चैकषष्टिभागा योजनस्य भवंति। परं सू
त्रकृता व्यवहारनयमतेन परिपूर्णानि अष्टादश योजनानि विवक्षितानि। ततः प्राग्युक्तात् सर्वबाह्यमंडलपरिर
यपरिमाणात् त्रीणि लक्षाणि अष्टादशसहस्राणि त्रीणि शतानि पंचदशोत्तराणि इत्येवं रूपात् अष्टादश ३८

---

योजनानि शोध्यंते। ततो यथोक्तमधिकृतमंडलपरिरयपरिमाणं भवति। तस्यां णं राइंदियंसि एवं वि। तदा रा
त्रिदिवं त्रिदिवसोत एवं व्याख्यातो नवरं तयाणं अट्ठारसमुहुत्ता राई भवति। दो हिं एगट्ठिभागमुहुत्तेहिं ऊणा उ
वालसमुहुत्ते दिवसे हवइ। दो हिं एगट्ठिभागमुहुत्तेहिं आइएप्रतिपत्सु विसमाणं इत्यादि। ततः स सूर्यस्तस्माद
पि द्वितीयस्मात् मंडलात् उक्तप्रकारेण संवत्सरे विशदद्वितीयस्य ग्रमे समस्य द्वितीयस्या हारात् सर्वबाह्यान्मं
डलादर्वाक्तनं तृतीयं मंडलमुपसंक्रम्य चारं चरति। ता जयाणं मित्यादि। तत्र यदा सूर्यः सर्वबाह्यान्मंडलादर्वा
क्तनं तृतीयं मंडलमुपसंक्रम्य चारं चरति तदा तन्मंडलपदं अष्टाचत्वारिंशदेकषष्टिभागा योजनस्य
बाहल्येन एकं योजनशतसहस्रं षट्चयोजनशतानि अष्टाचत्वारिंशदधिकानि। द्विपंचाशच्चैक
षष्टिभागा योजनस्य। १००६४८ ५२ आयामविष्कंभेनायामविष्कंभाभ्यां। तथाहि। पूर्वस्मान्मंडलादिदं
मंडलमायामविष्कंभे च पंच योजनानि पंचत्रिंशतावेकषष्टिभागा योजनस्य हीनं। ततः पूर्वमंडलविष्कंभा
यामपरिमाणादेकं योजनशतसहस्रं षट्शतानि चतुःपंचाशदधिकानि षड्विंशतिश्चैकषष्टिभागा योजनस्ये
त्येवं रूपात् पंच योजनानि पंचत्रिंशच्चैकषष्टिभागा योजनस्य शोध्यंते। ततो यथोक्तमधिकृतमंडलविष्कंभायामपरि
माणं भवति। तथा त्रीणि योजनशतसहस्राणि अष्टादशसहस्राणि द्वे शते एकोनाशीत्यधिके। ३१८२७९
परिक्षेपतः प्रज्ञप्तं। तथाहि। प्राक्तनमंडलादिदं मंडलं पंच योजनानि पंचत्रिंशतावेकषष्टिभागा योजनस्य वि

क्खंभतो द्वीनं पंचानां योजनानां पंचत्रिंशतां चैकषष्टिभागानां परिरयपरिमाणं वृद्धिरतोऽष्टादशयोजनानि त..
तस्मात्पूर्वमंडलपरिरयपरिमाणे वृद्धौ ध्रुवा। ततो यथोक्तमधिकृतमंडलपरिरयपरिमाणं भवति दिवसरा
इ तहेव त्ति। दिवसरात्री तथैव प्रागिव वक्तव्ये तथा हि तयाणं अट्ठारसमुहुत्ता राई भवइ चउहिं एगट्ठिभागमुहु
त्ति हि ऊणा। दुवालसमुहुत्ते दिवसे भवइ चउहिं एगट्ठिभागमुहुत्तेहिं अहिए इति। एवं खलु त्यादि। एवं उक्तं
प्रयुक्तव्याख्यानुसारेण स्वयं परिभावनीयं नवरं निक्खममाणे इति निर्विशत्सु निर्विशन् सूर्यः पश्चानुपूर्व्या
त्प्रविशति। ता जया णमित्यादि सुगमं अधुना प्रस्तुत। वक्तव्यतोपसंहारमाह ता सव्वा वि णमित्यादि। ततः स
र्वाण्यपि मंडलपदानि प्राग्यथोक्तबाहल्यानाष्टा चत्वारिंशदेकषष्टिभागायोजनस्य दैर्घ्यतः पुन
रेतन्न। अत्र नियतानि तथा यामविष्कंभपरिक्षेपैः। ततः सर्वाण्यपि च मंडलांतरकाणि सूर्येऽस्यैव निर्दिशा॥
प्रायत्नतो वा द्वे द्वे योजने विष्कंभेन। तत एषद्वयोजने अष्टाचत्वारिंशच्चैकषष्टिभागा योजनस्येत्येवं रूपेणेमि
ति वा च्यालं कारेऽअथा। पंचाशत्योत्तराधिकशतप्रस्तुत्यनस्युत्तरीत्यधिकेन शतेन गुणितः सन् पंचदशा शराणि
योजनस्य तत्यारव्यात इति वा दनात शादिमायोजन त्र्यशीत्यधिकेन शतेन गुण्यते जातानि चीणि शतानि
षष्ठ्याधिकानि द्वये पिव अष्टाचत्वारिंशदेकषष्टिभागाः सैषि त्र्यशीत्यधिकेन शतेन गुण्यते जातानि सप्तशतानि
शतानि चतुरशीत्यधिकानि। ६७ षधात पंचयोजनानयतापमेकषष्ट्या भागाः क्रियते लब्धं चतुर्विंशं योजनशतं ३८

---

१४ ततः पूर्वराशौ प्रक्षिप्यते जातानि पंचशतानि दशोत्तराणि ५१० अस्यैवार्थस्य स्पष्टीकरणार्थं सूत्रः क्रमसूत्र।
माह। १७। ता अभितराउ इत्यादि। ता इति तत्र अभ्यंतरान्मंडलपदात्परतो यावद्बाह्यं सर्वबाह्यमंड
लपदं बाह्याद्वा सर्वबाह्यमंडलपदाद्वाक् यावत्सर्वाभ्यंतरमंडलपदमेष पतावानध्वा कियान् कियत्प्र
माण आख्यात इति वदेत्। एवं उक्ते भगवानाह। ता पंचदशोत्तराणि योजनश
तानि आख्यात इति वदेत्। सू। शिष्येभ्यः पंचदशोत्तर योजनशतं तावत् प्रागुक्तानुसारेण स्वयं परिभावनी
यं। ता अभितराए इत्यादि। अभ्यंतराणमंडलपाद मसः अभ्यंतरात् मंडलपदात् परस्य यावद्बाह्यं सर्वबा
ह्यं मंडलपदं यदि वा बाह्यात् सर्वबाह्यात् मंडलपदेन सर्वबाह्यान्मंडलपदादारभ्यार्वाक् सर्वा
भ्यंतरं मंडलपदमेतावान् अध्वा कियत्प्रमाण आख्यात इति वदेत्। एवं भगवानाह। ता पंचेत्यादि। सतावानध्वा पंचे
दशोत्तराणि योजनशतानि अष्टाचत्वारिंशच्चैकषष्टि भागा योजनस्य आख्यात इति वदेत्। पूर्वस्मादध्वप
रिमाणस्य सर्वाभ्यंतरमंडलसत्कबाहल्यपरिमाणेनाधिकत्वात्। १७। ता अभितरात्यादि। ता इति अभ्यंतरान्मंडलपदा
षप्राप्त उत्कृष्टोऽष्टादशमुहूर्त्तो दिवसा सवर्त्त जघन्या द्वादशमुहूर्त्ता रात्रिः ततो द्वितीये त्वहोरात्रे द्वितीये
मंडलेवर्त्तमानएकोपि सूर्य्यो जंबूद्वीप। स्यैकं पंचमं चक्रवालसागं सार्द्धषष्ट्यधिकषट्त्रिंशद्भृतसा
गरूपदानप्रकाशयति। अपरोपि सूर्य्य एकं पं चमं चक्रवालसागं सार्द्धषष्ट्यधिकषट्त्रिंशद्भृतसागसक्तसाग
चतुष्टयरूपं प्रकाशयति। द्वयोरप्येकं पंचमं च। क्रवालसागं सार्द्धषष्ट्यधिकषट्त्रिंशद्भृतसागसक्तसागचतुष्टय।
रूपं प्रकाशयति। एवं प्रत्यहोरात्रमेकैकः सूर्यः षष्ट्यधिकषट्त्रिंशद्भृतसागसक्तसागद्वयमात्रं प्रकाशयतीत्यव
द्वा स्मयोः यावत्सर्वबाह्यं मंडलं सर्वाभ्यंतरान्मंडलात्परतस्त्र्यशीत्यधिकशततमं। ततः प्रतिमंडलं सागद्वयमात्रं नेन
यदा सर्वबाह्यमंडले चरति तदा त्रीणि शतानि षष्ट्यधिकानि सागानां त्रुट्यंति। त्र्यशीत्यधिकस्य शतस्य द्वाभ्यां गुणने
एतावत्याः संख्यायास्तावत्त्रीणि शतानि षट्षष्ट्यधिकानि पंचमचक्रवालसागस्य द्वात्रिंशदधिकसप्तशतसाग ५८

प्रमाणस्यावतिष्ठते। पंचमचक्रवालसागस्यार्द्धं परिपूर्णं तत्र मंडले त्रुट्यतीति। एकावपरिपूर्णं पंचमचक्रवालसाग
रूपं प्रकाशयतीत्यर्थः। ततो जघन्येन मित्यादि तत्र यदा णमिति पूर्ववित्रयो तो प्रवक्तव्य सि खलु द्वावपि सूर्यौ सर्व
बाह्यमंडलमुपसंक्रम्य चारं चरत स्तदा तो समुदितौ जंबूद्वीपस्य द्वीपस्य द्वौ चक्रवालपंचमसागौ अवभासयत
उद्योतयतः प्रकाशयतस्तत्र एकोपि सूर्य एकं पंचमं चक्रवालसागं प्रकाशयति एकोपि अपरोपि द्वितीयो
प्येकं पंचमं चक्रवालसागं प्रकाशयतीति तय णमित्यादि तदा सर्वबाह्यमंडलचारकाले उत्तमकाष्ठाप्राप्त
उत्कर्षिकाष्टादशमुहूर्त्ता रात्रिर्जघन्यात पद्वादशमुहूर्त्तप्रमाणो दिवसः इदमत्र भावना सूर्या
नेह सर्वविषयप्रकाशविधिः क्रमेण द्वितीय मानत्कसूर्य सर्वबाह्यमंडलादभ्यंतरं प्रविशतो
द्वितीयषण्मासाविक्षित इत्र ष्टव्या। द्वितीय षण्मासस्य द्वितीये त्वहोरात्रे सर्वबाह्यान्मंडलादर्वाक्
मंडलादर्वाक् द्वितीयमंडलेवर्त्तमानएकोपि सूर्यएकं जंबूद्वीपस्य द्वीपस्य पंचमचक्रवालसागं षष्ट्यधिकष
ट्त्रिंशद्भृतसंख्यसागसक्तसागद्वयाधिकं प्रकाशयति। अपरोपि सूर्य एकं पंचमचक्रवालसागं षष्ट्यधि
कषट्त्रिंशद्भृतसंख्यसागसक्तसागद्वयाधिकं प्रकाशयति। द्वितीयस्य षण्मासस्य द्वितीये त्वहोरात्रे।
सर्वबाह्यान्मंडलादर्वाक् तृतीयमंडलेवर्त्तमानएकं पंचमं चक्रवालसागं षष्ट्यधिकषट्त्रिंशद्भृत
याधिकं प्रकाशयति। द्वितीयस्य षण्मासस्य सक्तसागचतुष्टयाधिकं प्रकाशयति। अपरोपि सूर्यः परत एकं प

सूर्यप्रज्ञप्ति ॥६०॥ चमं चक्रवालभागं यथोक्तभागवृद्ध्याधिकं प्रकाशयति एवं प्रतिमंडलमेकैकः सूर्यः षष्ट्यधिकषट्
त्रिंशच्छतभागसत्कभागद्वयवृद्ध्या प्रकाशयन् तावदवसेयो यावत्सर्वाभ्यंतरं मंडलं तस्मिंश्च सर्वाभ्यंत
रमंडले द्वितीयस्य पंचमचक्रवालभागस्योपरि वृद्धिः संभवति ततो द्वावपि सूर्यौ सर्वाभ्यंतरमंडले एकं पंचमं चक्र
वालभागं सार्द्धं जंबूद्वीपस्य प्रकाशयतः एकं पंचमं चक्रवालभागं सार्द्धं तथा चैतदेव जंबूद्वीपचक्रवा
लस्य दशभागानुपरिकल्प्यात्र सूत्रं ॥ ता चिय उ दसभागे जंबुदीवस्स दो वि दिवसयरा ता वितिदित्तलेसा ब्भ
िंतरमंडलसंता ॥ चत्तारि य दसभागे जंबु दीवस्स दो वि दिवसयरा ता वितिसंतलेसा बाहिरमंडलसं
ता ॥ एवत्तीसे भागसए छक्का णाउ जंबु दीवस्स ॥ तिरियं तत्तो दो भागे वड्ढइ ... इति
श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां तृतीयं प्राभृतं समाप्तं ॥३॥ तदेवमुक्तं तृतीयं प्राभृत
संप्रति चतुर्थमारभ्यते तस्य चायमर्थाधिकारः ॥ कथं श्वेततायाः संस्थितिरिति ततस्तद्विषयं प्रश्नसूत्र
माह ॥३॥ ता कहं ते सेयताए संठिई आहियाइ तिवदेज्जा ता इति कथं केन प्रकारेण भगवन् त्वया श्वेततायाः संस्थिति
राख्याता इति भगवानवादीत् एवं भगवता गौतमेनोक्ते वर्द्धमानस्वामी भगवानाह ॥३॥ ता तत्थ खलु इत्यादि तत्र श्वेत
ताया विषये खल्वियं वक्ष्यमाणस्वरूपा द्विविधा संस्थितिः प्रज्ञप्ता तामेव दर्शयति तद्यथा चंदसूरियसंठिई य ताव
त्तसंठिई य ततोऽयमर्थः । श्वेततायाः येन प्रकारेण द्विधा भवति तथा दर्शयति । चंद्रसूर्यसंस्थितिः ६०

---

तापक्षेत्रसंस्थितिश्च तत्र चंद्रसूर्यविमानानामपि विद्यमानत्वात्तत्तापक्षेत्रस्य चातपतः श्वेतता ततः प्रयोगाद्भवत्यम
पि श्वेतता तापक्षेत्रमुच्यते तेनोक्तप्रकारेण श्वेतता द्विविधा भवति तत्र चंद्रसूर्यसंस्थितिविषये प्रश्नयति ॥ ता कहं ते चंद्
दिता इति प्राग्वत् कथं त्वया भगवन् चंद्रसूर्यसंस्थितिराख्याता इति वद एवं च चंद्रसूर्यविमानानां संस्थानरूपा सं
स्थितिराख्याता इति तत्र चंद्रसूर्यविमानसंस्थितिविषये सर्वेषामपि श्वेतस्थानरूपा प्रतिपत्तयः एवमुक्ते भगवानेत
द्विषये यावत्यः परतीर्थिकानां प्रतिपत्तयस्तावतीरुपदर्शयति तत्थ इत्यादि तत्र चंद्रसूर्यसंस्थितौ विषये खल्विमा
स्खल्विमाः षोडश प्रतिपत्तयः प्रज्ञप्तास्तद्यथा तत्थेगे एवमाहंसु समचउरंससंठिया चंदसूरसंठिई पु
प्रज्ञप्ता समचतुरस्रसंस्थितसंस्थानं यस्याः चंद्रसूर्यसंस्थितेः सा तथा अत्रैवोपसंहारवाक्यमिदं
एगे एवमाहंसु ॥ एवं सर्वत्रापि प्रत्येकमुप संहारवाक्यं द्रष्टव्यं ॥३॥ एगे पुण एवमाहंसु विसमचउरंस
संस्थिता चंद्रसूर्यसंस्थितिराख्याता सर्वापि । विषमचतुरस्रसंस्थानं यस्याः सा तथेति विग्रहः ॥ एवं समचउरक्कोण
संठियत्ति एवमुक्तेन प्रकारेणापरिभाषमाणिं प्राग्वत् समचतुःकोणं तां चंद्रसूर्यसंस्थितिं वक्तव्या सा चैव एगे
पुण एवमाहंसु समचउक्कोणसंठिया चंदिमसूरियसंठिई पन्नत्ता एगे एवमाहंसु ॥ चउत्थसमचउक्कोणसंठियत्ति
समचतुरस्राः कोणा यत्र तत् समचतुष्कोणं संस्थितं संस्थानं यस्याः सा तथेति विग्रहः ॥ विसमचउक्कोणसंठिय
त्ति । विषमाश्चत्वारः कोणा यत्र तत् विषमचतुःकोणं तेन संस्थितं संस्थानं यस्याः चंद्रसूर्यसंस्थितेः सा तथा ॥ अन्ये

षामभिप्रायेण वक्तव्या सा चैवं एगे पुण एवमाहंसु विसमचउक्कोणसंठिया चंदिमसूरियसंठिई पन्नत्ता एगे एव
माहंसु॥ ४ समचक्कवालसंठिया इति समचक्रवालं समचक्रवालरूपं संस्थितं संस्थानं यस्याः सा तथा अपरेषाम
भिप्रायेण चंद्रसूर्यसंस्थितिर्वक्तव्या सा चैवं एगे पुण एवमाहंसु समचक्कवालसंठिया चंदिमसूरियसंठि
ई पन्नत्ता एगे एवमाहंसु॥ ५ विसमचक्कवालसंठिया इति विषमचक्रवालं विषमचक्रवालरूपं संस्थितं संस्था
नं यस्याः सा तथा अन्येषां मतेन चंद्रसूर्यसंस्थितिर्वक्तव्या सा चैवं एगे पुण एवमाहंसु विसमचक्कवाल
संठिया चंदिमसूरियसंठिई पन्नत्ता एगे एवमाहंसु॥ ६ चक्कद्धचक्कवालसंठिय त्ति चक्रस्यार्द्धभागस्य यदर्द्धं
चक्रवालस्यार्द्धं तद्रूपं संस्थितं संस्थानं यस्याः सा तथा अन्येषामभिप्रायेण वक्तव्या सा [illegible] एगे
पुण एवमाहंसु चक्कद्धचक्कवालसंठिया चंदिमसूरियसंठिई पन्नत्ता एगे एवमाहंसु॥ ७ एगे पुण इत्या
दि। एके पुनरत्र छत्राकारसंस्थिता चंद्रसूर्यसंस्थितिः प्रज्ञप्ता अत्रैवोपसं[illegible] एगे एवमाहंसु॥ ८ गेहसंठिय
त्ति गेहस्येव वास्तुविद्याप्रसिद्धस्य गृहस्येव संस्थितं संस्थानं यस्याः सा तथा अपरेषां मतेन चंद्रसूर्यसंस्थि
तिर्वक्तव्या सा चैवं एगे पुण एवमाहंसु गेहसंठिया चंदिमसूरियसंठिई पन्नत्ता एगे एवमाहंसु॥ ९ गेहावण
संठिय त्ति गृहयुक्त आपणो गृहापणो वास्तुविद्याप्रसिद्धस्तस्येव संस्थितिः संस्थानं यस्याः सा तथा अन्येषामभिप्रा
येण वक्तव्या सा चैवं एगे पुण एवमाहंसु गेहावणसंठिया चंदिमसूरियसंठिई पन्नत्ता एगे एवमाहंसु॥ १०॥ पा ८२

सायसंठिय त्ति प्रासादस्येव संस्थितं संस्थानं यस्याः सा तथान्येषामभिप्रायेण वक्तव्या सा चैवं एगे पुण एवमाहंसु पा
सायसंठिया चंदिमसूरियसंठिई पन्नत्ता एगे एवमाहंसु॥ ११ गोपुरसंठिय त्ति गोपुरस्येव पुरद्वारस्येव संस्थितं संस्था
नं यस्याः सा तथान्येषां मतेनाभिधातव्या सा चैवं एगे पुण एवमाहंसु गोपुरसंठिया चंदिमसूरियसंठिई पन्नत्ता एगे
एवमाहंसु॥ १२ पेच्छाघरसंठिय त्ति प्रेक्षागृहस्येव वास्तुविद्याप्रसिद्धस्य संस्थितं संस्थानं यस्याः सा तथा अपरेषां मतेना
भिधातव्या तद्यथा एगे पुण एवमाहंसु पिच्छाघरसंठिया चंदिमसूरियसंठिई प[illegible] एगे एवमाहंसु॥ १३ वलभीसंठिय
त्ति वलभ्या इव छद्याणामाच्छादनस्येव संस्थितं संस्थानं यस्याः सा तथा अन्येषां मतेनाभिधातव्या सा चैवं एगे पु
ण एवमाहंसु वलभीसंठिया चंदिमसूरियसंठिई पन्नत्ता एगे एवमाहंसु॥ १४ हम्मियतल[illegible]ठिय त्ति
हर्म्यं धनवतां गृहं तस्य तलमुपरितनो भागस्तस्येव संस्थितं संस्थानं यस्याः सा तथा अपरेषामभिप्रायेण वक्तव्या
सा चैवं एगे पुण एवमाहंसु हम्मियतलसंठिया चंदिमसूरियसंठिई पन्नत्ता एगे एवमाहंसु॥ १५ वालग्गपोत्तियासं
ठिय त्ति वालाग्रपोतिका आकाशतडागमध्यव्यवस्थितं क्रीडास्थानं लघुप्रासादमात्रं तस्याइ
व संस्थितं संस्थानं यस्याः सा तथा अपरेषां मतेन चाभिधातव्या तद्यथा एगे पुण एवमाहंसु वालग्गपोत्तियासंठिया चंदिमसू
रियसंठिई पन्नत्ता एगे एवमाहंसु॥ १६ तदेवमुक्ताः परतीर्थिकानां प्रतिपत्तयः एतासां च मध्ये या प्रतिपत्तिः समीचीना
तामुपदर्शयति तत्थ इत्यादि तत्र तेषां षोडशानां परतीर्थिकानां मध्ये ये ते वादिन एवमाहुः समचउरंससंठिता चं

सूर्यप्र०वृ
त्ति ८२

च्चन्द्रसूर्यसंस्थितिः प्रज्ञप्ता इति एते तत्र यत्नेनैतद्ध्यो एके नासिकायेणाप्येते पि एवं चन्द्रसूर्यसंस्थितिरस्माकं सीति भावः॥ तथा हि । इह समे
पि कालविशेषाः सुषमसुषमादयो युगमूला युगस्य चादिः श्रावणमासि बहुलपक्षे प्रतिपदि प्रातस्तदा च समये एकः सूर्यो
दक्षिणपूर्वस्यां दिशि वर्त्तते । तद्वितीयस्त्वपरोत्तरस्यां चन्द्रमा अपि तस्मिन् समये एको दक्षिणापरस्यां दिशि वर्त्तते । द्वितीय उत्तरपू
र्वस्यामत एव तद्युगस्यादौ चन्द्रसूर्याः समचतुरस्रसंस्थिता वर्त्तन्ते यच्च मंडलं तद्विषमस्य यथास्थानं स्थितं सर्वमंडलं युगे
तं चन्द्रमासो सर्वकालमिति तत्स्थितिरिति दव्यमिति सूत्रानविवा. स्यते । तदव युगतः सकलकालविशेषाणां सुषमसुषमादिरूपाणां
मादिर्युतस्य युगस्यादौ समचतुरस्रसंस्थिताः सू । यो विज्ञमसो सर्वं तितत सेषां संस्थितिः समचतुरस्रसंस्थाना एवं प
ता । अत्र पक्षावा यथासंप्रदायं समचतुरस्रसंस्थि तिता ये ति । नो चेव णं इयरेहि ति । नो चेव नेवरतरे : [illegible]
चन्द्रसूर्यसंस्थितिरिति ज्ञातिष्ठा । तेषां मिथ्यारूपत्वात्तत दवमुक्ता चन्द्रसूर्यसंस्थितिः । संप्रति तापक्षेत्रसंस्थितिमधिकृत्य
प्रश्नमतस्य विषयप्रश्नसूत्रमाह ॥ ता कहं ते इत्यादि । ता इति पूर्ववत् कथं [illegible] त्वया तापक्षेत्रसंस्थितिराख्याता
इति भगवान् वदे एव मुक्ते भगवानेतद्विषये यावत्यः परप्रतिपत्तयस्तावतीरुपदर्शयति । तत्थ खलु इत्यादि
तत्र तस्यां तापक्षेत्रसंस्थितौ विषये षडिमाः षोडश प्रतिपत्तयः परप्रतिपत्तिरूपाः प्रज्ञप्तास्ता यथा । तत्र तेषां
षोडशानां परप्रतिपत्तीनां मध्ये एके एवमाहुः । गेहसंठिया इति । गृहस्येव वास्तुविद्याप्रसिद्धस्य गृहस्येव संस्थितं संस्थानं ८२
यस्याः सा तथा तापक्षेत्रसंस्थितिः प्रज्ञप्ता । अत्रैवोपसंहारमाह । एगे एवमाहंसु । एवं जाव वालग्गपोत्तियासंठियाताव

खेत्तसंठिई पन्नत्ताइति । एवमन्तेन तदुक्तेन प्रकारेण चन्द्रसूर्यसंस्थितिगतेन प्रकारेण त्यर्थः गृहसंस्थिताया अ
पि तावत्क्षेत्रं यावद्वालाग्रपोतिकासंस्थिता प्रज्ञप्ता इति तावद्वक्तव्यं । एगे पुण एवमाहंसु । गेहावणसंठिया ताव खि
त्तसंठिई पन्नत्ता एगे एवमाहंसु ॥ एगे पुण एवमाहंसु ॥ पासायसंठिया ताव खित्तसंठिई पन्नत्ता एगे एवमा
हंसु ॥ एगे पुण एवमाहंसु । गोपुरसंठिया ताव खित्तसंठिई पन्नत्ता । एगे एवमाहंसु ॥ एगे पुण एवमाहंसु पे
च्छाघरसंठिया ताव खित्तसंठिई पन्नत्ता एगे ए वमाहंसु ॥ एगे पुण एवमाहंसु । वलभीसंठिया ताव खित्त
संठिई पन्नत्ता । एगे एवमाहंसु । एगे पुण एवमाहंसु हम्मियतलसंठिया ताव खित्तसंठिई पन्नत्ता
एगे एवमाहंसु ॥ एगे पुण एवमाहंसु व लभीपोत्तियासंठिया ताव खित्तसंठिई पन्नत्ता एगे एवमा
हंसु ॥ अत्र सर्वत्रापि पाठस्तु विस्तरो वक्तव्यः । एगे पुण इत्यादि । एके पुनरेवमाहुः । जस्सं
ठिया इत्यादि यत्संस्थितं संस्थानं यस्य स यत्संस्थितो जम्बूद्वीपो द्वीपस्तत्संस्थिता तादृशं जम्बूद्वीपगतं संस्थितं संस्था
नं यस्याः सा तथा तापक्षेत्रसंस्थितिः प्रज्ञप्ता । अत्रोपसंहारः । एगे एवमाहंसु ॥ एगे पुनरेवमाहुः । यत्संस्थितं
भारतं वर्षं तत्संस्थिता तापक्षेत्रसंस्थितिः प्रज्ञप्ता । अत्र विग्रहभावना प्राग्वद्भावनीया । अत्रोपसंहारः । एगे एव
माहंसु ॥ एवमुक्तेन प्रकारेण पञ्चानसंस्थिता तापक्षेत्रसंस्थितिरपरेषामपि तथैव वक्तव्या । सा चैवं । एगे
पुण एवमाहंसु ॥ उज्जाणसंठिया ताव खित्तसंठिई पन्नत्ता एगे एवमाहंसु ग्रंथाग्रं २०००॥ अत्र उद्यानस्य वस

सूर्यप्र० वृत्ति स्थितं संस्थानं यस्याः सा तथेति विग्रहः ॥ ११ ॥ निक्खाणं संठियत्ति । निर्याणं पुरस्य निर्गमनमार्गः । तस्येव संस्थितं संस्थानं य
॥६३ स्याः सा तथा ज्येष्ठा परमागमे लिप्यायण नक्षत्रा । सा चैवं । एगे पुण एवमाहंसु । निद्धाणसंठिया ताव खित्तसंठिई पन्न
त्ता एगे एवमाहंसु ॥ १२ ॥ एगतो निसहसंठियत्ति । एकतो रथस्य एकस्मिन् पार्श्वयो निरंतरं सहते स्कंधे पृष्ठे वा समारोपि
तं भारमिति निषधो बलीवर्दस्तस्येव संस्थितं संस्थानं यस्याः सा एकतो निषधसंस्थिता अपरनामलिप्यायणनक्ष
त्रा सा चैवं एगे पुण एवमाहंसु एगतो निसहसंठि यातावखित्तसंठिई पन्नत्ता एगे एवमाहंसु ॥ १३ ॥ दुहतो निसहसंठिय
त्ति । अपरनामलिप्यायणनक्षत्रा निषध संस्थिता नक्षत्रा उभयतो रथस्य तयोः पार्श्वयोर्या निषधो
बलीवर्द इति याखिवसंस्थितं संस्थानं यस्या सा तथा सा चैवं नक्षत्रा एगे पुण एवमाहंसु दुहतो [illegible]
संठिया ताव खित्तसंठिई पन्नत्ता एगे एवमाहंसु १४ सेणगसंठियत्ति । श्येनकस्येव संस्थितं संस्थानं यस्याः सा
तथा अपरनामलिप्यायणा लिखितत्वात् सा चैवं एगे पुण एवमाहंसु सेणगसंठिया ताव खित्तसंठिई पन्नत्ता
एगे एवमाहंसु ॥ १५ ॥ एगे पुण इत्यादि एकं पुनरेवमाहुः । सेचनकपृष्ठस्येव रूपेण पृष्ठस्येव संस्थितं संस्थानं यस्याः
सा तथा तापक्षेत्रसंस्थितिः प्रज्ञप्ता अत्रोपसंहारमाह एगे एवमाहंसु ॥ १६ ॥ एतावदुक्ताः षोडशापि प्रतिपत्तयः
तास्वसर्वा अपि मिथ्यारूपा अतएता भगवान्नाभिमतं निजमुपदर्शयति । वयं पुण इत्यादि । वयं पुनरुत्पन्नकेवल
ज्ञानाः केवलज्ञानेन यथावस्थितवस्तूपलम्भाद् एवं वक्ष्यमाणप्रकारेण वदामः स्वमेव प्रकारमाह । उद्धीमुह इत्यादि । ६३

ऊर्ध्वमुखकलंबुकपुष्पसंस्थिता ऊर्ध्वमुखस्य कलंबुकापुष्पस्येव तापक्षेत्रस्य संस्थितिः संस्थानं यस्याः सा
तथा तापक्षेत्रसंस्थितिः प्रज्ञप्ता इयं च शकटोद्धिसंस्थिता । सा च कथंभूता तत्पत आह । अंतः मेरुदिशि संकुचा संकुचिता व
हिर्लवणदिशि विस्तृता । तथा अंतः मेरुदिशि वृत्ता वृत्तार्धवलयाकारा सर्वतोऽपि वृत्तामेरुगता तच्चाप्रणितोवादशलागानि
ष्यापितस्याः पिवस्थितत्वात् बहिर्लवणदिशि पृथुला मुकुलतावेत विस्तारमुपगता एतदेव संस्थानं कथानेन स्पष्ट
यति अंतो अंकमुहसंठिया बाहिं सत्थिमुहसंठियत्ति अंतः मेरुदिशि अंकः [illegible] आसनापविष्टस्योत्संगरूप आस
नबंधस्तस्य मुखमग्रभागोऽर्धवलयाकारस्तस्येव संस्थितं संस्थानं यस्याः सा तथा बहिर्लवणदिशि स्वस्तिकमु
खसंस्थिता स्वस्तिकः सुप्रतीतस्तस्य मुखमग्रभागस्तस्येवातिविस्तीर्णत्यासंस्थितं संस्थानं यस्याः सा
उभओ पासे णंति । उभयपार्श्वे नाम मेरुपर्वतस्याग योः पार्श्वयोः तस्यास्तापक्षेत्रसंस्थितेः सूर्यालोकेन स्थित्याव
स्थिता या । इत्येकामेकेका वाहा अवस्थिता ते आयामेन अर्धचन्द्रोपगतमायामस्वशत्या अवस्थितसवतः सा चैके
कायामतः किं प्रमाणेत्याह पंचचत्वारिंशद्योजनसहस्राणि ४५००० एतस्यास्तापक्षेत्रसंस्थितेः एकैकस्या
श्ववाहा अवस्थिते भवतः । तद्यथा सर्वाभ्यंतरा सर्वबाह्या च तत्र या मेरुसमीपे विष्कंभमधिकृत्य वाहा सा सर्वा
भ्यंतरा या तु लवणदिशि जंबूद्वीपस्य पर्यंते विष्कंभमधिकृत्य वाहा सा सर्वबाह्या आयाममधिकृत्य द्विगुणतरा यतस्तया
प्रतिपन्नाया विष्कंभस्य वपरायत्ततया एवमुक्तसर्वभगवान् गौतमः स्वशिष्याणां स्पष्टावबोधनाय पृच्छति ।

॥७॥ तन्नेत्यादि तत्र तस्यामेवं विधायामनंतरोदितायां वस्तुव्यवस्थायां कास्ते तापक्षेत्रसंस्थितिरिति भगवानाह वदेत्॥
एवमुक्ते भगवानाह ता अयस्मित्यादि इदं जंबूद्वीपवाक्यपूर्ववत् परिपूर्णं वृत्तं परिभावनीयं तमजयाण मित्यादि त
त्र यदा सूर्यः सर्वाभ्यंतरमंडलमुपसंक्रम्य चारं चरति तदा ऊर्ध्वमुखकलंबुकापुष्पसंस्थिता दिप्रावन्याख्यया यावत्स वर्ति
तरा वाहा सर्वबाह्या च वाहेति ता सएणमित्यादि तस्यास्तापक्षेत्रसंस्थितेः सर्वाभ्यंतरा वाहा मेरुपर्वतांतं मेरुपर्वतस
मीपे सा च परिक्षेपेण मंदरपरिक्षेपप्रमाणतत्वान्नव योजनसहस्राणि चत्वारि योजनशतानि षडशीतानि षडशीत्यधि
कानि नव च दश भागा योजनस्य ९४८६ ९/१० ॥ आख्यातामया इति वदेत् एवमुक्ते भगवान्गौतमः प्रश्नयति
ता सएणमित्यादि तत्प्रतिषेधस्ता सतापक्षे त्रसंस्थितेः परिक्षेपविशेषो मंदरपरिरयपरिक्षेपात् [illegible]
कुतः कस्मात्कारणादेवं प्रमाणमाख्यातो तेनानाधिकोवेति वदेत् भगवानाह ता जेणमित्यादि ताइति
पूर्ववित्नूयाणमिति वाक्यालंकारे मंदरस्य मेरोः पर्वतस्य परिक्षेपः परिरयस्तं त्रिभिर्गुणितं परिक्षेपं त्रिगुणितं
दशभिश्छित्वा विभज्य अथ कस्मादेवं क्रियते इति चेदुच्यते इह सर्वाभ्यंतरे मंडले वर्तमानः सूर्यो जंबूद्वी
पगतस्य चक्रवालस्य यत्र तत्र प्रदेशे तत् चक्रवालक्षेत्रप्रमाणानुसारेण त्रीन् दशभागान् प्रकाशयति तत्र प्रा
चां संघातिच मंदरसमीपतापक्षेत्रचिंता क्रियमाणा वर्तते ततो मंदरपरिरयः स्वरवाचको मंदरपरिमतस्त्रिगु
णएते त्रिगुणितश्च दशभिर्विभज्यते इति दशभिस्तदागे क्रियमाणे यथोक्तं मंदरसमीपतापक्षेत्रपरिमाणं भवेत् 

तयाहि मंदरपर्वतस्य विष्कंभो दशसहस्राणि १००००ः तेषां वर्गो दशकोटयः १०००००००० तस्य दशभिर्गुणनात्
कोटिशतं १००००००००० अस्य वर्गमूलानयने लब्धानि एकत्रिंशत्सहस्राणि षट्शतानि किंचिन्न्यूनत्रयोविंश
त्यधिकानि परं व्यवहारतः परिपूर्णानि विवक्ष्यंते ३१६२३ एषां राशिस्त्रिगुण्यते जातानि चतुर्नवतिसहस्राणि
अष्टौ शतानि एकोनसप्तत्यधिकानि ९४८६९ एतेषां दशभिर्भागो हियते लब्धानि नव योजनसहस्राणि चत्वारि शतानि
षडशीत्यधिकानि नव च दश भागा योजनस्य एतत्प्रमाणा तावदनंतरोक्तप्रमाणः परिक्षेपविशेषो मंदरप
रिरयपरिक्षेपविशेषस्तापक्षेत्रसंस्थितेराख्या इति वदेत् स्वशिष्येभ्यः ॥ अथ वा बाह्या वाहा प्रोक्ता ॥ मं
दरपरिरयराशिस्त्रिगुणो दशभिर्विभक्तः लब्धं तदा इतावत् सर्वाभ्यंतरमंडले रविर्णा तापक्षेत्रस्य
सर्वाभ्यंतरमंडले वर्तमाने सूर्ये मंदरसमीपेता पक्षेत्रसंस्थितेः सर्वाभ्यंतरवाहाया विष्कंभपरिमाणमुक्त
मिदानीं लवणसमुद्रदिशि जंबूद्वीपपर्यंतवर्तिनी सर्वबाह्या वाहा तस्या विष्कंभपरिमाणमाह ता सएणमित्यादि त
स्यास्तापक्षेत्रसंस्थितेर्लवणसमुद्रांते लवणसमुद्रसमीपे सर्वबाह्या वाहा सा परिक्षेपेण जंबूद्वीपपरि
रयपरिक्षेपाच्चतुर्नवतिर्योजनसहस्राणि अष्टौ च अष्टषष्ट्यधिकानि योजनशतानि चतुरश्च दश भागान् यो
जनस्य ॥ ९४८६८ ४/१० ॥ आख्याता इति वदेत् अत्रैव स्पष्टावबोधनाय प्रश्नं करोति ता सएणमित्यादि ता इ
ति पूर्ववत् स एतावान् परिक्षेपविशेषस्तापक्षेत्रसंस्थितेः कुतः कस्मात्कारणादाख्यातो नो धिको वेति वदेत् भ 

गवानाह। ता जोयणमित्यादि। ता इति पूर्ववत्। योऽयं जंबूद्वीपस्य परिक्षेपः परिरयः गणितप्रसिद्धः स परिक्षेपः त्रिभिर्गुणयि
त्वा तदनंतरं च दशभिश्छित्वा दशभिर्विभज्य अत्र विकारणं प्रागुक्तमेवात्र स्मरणीयं। दशभिर्भागे हियमाणे यद्या
गच्छति तद् जंबूद्वीपपर्यंते तापक्षेत्रपरिमाणमागच्छति। तथाहि। जंबूद्वीपस्य परिक्षेपः त्रीणि लक्षाणि षोडश सहस्राणि द्वे
शते सप्तविंशत्यधिके ३१६२२७ त्रीणि गव्यूतानि अष्टाविंशं धनुःशतं त्रयोदशांगुलानि। एकं च अर्धांगुलं
एतावता कायाऽजनमकं क्रियते किं विशेषमिति ध्रुवराशिः परिक्षेपविवक्षातः ततो विंशति अष्टाविंशत्यधि
कोऽविदितः ध्रुवराशि ३१६२२८ एतत् त्रिभिर्गुण्यते जा तानि नव लक्षाणि अष्टचत्वारिंशत्सहस्राणि षट्शतानि चतुर
शीत्यधिकानि ९४८६८४ एतेषां दशभि र्भागो ह्रियते। लब्धं यथोक्तं जंबूद्वीपपर्यंते सर्ववा[...]
ह्यायां विष्कंभपरिमाणं। तत्थ णं इत्या दि। एवं तावदभ्यंतराद्वितप्रमाणः परिक्षेपविशेषो जंबू
द्वीपपरिरयपरिक्षेपविक्षेपसंस्थिते ॥२॥ तिवदेव। उक्तं च तदन्यत्र अभ्यंतरपरिरयेति गुणितदशभाजिते
नं जंबूद्वीपे तावत् इत्थं आभ्यंतरमंडले रविणा॥१॥ तदेवं जंबूद्वीपतापक्षेत्रसंस्थितेः सर्वाभ्यंतराया सर्वबाह्यायाश्च
बाह्याया विष्कंभपरिमाणमुक्तं संप्रति सामस्त्येनायामतस्तापक्षेत्रपरिमाणं जिज्ञासुः शिष्यः प्रश्नमाह। ता सेणं
मित्यादि। ता इति पूर्ववत्। तापक्षेत्रस्यायामतः सामस्त्येन दक्षिणोत्तरायततया कियत्प्रमाणमाख्यातमिति वदे ८५
त्। भगवानाह। अट्ठत्तरमित्यादि। ता इति पूर्ववत्। अष्टसप्ततिं योजनसहस्राणि त्रीणि योजनशतानि त्रयस्त्रिंशति

त्रयस्त्रिंशदधिकानि योजनविभागं च यावत् आयामतः दक्षिणोत्तरायततया आख्यातमिति वदेत्। तथाहि सर्वा
भ्यंतरमंडले वर्तमानस्य सूर्यस्य तापक्षेत्रं दक्षिणोत्तरायततया मेरोरारभ्य तावद्वर्तते यावल्लवणसमुद्रस्य।
षष्ठो भागः। उक्तं च। मेरुस्स मज्झभागा जाव य लवणस्स रुंदछब्भागो। तावायामो एसो सगडुद्धीसंठिओ निय
मा॥ अत्र एसा इत्यादि। एषा तापो नियमात् शकटोद्धिसंस्थितानां षंमुगमं। तत्र मेरोरारभ्य जंबूद्वीपपर्यंतं यावत्
पंचचत्वारिंशद्योजनसहस्राणि लवणस्यापि सा रौद्रयोजनलक्षतया षष्ठो भागस्त्रयस्त्रिंशद्योजनसह
स्राणि त्रीणि योजनशतानि त्रयस्त्रिंशदधि कानि योजनस्य च त्रिभागः। तत उभयमीलनेन यथोक्तमा
यामप्रमाणं भवति इह सर्वाभ्यंतरमंडल वर्तमानस्य सूर्यस्य तापक्षेत्रस्यांतरं प्रविशंती [...]णि
तिस्रः वत्त्वात्। यद्यपि च जंबूद्वीपात्पततः तो मेरोः सर्वमध्यभागगतं दशभागं च धीकृत्य यामताः
जंबूद्वीपस्य पंचाशत् योजनसहस्राणि भ कात्पाति। संप्रत्यस्य सर्वबाह्यतरापि मंडले वर्तमाने सूर्ये ताप
क्षेत्रस्यायामप्रमाणं ज्ञातिः करंडकसूत्रटीकायां श्रीपादलिप्तसूरिभिस्तु अशीतियोजनसहस्राणि त्रीणि
शतानि त्रयस्त्रिंशदधिकानि योजनस्य च त्रिभागः इत्युक्तं। तदुक्तं चित्तसंभावनया तापक्षेत्रायामपरिमा
णमन्यथा जंबूद्वीपमध्ये तापक्षेत्रस्य पंचचत्वारिंशत्सहस्रमात्रपरिमाणत्वोपगमे यथा सूर्याबिंदिति स्फा
मति तत् पातस्य त्रिवक्तं तापक्षेत्रमपि। ततो यदा सूर्यः सर्वबाह्यं मंडलमुपसंक्रम्य चारं चरति। तदा सर्वबाह्यमंडलस्य

सूर्यप्र.वृ.
॥६६

मीपेप्रकाशाभावंप्राप्नोति।अप्रवत्तदापितत्रमंदरपरिरयपरिक्षेपेणविशेषपरिमाणमग्रेवक्ष्यते।तस्मात्या
दतिप्रसक्तिर्व्याख्यानमप्यस्फुटमतश्चमिति।तदेवंसर्वाभ्यंतरमंडलमधिकृत्यतापक्षेत्रसंस्थितिरुक्ता।संप्रति
तदेवसर्वाभ्यंतरमंडलमधिकृत्यांधकारसंस्थितिंप्रतिपिपादयिषुरिदंप्रश्नसूत्रमाह॥७॥तयाणमित्या
दि।तदासर्वाभ्यंतरमंडलचारकालेकिंसंस्थिताकिंसंस्थितंसंस्थानंयस्याःअदिवाकारस्यवसंस्थितंसंस्थानंय
स्याःसाकिंसंस्थिता।अंधकारसंस्थितिराख्याता। ताइतिवदेत्।भगवानाह।ताइत्यादि।ताइतिपूर्ववत्।ऊर्द्ध्व
मुखाकृतकलंबुकापुष्पसंस्थिताआख्याता इतिवदेत्।साचअंतःमेरुदिशिविष्कंभमधिकृत्यसंकुचा सं।
कुचिताबाहल्यलवणदिशिविस्तृताअतःबाह्य तामेरुदिशिसंकुचितावलयाकारा।सर्वतोवृत्तामेरुसंस्थितो
छोदशभागाअप्यतस्याश्चव्यवस्थितत्वात् द्दिलवणदिसिइयुत्ताविस्तीर्णा।एतदेवसंस्थानकथनेनस्प
ष्टयति।अंतोअंकमुदसंठियाबाहिंसंठिया। हसंठिया।अनायासपद व्याख्यानंप्रागिववेदितव्यं।तस
याणंसममित्यादि।तस्याश्चअंधकारसंस्थितेस्तापक्षेत्रसंस्थितिरिवद्विधाबाहाअवस्थितायामेरुपर्वत।
स्यासन्नयथार्थेनिउसाया:पार्श्वाया।प्रात्पकामक्षेकसावनायाडेजंबूद्वीपगतत्वात्तदायाआमतआयाम
प्रमाणमधिकृत्यावस्थितेभवतस्तद्यथा।पंचचत्वारिंशद्योजनसहस्राणि४५०००अवस्थितत्वात्विष्कंभमधिकृ।
त्यकिंकस्याअंधकारसंस्थितेर्भवतस्तद्यथा।सर्वाभ्यंतरासर्वबाह्याचबाहाएतयोर्व्याख्यानंप्रागिवद्रष्टव्यं।त। ६६

तस्सर्वाभ्यंतरायाबाहायाविष्कंभमधिकृत्यप्रमाणमितिधिक्खराहत्तीसमणमित्यादि।तस्याअंधकारसंस्थितेस्स
र्वाभ्यंतरायाबाहामंदरपर्वतांतेमंदरपर्वतसमीपेसाचषट्योजनसहस्राणित्रीणिशतानिचतुर्विंशानिचतुर्विंशा। ए
त्यधिकानि६३२४षट्दशभागायोजनस्य।यावत्परिक्षेपेणपरिरयपरिक्षेपेणाख्याताइतिवदेत्।अ
मुवमेवार्थस्पष्टावबोधनार्थंपृच्छति॥८॥ताएणमित्यादि।ताइतिप्राग्वत्।तस्याअंधकारसंस्थितेःसयघोक्त
प्रमाणपरिक्षेपविशेषा।मंदरपरिरयपरिक्षे पणविशेषःकुतःकस्मात्कारणात्आख्यातो।नानाव्यधिक
स्वतिभगवान्वदेत्।एवंप्रश्नेकृतेभगवानाह। ता।जेणमित्यादि।ताइतिपूर्ववत्।योणमितिवाक्या।
क्र लंकारेमंदरस्यपर्वतस्यपरिक्षेपःप्राग्उ प्रमाणसंपरिक्षेपंतस्यात्रिगुणितःकस्मादस्येत्युर्णा
नामतावद्उच्यते।इहसर्वाभ्यंतरमंडले॥ चारंचरतोःसूर्ययोरेकस्यापिसूर्यस्यजंबूद्वीपगतस्यचक्रवा
लस्यत्रतत्रवाप्रादेशेचक्रवालक्षेत्रे उसारेणदशभागाः।त्रयःप्रकाशरूपाभवंति।अपरस्यापिसूर्य
स्यत्रयःप्रकाशरूपादशभागाःसन्तितथाचक्रवालान्षट्दशभागाभवंति।तेषांत्रयाणांरदशभागानामपांतरा
लेद्वौदशभागौरजनी।ततोद्वयोर्गुणनंतौचत्वारोदशभागाइतिदशभिर्गुणनं।ससंतावक्षत्रेद्वाभ्यांतद
वप्राप्तंचक्रे।तावदिंदसहिंछित्तादसहिंताणएत्तीरमाणेपरिरयविसेसओहियांति।इहयाअस्या
यमर्थः।दशभिश्छित्वादशभिर्विभज्यदशभिर्गुणितेक्रियमाणेयथोक्तमंधकारसंस्थितेमंदरपरिरयपरिक्षेपेण

सूर्य० वृत्ति ॥६७ परिमाणमागच्छति तथाहि मेरुपर्वतपरिरयपरिमाणमेकत्रिंशद्योजनसहस्राणि षट्शतानि त्रयोविंशत्यधिकानि
३१६२३ एतद्द्वाभ्यां गुण्यते जातानि त्रिषष्टिसहस्राणि द्वे शते षट्चत्वारिंशदधिके ६३२४६ एतेषां दशभिर्भागे हृ
ते लब्धानि षट् योजनसहस्राणि त्रीणि शतानि चतुर्विंशत्यधिकानि षट् च दशभागा योजनस्य ६३२४ ६/१० एता
वाननंतरोदितप्रमाणोऽन्धकारसंस्थितिः परिक्षेपविशेषो मंदरपरिरयपरिक्षेपेण विशेष आख्यात इति व
देत् तदेवमुक्तमन्धकारसंस्थितेः सर्वाभ्यंतरगाया बाहाया विष्कंभपरिमाणमधुना सर्वबाह्याया बाहाया आह
तीसे णमित्यादि तस्यामन्धकारसंस्थितेः स र्वबाह्या बाहा लवणसमुद्रांते लवणसमुद्रसमीपे जंबूद्वी
पपर्यंते सा च परिक्षेपेण जंबूद्वीपपरिर परिक्षेपेणाख्याता त्रिषष्टिर्योजनसहस्राणि [illegible]
चत्वारिंशा योजनशतानि षड् दश भागा यो जनस्य यावत् ६३२४५ ६/१० एतदेव स्पष्टं शिष्यानवबोधयि
तुं भगवान् गौतमः पृच्छति ताणमित्यादि ता इति प्राग्वत् तस्यान्धकारसंस्थितेः सा तावान् परिक्षेपविशेषो
जंबूद्वीपपरिक्षेपविशेषः कुतः कस्मात् कारणात् आख्यात इति वदेत् भगवान् वर्द्धमानस्वा
मी आह ता जेणमित्यादि ता इति पूर्ववत् यायाणमिति वाक्यालंकारे जंबूद्वीपस्य परिक्षेपः प्रागुक्तप्रमाण
स्तं परिक्षेपं द्वाभ्यां गुण्यते द्वादशभिर्वा द्वादशभिर्विभज्य चकारणं प्रागेवोक्तं दशभिर्भागे ह्रियमाणे च
योक्तमन्धकारसंस्थितेर्जंबूद्वीपपरिरयपरिक्षेपणमागच्छति तथाहि जंबूद्वीपस्य परिक्षेपपरिमाणं त्रीणि ६७

लक्षाणि षोडशसहस्राणि द्वे शते अष्टाविंशत्यधिके ३१६२२८ एतद्द्वाभ्यां गुण्यते जातानि षट् लक्षाणि द्वात्रिंश
त्सहस्राणि चत्वारि शतानि षट्पंचाशदधिकानि ६३२४५६ तेषां दशभिर्भागे हृते लब्धानि त्रिषष्टिर्योजनसहस्रा
णि द्वे शते पंचचत्वारिंशदधिके षट् च दशभागा योजनस्य ६३२४५ ६/१० एतावाननंतरोदितप्रमाणोऽ
न्धकारसंस्थितेः परिक्षेपविशेषो जंबूद्वीपपरिरयपरिक्षेपेण विशेष आख्यात इति वदेत् तदेवमुक्तं सर्वबा
ह्यायामपि बाहायां विष्कंभपरिमाणं संप्रति सा च स्य नान्धकारसंस्थितेरायामप्रमाणमाह ॥ ता तीसे णमित्यादि
दं वायामप्रमाणं तापक्षेत्रसंस्थितिगतायाम परिमाणवत्परिभावनीयं समानत्वात् तिकवानूअवेवसर्वा [illegible]
भ्यंतरमंडलवर्त्तमानयोः सूर्ययोर्दिव सरात्रिमुहूर्त्तप्रमाणमाह ता जयाणमित्यादि सुगमं
वं सर्वाभ्यंतरमंडलततापक्षेत्रसंस्थितिरन्ध कारसंस्थितिर्वा किंसंस्थितेति सर्वबाह्यमंडलतामस्थि
रादेता जयाणमित्यादि ता इति पूर्ववत् यदा सूर्य सर्वबाह्यमंडलमुपसंक्रम्य चारं चरति तदा किंसंस्थिता तापक्षे
त्रसंस्थितिराख्याता इति भगवान् वदेत् भगवानाह ता उद्धीमुहेत्यादि ता इति पूर्ववत् ऊर्ध्वमुखकलंबुकापुष्पसं
स्थिता तापक्षेत्रसंस्थितिराख्याता वदेत् स्वशिष्येभ्यः एवमित्यादि एवं पूर्वोक्तेन प्रकारेण यथाभ्यंतरमंडलस्थ
भ्यंतरमंडलगतसूर्ये अन्धकारसंस्थितेः प्रमाणमुक्तं तथा सर्वबाह्यमंडलगते सूर्ये तापक्षेत्रसंस्थित
परिमाणमपि तद्वा यत्तु नः सूर्ये सर्वाभ्यंतरमंडलवर्त्तमाने सूर्ये तापक्षेत्रसंस्थितेः प्रमाणं तथा सर्वबाह्यमंडलवर्त्तमा

सूर्यप्रज्ञप्ति
॥६८॥

तेसूर्यस्य अंधकारस्थिते:प्रमाणमभिधत्ते। ता वट्टवयावट्टवयाणं ठत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ताइ
त्यादि तावद्वंसूत्रातालणनीयं। अंतो संकुडा बाहिं वित्थडा। अंतो वट्टा बाहिं पिहुला। अंतो अंकमुहसंठिया बाहिं स
त्थिमुहसंठिया। उभओपासेणं तीसे दुवे बाहाउ अवट्ठियाउ भवंति पणयालीसं२ जोयणसहस्साइं आयामे
णं। दुवे य णं तीसे बाहाउ अणवट्ठियाउ भवंति तं जहा। अब्भिंतरिया चेव बाहा सव्वबाहिरिया चेव बाहा। तीसे णं
सव्वब्भंतरिया बाहा मंदरपव्वयंतेणं छ जोयण सहस्साइं तिन्नि य छव्वीसे जोयणसए छच्च दसभागे जोयण
स्स परिक्खेवेणं आहियत्ति वएज्जा। ता से णं परिक्खेवविसेसे कओ आहियत्ति वएज्जा। ता जे णं मंदरस्स
पव्वयस्स परिक्खेवे तं परिक्खेवं दोहिं गुणित्ता दसहिं छित्ता दसहिं भागे हीरमाणे एस णं परिक्खेवविसे
से आहियत्ति वएज्जा। ता से णं तावक्खेत्ते केवइयं आयामेणं आहियत्ति वएज्जा। ता तेसीइं जोयण
सहस्साइं तिन्नि तेतीसे जोयणसए जोयणस्स तिभागं आहियत्ति वएज्जा। ता कहं संठिया अंधकारसंठिई
आहियत्ति वएज्जा। ता उद्धीमुहकलंबुयापुप्फसंठाणसंठिया अंधकारसंठिई आहियत्ति वएज्जा। ता अंतो संकुडा बा
हिं वित्थडा। अंतो वट्टा बाहिं पिहुला। अंतो अंकमुहसंठिया बाहिं सत्थिमुहसंठिया। उभओपासेणं तीसे दुवे बा
हाउ अवट्ठियाउ भवंति पणयालीसं जोयणसहस्साइं आयामेणं। दुवे य णं तीसे बाहाउ अणवट्ठियाउ भवंति तं जहा
सव्वब्भंतरिया चेव बाहा। सव्वबाहिरिया चेव बाहा। तीसे णं सव्वब्भंतरिया बाहा मंदरपव्वयंतेणं नवजोयणसहस्सा ६८

---

इं चत्तारि य छलसीए जोयणसए नव य दसभागे जोयणस्स परिक्खेवेणं आहियत्ति वएज्जा। ता जे णं मंदर
स्स पव्वयस्स परिक्खेवे तं परिक्खेवं तिहिं गुणित्ता दसहिं छित्ता दसहिं भागे हीरमाणे एस णं परिक्खेवविसे
से आहियत्ति वएज्जा। तीसे णं सव्वबाहिरिया बाहा लवणसमुद्दंतेणं चउणउइं जोयणसहस्साइं अट्ठ य अट्ठ
ठ जोयणसए चत्तारि य दसभागे जोयणस्स परिक्खेवेणं आहिएइत्ति वएज्जा। ता एस णं परिक्खेवविसेसे क
ओ आहिएइत्ति वएज्जा। ता जे णं जंबुद्दीवस्स दीवस्स परिक्खेवे तं पयणं सहस्साइं तिन्नि य तीसे जोयणसए
ए जोयण तिभागं च आहिएइत्ति वएज्जा। ता याणं उत्तमकट्ठपत्ता उक्कोसिया अट्ठारसमुहुत्ता राइ भ
वंति जहन्नए दुवालसमुहुत्ते दिवसे भवइ। इदं च सकलमपि प्राग्वत् सूत्रव्याख्यावत्सम्यग्
भावनीयं। तापक्षेत्रसंस्थितौ विस मानायां मंदरपरिरयादिगास्यां गुण्यते। अंधकारे च ता
याउ तत्रिभिस्तद्वदनंतरं चाप्तयत्रापि दशभिर्वि भज्यते। तथा सर्वबाह्ये मंडले सूर्यस्य चारं चरतो लवणसमु
द्रमध्ये पंचायाजनसहस्राणि तापक्षेत्रं। तदनुरोधादंधकारस्यायामो भावनीत। ततस्त्र्यशीतियोजनस
हस्राणि युक्तमिति। एवमुक्तं तापक्षेत्रसंस्थितिपरिमाणमंधकारसंस्थितिपरिमाणं च॥७॥ संप्रत्यूर्ध्व
मध:पूर्वविभागश्च पार्श्वतिर्यग्भागं यावत्प्रकाशयत: सूर्यौ इति निरूपणार्थं सूत्रमाह॥८॥ ता जंबुद्दीवे णं इत्या
दि। ता इति पूर्ववत्। जंबुद्वीपे कियत् किं प्रमाणं क्षेत्रं सूर्यौ ऊर्ध्वं तापयत: प्रकाशयत:। कियदध:। कि

सूर्यप्रज्ञप्ति ॥६७

यच्चलक्षणं तिर्यक् पूर्वभागे अपरभागे चेत्यर्थः॥ भगवानाह ता इत्यादि ता इति पूर्ववत् जंबूद्वीपे द्वीपे सूर्यौ प्रत्येकं पूर्वविमा
नादूर्ध्वमेकं योजनशतं तापयतः॥ अधस्तापयतोऽष्टादशयोजनशतानि। एतच्चालौकिकयामापेक्षया ऊ
र्ध्वं तु तापयतोऽलौकिकयामाः समभूतलभागमवधीकृत्याष्टयोजनसहस्राण्येव स्थितास्तत्रापि सूर्यप्रकाश
प्रसरतीति ततः समभूतलभागस्याधो योजनसहस्रं तदूर्ध्वं चाष्टौ योजनशतानीत्येवमष्टादश योज
नशतानि। तिर्यक् पुनर्विमानात्पूर्वभागे अपरभागे च प्रत्येकं तापयतः सप्तचत्वारिंशद्योजनसहस्राणि द्वे यो
जनशते त्रिषष्ट्यधिके एकविंशतिं च षष्टिभागान् योजनस्य॥ ४७२६३ २१/६० ॥ इति श्री मलयगिरि
विरचितायां सूर्यप्रज्ञप्तिटीकायां चतुर्थं प्राभृतं समाप्तं॥ ४॥ तदेवमुक्तं चतुर्थं प्राभृतं संप्रति पंच
ममारभ्यते तस्य चायमर्थाधिकारः कस्मिन् लेश्या प्रतिहता इति ततस्तद्विषयं प्रश्नसूत्रमाह॥ ता कंसि
णमित्यादि ता इति पूर्ववत् कस्मिन् मंडले सूर्यस्य लेश्या प्रसरंती किमागत्य लेश्या प्रतिहता आख्याता इति
वदेत्॥ अत्रायमभिप्रायः इह बहिरभ्यंतरं प्रविशंती सूर्यस्य लेश्या कस्मिन्नागत्य प्रतिहता तस्याः पुरतो गंतव्याया
ताः सर्वस्यां तावत् सर्वाभ्यंतरमंडले जंबूद्वीपगतं तापक्षेत्रमायामतः पंचचत्वारिंशद्योजनसहस्रप्रमाणमाख्या
तमतः सर्वाभ्यंतरमंडलात् सूर्यलेश्या प्रतिहतिर्मंदरेणापि पद्यते। अन्यथा नातिक्रामति सा नीतत्वतिक
स्य तापक्षेत्रस्यापि तिर्यक्क्रमेणासावान्न सर्वबाह्यमंडले चारं चरति सूर्ये हीनमायाममतो लवेन्न न वद्दीनमुक्त ६७

मातावसीयात क्वापि लेश्याप्रतिघात इत्युपयंति ततस्तदवगमाय प्रश्न इति। एवं प्रश्ने कृते सति भगवानेतद्विषये यथा
वत्प्रतिपत्तयस्तावतीरुपदर्शयति॥ ता तत्थ इत्यादि तत्र सूर्यलेश्याप्रतिहतिविषये खल्विमा विंशतिः प्रतिपत्तयः
प्रज्ञप्तास्तद्यथा तत्र तेषां विंशतेः परतीर्थिकानां मध्ये एके एवमाहुः मंदरपर्वते सूर्यस्य लेश्या प्रतिहता आख्या
ता इति वदेत्॥ वदेदिति तेषां मूलसूत्रस्यात्रोऽप्युपलक्षणपदं॥ आद्योऽवापसहारः। एगे एवमाहंसु॥ १॥ एके पुनरेवमाहुः
मेरौ पर्वते सूर्यस्य लेश्या प्रतिहता आख्याता इति वदेत् एवं एकादशमाः एवमित्यादि एवमुक्तेन प्रकारेण
एतेन वक्ष्यमाणेन प्रतिपत्तिविशेषसूत्रेण आलापकेन शेषप्रतिपत्तिजातं नेतव्यं तानेव प्रतिपत्तिविशे
षसूत्रेणालापकान् दर्शयति मणोरमंसि णं पव्वतंसि इत्यादि प्रत्यालापकं च पूर्वोक्तानि पदानि नेत
नीयानि तत एवं सूत्रपाठः॥ एगे पुण एवमाहंसु ता मणोरमंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति
वदेज्जा एगे एवमाहंसु॥ २॥ एगे पुण एवमाहंसु। ता सुदंसणंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियति
वदेज्जा एगे एवमाहंसु॥ ३॥ एगे पुण एवमाहंसु ता सयंपभंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वदे
ज्जा एगे एवमाहंसु॥ ४॥ एगे पुण एवमाहंसु ता गिरिरायंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वदे
ज्जा एगे एवमाहंसु॥ ५॥ एगे पुण एवमाहंसु ता रयणुच्चयंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वदे
ज्जा एगे एवमाहंसु॥ ६॥ एगे पुण एवमाहंसु ता सिलुच्चयंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वदे

सूर्यप्रज्ञप्ति
॥७०

एज्जा॥ एगे एवमाहंसु॥ ८ एगे पुण एवमाहंसु। ता लोयमज्झंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वएज्जा ए
गे एवमाहंसु॥ ९ एगे पुण एवमाहंसु। ता लोगनाभिंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वएज्जा ए
गे एवमाहंसु॥ १० एगे पुण एवमाहंसु। ता अच्छंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वएज्जा एगे
एवमाहंसु॥ ११ एगे पुण एवमाहंसु। ता सूरियावत्तंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वएज्जा एगे एव
माहंसु॥ १२ एगे पुण एवमाहंसु। ता सूरियावरणंसि पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वएज्जा ए
गे एवमाहंसु॥ १३ एगे पुण एवमाहंसु ता उत्त ॥छ॥ मंसि णं पव्वयंसि सूरियस्स लेसा पडिहया आहियत्ति वए
ज्जा एगे एवमाहंसु॥ १४ एगे पुण एवमाहंसु ता दिसादिसिंसि णं पव्वयंसि सूरियस्स लेसा पडिहया
आहियत्ति वएज्जा एगे एवमाहंसु॥ १५ एगे पुण एवमाहंसु। ता अवतंसंसि णं पव्वयंसि सूरियस्स लेसा पडि
हया आहियत्ति वएज्जा। एगे एवमाहंसु॥ १६ एगे पुण एवमाहंसु। ता धरणिखीलंसि णं पव्वयंसि सूरियस्स
लेसा पडिहया आहियत्ति वएज्जा एगे एवमाहंसु॥ १७ एगे पुण एवमाहंसु। ता धरणिसिंगंसि णं पव्वयंसि सूरि
यस्स लेसा पडिहया आहियत्ति वएज्जा एगे एवमाहंसु॥ १८ एगे पुण एवमाहंसु ता पव्वइंदंसि णं पव्वयंसि सूरि
यस्स लेसा पडिहया आहियत्ति वएज्जा एगे एवमाहंसु॥ १९ एगे पुण एवमाहंसु ता पव्वयरायंसि णं पव्वयंसि ७०
सूरियस्स लेसा पडिहया आहियत्ति वएज्जा एगे एवमाहंसु॥ २० तदेवं परतीर्थिकप्रतिपत्तीरुपदर्श्य संप्रति

स्वमतमुपदर्शयति। ॥छ॥ वयं पुण इत्यादि। वयं पुनरुत्पन्नकेवलज्ञाना इत्थं वदामो यदुत ता इति पूर्ववत् य
स्मिन् पर्वते अभ्यंतरं प्रसरंती सूर्यस्य लेश्या प्रतिघातमुपगच्छति। स मंदरोप्युच्यते। तावत्पर्वतराजोप्युच्यते
सर्वेषामप्येतेषां शब्दानामेकार्थिकत्वात् अथ मंदरो नाम देवस्तत्र पल्योपमस्थितिको महर्द्धिकः परिवसति
तेन तद्योगात् मंदर इत्यभिधीयते। सकलतिर्यग्लोकमध्यभागस्य मर्यादाकारित्वात् मेरुः॥२ मनांसि देवता
नामपि अतिसुरूपतया रमयतीति मनोरमः॥३ शोभनं जांबूनदमयत्वात् बहुरत्नबहुलतया च मनोनि
र्वृतिकरं दर्शनं यस्यासौ सुदर्शनः॥४ स्वयमा दित्यादिनिरपेक्षं रत्नबहुलतया प्रकाशको यस्य
स स्वयंप्रभः॥५ तथा सर्वेषामपि गिरीणा मुच्छ्रितत्वेन तीर्थकरजन्माभिषेकाश्रयतया च राजे
ति गिरिराजः॥६ तथा रत्नानां नानाविधानामुत्साबा। ल्पनचय उपचयो यत्र स रत्नोच्चयः॥७ तथा शिलानां पांडुकं
बलशिलाप्रभृतीनामुच्चकैः शिरस उपरि चयः संभवो यत्र स शिलोच्चयः॥८ तथा लोकस्य तिर्यग्लोकस्य
समस्तस्यापि मध्ये वर्त्तते इति लोकमध्यः॥९ तथा लोकस्य तिर्यग्लोकस्य बहुलप्रत्वस्य नाभिरिव झाल
मध्यगतत्वेन तत् हेतुत्वेन च कदाचिल्लोकनाभिः॥१० तथा अच्छः स्वच्छः सुनिर्मलजांबूनदरत्नबहुलत्वात्॥११ तथा सू
र्यमुपलक्षणमेतत् चंद्रग्रहनक्षत्रतारकाश्च प्रदक्षिणमावर्त्तंते यस्य स सूर्यावर्तः॥१२ तथा सूर्यमुपलक्षणमे
तत् चंद्रग्रहनक्षत्रतारकाभिः समंततः परिभ्रमणशीलैरावियते सर्वतः इति सूर्यावरणः॥१३ कृवउ

सूर्यप्र०टी
ति॥७१

लमिति वचनात्कर्मण्यनटप्रत्ययः॥ तथा गिरीणामुत्तम इति उत्तमः॥ तथा दिशामादिः दिगादिः॥ तथाहि रु
चकाद्दिशां विदिशां च प्रभवो रुचकश्चाष्टप्रदेशात्मको मेरुमध्यवर्ती ततो मेरुरपि दिगादिरित्युच्यते
॥ तथा गिरीणामवतंसक इवावतंसकः॥ इत्यमीषां च षोडशानां नाम्नां संग्राहिके इमे तत्र द्वीपप्र
ज्ञप्तिप्रसिद्धे गाथे मंदर मेरु मणोरम सुदंसण सयंपभे य गिरिराया। रयणोच्चय सिलोच्चय मज्झे लोग
स्स नाभी य॥ अच्छे य सूरियावत्ते सूरियावरणे इ य। उत्तमे य दिसाई य वडिंसे इय सोलसे॥ तथा धरण्याः
पृथिव्याः कीलक इव धरणिकीलकः॥ तथा ध रणिशृंगमिव धरणिशृंगं॥ पर्वतानामिंद्रः पर्वतेंद्रः॥ पर्वता
नां राजा पर्वतराजः॥ तदेवं सर्वेऽपि मंदराद यः शब्दाः परमार्थत एकार्थिकास्ततो मिथ्या मिथ्याप्रत्यय
वृत्ताः प्राक्तनाः प्रतिपत्तयः सर्वा अपि मिथ्या रूपा अवगंतव्याः॥ या अपि च लेश्याप्रतिहतिः सा मंदरेऽपि
अन्यत्रापि च तथा वाच्या॥७॥ तत्र ये ते इत्यादितो इति एवं वाचयन्निति सर्वत्र लोकान्ते पुद्गला मेरुतटलग्ने
संस्थिताः सूर्यस्य लेश्यां स्पृशंति ते पुद्गलाः सूर्यस्य लेश्यां प्रतिघ्नंति अस्पृश्यमाना प्रतिघ्नंत्यः सूर्यलेश्याया
स्पृ प्रतिस्खलितत्वात्॥ ये पि पुद्गला मेरुतटे तिर्यक् संस्थिता अपि दृश्यमानपुद्गलांतर्गताः सूक्ष्मत्वान्न च
क्षुस्पर्शमुपयांति तेऽपि दृष्टा अपि सूर्यलेश्यां प्रतिघ्नंति॥ तेऽप्यंतरांतरा प्रविष्टत्वात् सूर्यलेश्याया अस्पृ
ष्टरूपं प्रतिस्खलमानत्वात्॥ ये पि माराशीन्यपि चरमलेश्यांतर्गता अचरमलेश्याविषयसंस्थि ७१

ताः पुद्गलास्तेऽपि सूर्यलेश्यां प्रतिघ्नंति। ते हि चरमलेश्यायाः प्रतिस्खलमानत्वात्॥८॥ इति श्रीमलयगिरिवि
रचितायां सूर्यप्रज्ञप्तिटीकायां पंचमप्राभृतं समाप्तं॥५॥ तदेवमुक्तं पंचमप्राभृतं संप्रति षष्ठमारभ्यते तस्य चायम
र्थाधिकारः कथमोजसः संस्थितिराख्यातेति ततस्तद्विषयप्रश्नसूत्रमाह॥ ता कहं ते उयसंठिई आहिताइ
ति वदेत् कथं केन प्रकारेण किं सर्वकालमेकरूपावस्थायितया उतान्यथा ओजसः प्रकाशस्य संस्थितिरवस्था
नमाख्याता इति वदेत्॥ एवमुक्ते भगवानेतद्विष ये यावत्यः प्रतिपत्तयः संभवंति तावतीः कथयति॥ तत्थ खलु
इत्यादि तत्र ओजःसंस्थितिविषये खल्विमाः पंचवि शतिः प्रतिपत्तयः प्रज्ञप्ताः॥ तद्यथा तत्र तेषां पंचविंशतेः प
रतीर्थिकानां मध्ये एके वादिनः एवमाहुः ता इति पूर्ववत् अनुसमयमेव प्रतिक्षणमेव सूर्यस्य
ओजोऽन्यदुत्पद्यते अन्यदपैतीति किमुक्तं भ वति प्रतिक्षणं सूर्यस्य ओजः प्राक्तनात् भिन्नप्रमाणं वितथं
ति अन्यदेव प्राक्तनात् भिन्नप्रमाणमुत्पद्य ते॥ सूत्रे च ओजःशब्दस्य क्लीबत्वेन निर्देशः प्राकृतत्वादार्षत्वाद्वा
अत्रैवोपसंहारः एगे एवमाहंसु॥१॥ एके पुनरेवमाहुः ता इति पूर्ववत् अनुमुहूर्त्तमेव प्रतिमुहूर्त्तमेव सू
र्यस्य ओजोऽन्यदुत्पद्यते अन्यदपैति अत्रापि उपसंहारः एगे एवमाहंसु॥२॥ एवमित्यादि। एवमुक्ते
न प्रकारेण एतेनैवाभिलापेन शेषा अपि त्रयोविंशतिः प्रतिपत्तयो भावनीयाः ता निवालित्वा
परिपाठ्या द्रष्टव्याः अन्यदुत्पद्यते अन्यदपैति नवरं रात्रिंदिवं रात्रिंदिवमनु अनुरात्रिंदिवमित्येवं स

वंवविग्रहस्सावनाकरणीया॥ पा०॥ प्रत्येवं सूत्रस्य वेदितव्या॥ २॥ एगे एवमाहंसु ता अणुराइंदियमेव सूरियस्स उ
या अण्णा उप्पज्जइ अण्णा अवेति एगे एवमाहंसु॥ ३॥ एगे पुण एवमाहंसु ता अणुपक्खमेव सूरियस्स उया अण्णा
उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु ४ एगे पुण एवमाहंसु ता अणुमासामेव सूरियस्स उया अण्णा उप्पज्ज
इ अण्णा अवेइ एगे एवमाहंसु॥ ५ एगे पुण एवमाहंसु ता अणुउउमेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवे
इ एगे एवमाहंसु ६ एगे पुण एवमाहंसु ता अ णुअयणमेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ
एगे एवमाहंसु ७ एगे पुण एवमाहंसु ता अणु संवच्छरमेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ
एगे एवमाहंसु ८ एगे पुण एवमाहंसु ता अणु जुगमेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ
एगे एवमाहंसु ९ एगे पुण एवमाहंसु ता अणुवा ससयमेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे
एवमाहंसु॥ १० एता अणुवाससहस्समेव सूरि यउया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु १ एता अ
णुवाससहस्समेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ ११ एगे पुण एवमाहंसु ता अणु
वाससयसहस्समेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ १२ एगे पुण एवमाहंसु ता अ
णुपुव्वमेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ १३ एगे पुण एवमाहंसु ता अणु ७२
पुव्वसयमेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ १४ एगे पुण एवमाहंसु ता अणु

---

पुव्वसहस्समेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ १५ एगे पुण एवमाहंसु ता अणुपु
व्वसयसहस्समेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ १६ एगे पुण एवमाहंसु ता अणुपलिउ
वममेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ १७ एगे पुण एवमाहंसु ता अणुपलिउवमसय
मेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ १८ एगे पुण एवमाहंसु॥ ता अणुपलिउवमसा
हस्समेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा। अवेइ एगे एवमाहंसु॥ १९ एगे पुण एवमाहंसु अणुपलिउ
वमसयसहस्समेव सूरियस्स उया अण्णा उ प्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ २० एगे पुण एवमाहंसु
ता अणुसागरोवममेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु॥ २१ एगे पु
ण एवमाहंसु ता अणुसागरोवमसयमेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एवमाहंसु
॥ २२ एगे पुण एवमाहंसु ता अणुसागरोवमस हस्समेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवेइ एगे एव
माहंसु॥ २३ एगे पुण एवमाहंसु ता अणुसागरोवमसयसहस्समेव सूरियस्स उया अण्णा उप्पज्जइ अण्णा अवे
इ एगे एवमाहंसु॥ २४ एगे पुण एवमाहंसु ता अणुउस्सप्पिणिउसप्पिणिमेव सूरियस्स उया अण्णा उप्पज्ज
इ अण्णा अवेइ एगे एवमाहंसु॥ २५॥ ताश्च प्रतिपत्तयः सर्वा अपि मिथ्यारूपा अत एतासामपादन भगवान्।
स्वमतमुपदर्शयति। वयं पुनरेवं वक्ष्यमाणप्रकारेण वदामः स्वमेव प्रकारमाह। ता तीसमित्यादि। ता इति

सूर्य० वृत्ति पूर्वस्मिन्नर्द्धमण्डले प्रतिवर्षं परिपूर्णतया त्रिंशतं त्रिंशतं मुहूर्तान् सूर्यस्य ओजः प्रकाशोऽवस्थितं भवति किमु
॥७३॥ क्तं भवति सूर्यसंवत्सरपर्यन्ते यदा सूर्यः सर्वाभ्यन्तरमण्डले चारं चरति तदा सूर्यस्य अर्द्धमण्डलोपगतमोजः परिपूर्ण
प्रमाणं त्रिंशतं मुहूर्तान् यावद्भवति। तृणपर्यंति। ततः परं सर्वाभ्यन्तरान्मण्डलात् परमित्यर्थः। सूर्यस्यौजोऽनव
वस्थितं भवति। कस्मादनवस्थितं भवतीति चेदत आह। छम्मासे इत्यादि। यस्मात्कारणात् सर्वाभ्यन्तरान्मण्डलात्पर
तः प्रथमान् सूर्यसंवत्सरसत्कान् षण्मासान् यावत् दूसायोर्द्धमण्डलोपगतमोजः प्रकाशं प्रत्यहोरात्रमेकैकस्य
त्रिंशदधिकाष्टादशशतसंख्यभागसत्कस्य भागस्य ह्रासेन निवेष्टयति। शोषयति। तदनन्तरं द्वितीया
न् षण्मासान् सूर्यसंवत्सरसत्कान् यावत् न् सूर्यः प्रत्यहोरात्रमेकैकं त्रिंशदधिकाष्टादशश
तसंख्यभागसत्कं भागं वर्द्धनेनोजः प्रकाशमे भिवर्द्धयति। एतदेव व्याचष्टे। निष्क्रममाण इत्या
दि सुगमं नवरं दशभिरिति त्रिंशदधिकानाम॥ ष्टादशशतसंख्यानां नामेकं प्रत्यहोरात्रमेकैकं भागं ते
नाष्टते सर्वाभ्यन्तरमण्डले परिपूर्णतया त्रिंशतं मुहूर्तान् यावदवस्थितं सूर्यस्यौजः ततः परमनवस्थितमि
ति। एतदेवाविर्भावयितुं प्रश्नसूत्रमुपन्यस्यन्नाह॥ ता तंसि इत्यादि तत्र तः क्रामतः सूर्यादेरयं प्रश्नोऽनुपपत्ति
दर्शयति। प्रविशन् निवर्द्धयतीत्येतस्मिन् विषये कालादेः काऽनुपपत्तिरिति वदेत् भगवानाह ता जया णं इ ॥७३॥
त्यादि इदं जम्बूद्वीपवाक्यं पूर्ववत् परिपूर्णं पठनीयं व्याख्यानीयं च ता जया णं इत्यादि। तत्र यदा सूर्यः सर्वाभ्यं

न्तरमण्डलमुपसंक्रम्य चारं चरति तदा उत्तमकाष्ठाप्राप्त उत्कर्षकोऽष्टादशमुहूर्तो दिवसो भवति जघन्या द्वादश
मुहूर्ता रात्रिः। ततः सर्वाभ्यन्तरान्मण्डलाद् उक्तप्रकारेण निष्क्रामन् सूर्यो नवसंवत्सरमाददानो नवस्य संवत्सरस्य
प्रथमेऽहोरात्रे अभ्यन्तरानन्तरं द्वितीयमण्डलमुपसंक्रम्य चारं चरति। ता जया णं इत्यादि। तत्र यदा सर्वाभ्य
न्तरानन्तरं द्वितीयं मण्डलमुपसंक्रम्य चारं चरति तदा एकेन रात्रिंदिवेन सर्वाभ्यन्तरमण्डलगतेन प्रथमक्ष
णाद्धर्ववर्त्तिना एककलामात्रमेककलामात्रमवहाप्य ते नाहोरात्रपर्यन्ते एकस्मिन् भागे ओजः प्रकाशस्य दिवसार्द्ध
भागतस्य निर्वेष्ट्य हापयित्वा तमेव चैकं भा गं रजनिक्षेत्रस्याभिवर्द्धयित्वा चारं चरति। कियत्प्रमाणं
पुनस्तं भागं दिवसक्षेत्रगतस्य प्रकाश स्य हापयित्वा रजनिक्षेत्रस्य वर्द्धयित्वा तत आह मं
डलमष्टादशभिस्त्रिंशोत्तरैस्त्रिंशदधिकैः शतैः छित्त्वा किमुक्तं भवति। द्वितीयं मण्डलमष्टादशभिस्त्रिंशद
धिकैर्भागशतैर्विभज्यते तत्र एकं भागमि · ति। कस्मात्पुनर्मण्डलस्याष्टादशशतानि त्रिंशदधिकानि भा
गानां परिकल्प्यन्त इति चेत्। उच्यते एकैकं मण्डलं द्वाभ्यां सूर्याभ्यामेकेनाहोरात्रेण परिसमाप्यते। अहोरात्रश्च त्रिंश
न्मुहूर्तप्रमाणः प्रतिसूर्यं चाहोरात्रगणनया परमार्थतो द्वावहोरात्रौ भवतः। द्वयोश्चाहोरात्रयोः षष्टिर्मुहूर्ता भवन्ति
मण्डलं प्रथमतः षष्ट्या भागैर्विभज्यते। निष्क्रामतोऽपि च सूर्यस्य प्रत्यहोरात्रं प्रत्येकमेकैकस्मिन् मुहूर्ते एकषष्टिभागो हा
पयतः प्रविशतो वाभिवर्द्धयतः। योऽयं मुहूर्त्तैकषष्टिभागो भवति तावेकः सार्द्धत्रिंशत्तमो भागः॥ ततः॥

२ सूर्यप्र०वृ प्रविशन्निशाभागाः सार्द्धया त्रिंशता गुणिते जाता न्यष्टादशशतानि त्रिंशताधिकानि भागानां एवं निष्क्रामन् सूर्यः
त्ति॥७४ प्रतिमंडलं त्रिंशदधिकाष्टादशशतसंख्यातां भागानां संक्रमितकिं कालेनं दिवसक्षेत्रगतस्य प्रकाशस्य हाप
यन् रजनीक्षेत्रस्य च वर्द्धयन् तावत्क्रामति यावत्सर्वबाह्यमंडलं तत्र त्र्यधिकं भागशतं दिवसक्षेत्रग
तस्य प्रकाशस्य हापयित्वा रजनीक्षेत्रस्य च वर्द्धयित्वा चरति त्र्यधिकं च भागशतं अष्टादशशता
नां त्रिंशदधिकानां दशमो भागस्ततः सर्वाभ्यंतरान्मंडलात्सर्वबाह्यमंडले जंबूद्वीपचक्रवालं दशभाग
स्तु हीयते रजनीक्षेत्रस्य चाभिवर्द्धते इति यदु गतिस्तदपि समीचीनं जातमिति एवमभ्यंतरं प्रवि
शन् प्रतिमंडलमष्टादशशतभागानां त्रिंशदधिकानां संक्रमेणैकैकं भागमभिवर्द्धयन्ता
वत्क्रामति यावत्सर्वाभ्यंतरमंडलं तत्र त्र्यधिकं भागशतं दिवसक्षेत्रगतस्य प्रकाशस्याभिव
र्द्धयति रजनीक्षेत्रस्य च हापयति त्र्यधि कं च भागशतं जंबूद्वीपचक्रवालस्य दशमो भागस्ततः सर्वा
बाह्यान्मंडलात्सर्वाभ्यंतरे मंडले दिवसक्षेत्रगतस्य प्रकाशस्य एकादशमश्चक्रवालभागो वर्द्धते र
जनीक्षेत्रस्य च त्रुट्यतीति यत्प्रागवादि तदविरोधीति सूत्रं तत्र तयाणं अट्ठारसमुहुत्ते दिवसे इत्यादिकं स
कलमपि प्राग्वत्परिभावनीयं यावदागमानन्तराणां मतानामुपसंहाराय तत एवं सूर्यचारस्य प्रतिसूर्यं संवत्स
रं सूर्यसंवत्सरपर्यन्तं सर्वाभ्यंतरमंडले त्रिंशतं च मुहूर्त्तान् यावत्परिपूर्णमवस्थिता गाउस्सेता पश्चान्नावस्थिता सर्वा ७४

भ्यंतरे च मंडले त्रिंशतं मुहूर्त्तान् यावत्परिपूर्णमवस्थितमोजउप्याते एवं द्वारतो निरूप्यते पुनरप्य
पि प्रथमक्षणादूर्द्ध्वं नगर(?)ते रश्मी अमानमवस्थं प्रथमक्षणादूर्द्ध्वं सूर्यस्य सर्वावस्थितता ननु रश्मिर्द्वितीयमंडलानि
मुखं चारं चरणादिति ॥६॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां षष्ठप्राभृतं समाप्तं ॥६॥ त
देवमुक्तं षष्ठं प्राभृतं संप्रति सप्तममारभ्यते तस्य चायमर्थाधिकारः कस्ते मतेन भगवन् सूर्यं वरयतीति
ततस्तद्विषयप्रश्नसूत्रमाह ॥ ता कि ते वरए ॥ दि ता इति पूर्ववत् कोऽसौ ते तव मतेन भगवन् सूर्यं वरयति आव
रयतीर्द्दीशायामा पृथिव्यां प्रकाशकाव वत्तीकुर्वन् आख्यात इति वदेत् एवमुक्ते भगवानाह त
त्र विषये यावत्यः परतीर्थिकानां प्रतिप त्तयः सावतीः कथयति तत्थेत्यादि तत्र सूर्यप्रतिवर
णविषये खल्विमा विंशतिः प्रतिपत्तयः प्र ज्ञप्तास्तद्यथा तत्रैतेषां विंशतिपरतीर्थिकानां मध्ये ए
कः प्रथम एवमाह मंदरः पर्वतः सूर्यं वरय ति मंदरपर्वतो हि सूर्येण मंडलपरिभ्रम्यासवतः प्रकाश्य
ते ततः सूर्यप्रकाशकत्वेन वरयतीत्याख्यातः अत्रोपसंहारः एगे एवमाहंसु ॥१॥ एके पुनरेवमाहुः मे
रुपर्वतः सूर्यं वरयतीत्याख्यात इति वदेत् अत्राप्युपसंहारः एगे एवमाहंसु ॥२॥ एवमित्यादि एवमुक्तेन प्र
कारेण तावत्प्रतिपत्तिविषये प्रतिपत्तिवन्नावन्नेतव्यं यावत्पर्वतराजः पर्वतः सूर्यं वरयत्याख्यात इति वदे
त् एगे एवमाहंसु ॥ इति किमुक्तं भवति यथा प्राक् लेश्याप्रतिहतिविषये विंशतिप्रतिपत्तयायायनकं

भणितास्तेतत्क्रमेणैवापि वक्तव्याः ॥ सूत्रपाठोऽपि प्रथमप्राभृतवदिह गतपाठानुसारेणान्यूनातिरिक्तः सूत्रं परिभावनीयो
ग्रंथगौरवभयात्तु न लिख्यते ॥ तदेवमुक्ताः परतीर्थिकप्रतिपत्तयः संप्रति स्वमतमुपदर्शयति वयं पुण इ-
त्यादि वयं पुनरेवं वक्ष्यमाणप्रकारेण वदामस्तमेव प्रकारमाह ता मंदरवीत्यादि। ता इति पूर्ववत् या असौ कृत
सूर्यं वरयंत्याख्याताः समदरा पृष्टाता यावत्प्रवतरा ऽदृष्टाता यत इत प्रागेव भावितं ततो भिन्नभिन्नविषय
तया प्रवृत्ताः प्राक्तनाः प्रतिपत्तयः सर्वा अपि मि- थ्यारूपा अवगंतव्याः ॥ अपि च न केवलो मंदरः सूर्यं वरय
ति किं त्वन्येऽपि पुद्गला ये ग्राह्यास्ता इत्याह ता जेणं मे- इत्यादि। ता इति पूर्ववत् जेणं इति वाक्यालंकारे पुद्गला
मेरुगता अमेरुगता वा सूर्यालेश्यां स्पृ- शंति ते पुद्गलाः सूर्यप्रकाशकत्वेन सूर्यं वरयंति ईप्सितं
हि सूर्येण प्रकाश्यमानता ता लेश्यापृष्टाः पुद्गलै- ः सदृसंबंधात्परंपरया ते सूर्यं स्वीकुर्वंतीत्युच्यते। ये प्रका
श्यमानपुद्गलस्कंधास्तद्गता मेरुगता वा सूर्येण प्रकाशिता अपि सूक्ष्मत्वान्न वक्तुं स्पर्शमुपगच्छंतीति तेऽपि प्रत्यक्ष
पुद्गलाः सूर्यं वरयंति तथा ये चरमालेश्यातिरगताः सूत्रे चरमा लेश्या विशेषस्पर्शनात् पुद्गला अपि सूर्यं वरयंतीति एषा-
मपि छायायां प्रकाश्यमानत्वात् ॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां सप्तमं प्राभृतं समाप्तं ॥ ता-
तदेवमुक्तं सप्तमं प्राभृतं संप्रत्यष्टममारभ्यते तस्य चायमर्थाधिकारः कथं भगवन् उदयसंस्थितिः सूत्रे त्व-
या भगवानाख्याता इति ततस्तद्विषयमेव प्रश्नसूत्रमाह ता कहं ते इत्यादि। ता इति पूर्ववत् कथं केन प्रकारेण सूर्यस्योद ७५

---

दयसंस्थितिः सूत्रे त्वया भगवन्नाख्याता इति वदेत् ॥ एवमुक्ते भगवानेतद्विषया यावत्यः प्रतिपत्तयः सन्ति तावतीरुपद
र्शयति तत्थेत्यादि। तत्र तस्यामुदयसंस्थितौ विषये तिस्रः प्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्तास्तद्यथा
तत्रैतेषां त्रयाणां परतीर्थिकानां मध्ये एके प्रथमाः परतीर्थिका एवमाहुः ॥ ता जया णमित्यादि तत्र जया
णमिति वाक्यालंकारे जंबूद्वीपे द्वीपे दक्षिणार्द्धे अष्टादशमुहूर्त्तो दिवसो भवति तदा उत्तरार्द्धेऽप्यष्टा
अष्टादशमुहूर्त्तो दिवसः ॥ तदेवं दक्षिणार्द्धे निय- यमतो नात्र रात्रिनियमोऽभ्युक्तः संप्रति रात्रिनियमानंतरद
क्षिणार्द्धे नियमतमाह ता जया णमित्यादि य- यदा उत्तरार्द्धे अष्टादशमुहूर्त्तो दिवसो भवति तदा दक्षि
णार्द्धेऽप्यष्टादशमुहूर्त्तो दिवसः ॥ ता जया- णमित्यादि यदा जंबूद्वीपे द्वीपे दक्षिणार्द्धे सप्तदशमु
हूर्त्तो दिवसो भवति तदा उत्तरार्द्धेऽपि सप्तदश- मुहूर्त्तो दिवसो भवति तदा दक्षिणार्द्धेऽपि सप्तदशमुहू
व र्त्तो दिवसः एवमित्यादि एवमुक्तेन प्रकारेण एकै- कैकमुहूर्त्तहान्या परिहान्या परिहातव्यापारस्तानि मिवक्रं
मेण द्रष्टव्यास्ताः प्रथमं तदुक्तप्रकारेण षोडशमुहूर्त्तो दिवसो वक्तव्यः ॥ तदनंतरं पंचदशमुहूर्त्तस्ततश्चतुर्द
शमुहूर्त्तस्ततस्त्रयोदशमुहूर्त्तः सूत्रपाठोऽपि प्रागुक्तसूत्रानुसारेण स्वयं परिभावनीयः ॥ सा चैवं जया णं जंबु
द्दीवे दीवे दाहिणड्ढे सोलसमुहुत्ते दिवसे भवइ तया णं उत्तरड्ढे वि सोलसमुहुत्ते दिवसे भवइ जया णं
उत्तरड्ढे सोलसमुहुत्ते दिवसे भवइ तया णं दाहिणड्ढे वि सोलसमुहुत्ते दिवसे भवइ इत्यादि ॥ द्वादशमुहू

र्त्तो दिवस इति पादकसूत्रं साक्षादाह ता जया णमित्यादि । ता इति तत्र यदा जंबूद्वीपे द्वीपे दक्षिणार्द्धे अष्टादशमुहूर्त्तो दिवसो भवति । तदा उत्तरार्द्धेऽपि अष्टादशमुहूर्त्तो दिवसो यदा उत्तरार्द्धे अष्टादशमुहूर्त्तो दिवसस्तदा दक्षिणार्द्धेऽपि अष्टादशमुहूर्त्तो दिवसः कालः । जंबूद्वीपे मंदरस्य पर्वतस्य पूर्वस्यामपरस्यां च दिशि सदा सर्वकालं पंचदशमुहूर्त्तो दिवसो भवति सदैव च पंचदशमुहूर्त्ता रात्रिः कुत इत्याह अवस्थितानि सकलकालमेकप्रमाणानि णमिति वाक्यालंकारे तत्र मंदरस्य पर्वतस्य पूर्वस्यामपरस्यां च दिशि रात्रिंदिवानि प्रज्ञप्तानि हे श्रमण हे आयुष्मन् अत्र प्रथमानां परतीर्थिकानां मूलभूतस्य शिष्यस्य प्रत्यामंत्रणवाक्यमेतत् । ता उपसंहारमाह एगे एवमाहंसु एके एवमाहुः । यदा जंबूद्वीपे द्वीपे दक्षिणार्द्धे अष्टादशमुहूर्त्तानंतरो अष्टादशभ्यो मुहूर्त्तेभ्योऽनंतरो मनाक् हीनो हीनतरो वा यावत् सप्तदशमुहूर्त्तेभ्यः किंचित् समधिकप्रमाणो दिवसो भवति तदा उत्तरार्द्धेऽपि अष्टादशमुहूर्त्तानंतरो दिवसो भवति । यदा उत्तरार्द्धे अष्टादशमुहूर्त्तानंतरो दिवसो भवति तदा दक्षिणार्द्धेऽपि अष्टादशमुहूर्त्तानंतरो दिवसः । तथा यदा जंबूद्वीपे दक्षिणार्द्धे सप्तदशमुहूर्त्तानंतरो दिवसो भवति तदा उत्तरार्द्धेऽपि सप्तदशमुहूर्त्तानंतरो दिवसो यदा उत्तरार्द्धेऽपि सप्तदशमुहूर्त्तानंतरो दिवसस्तदा दक्षिणार्द्धेऽपि सप्तदशमुहूर्त्तानंतरो दिवसः । एवमित्यादि । एवमुक्तेन प्रकारेण एकैकमुहूर्त्तहान्या परिहातव्यं परिहानिप्रकारमेवाह सोलसेत्यादि प्रथमतः षोडशमुहूर्त्तानंतरो दिवसो वक्तव्यः । ततः पंचदशमुहूर्त्तानंतरस्तद 

नंतरश्चतुर्दशमुहूर्त्तानंतरस्ततस्त्रयोदशमुहूर्त्तानंतरः । एतेषां हि मतेन न कदाचनापि परिपूर्णमुहूर्त्तप्रमाणो दिवसो भवति । ततः सर्वत्रानंतरशब्दप्रयोगः अष्टादशमुहूर्त्तानंतरं सूत्रं साक्षाद्दर्शयति । ता जया णमित्यादि तत्र यदा जंबूद्वीपे दक्षिणार्द्धे अष्टादशमुहूर्त्तानंतरो दिवसस्तदा उत्तरार्द्धेऽपि अष्टादशमुहूर्त्तानंतरो दिवसः । यदा चोत्तरार्द्धे अष्टादशमुहूर्त्तानंतरो दिवसस्तदा दक्षिणार्द्धेऽपि अष्टादशमुहूर्त्तानंतरो दिवसः । तदा चाष्टादशमुहूर्त्तानंतरादिदिवसकाले जंबूद्वीपे मंदरस्य पर्वतस्य पूर्वस्यामपरस्यां दिशि नो नैव सदा सर्वकालं पंचदशमुहूर्त्तो दिवसो भवति । नापि सदा पंचदशमुहूर्त्ता रात्रिः कुत इत्याह अणवट्ठिया णमित्यादि अनवस्थितानि अनियतप्रमाणानि णमिति खलु तत्र मंदरस्य पर्वतस्य पूर्वस्यामपरस्यां च दिशि रात्रिंदिवानि प्रज्ञप्तानि हे श्रमण हे आयुष्मन् । ता उपसंहारमाह एगे एवमाहंसु । एके पुनरेवमाहुः । ता इति पूर्ववत् जंबूद्वीपे यदा दक्षिणार्द्धे अष्टादशमुहूर्त्तो दिवसो भवति तदा उत्तरार्द्धे द्वादशमुहूर्त्ता रात्रिः । यदा चोत्तरार्द्धे अष्टादशमुहूर्त्तो भवति तदा दक्षिणार्द्धे द्वादशमुहूर्त्ता रात्रिः । तथा यदा दक्षिणार्द्धे अट्ठारसमुहुत्ताणंतरे त्ति अष्टादशभ्यो मुहूर्त्तेभ्योऽनंतरो मनाक् हीनो हीनतरो यावत् सप्तदशभ्यो मुहूर्त्तेभ्यः किंचिदधिकप्रमाणो दिवसो भवति तदा उत्तरार्द्धे द्वादशमुहूर्त्ता रात्रिः । यदा चोत्तरार्द्धे अष्टादशमुहूर्त्तानंतरो दिवसस्तदा दक्षिणार्द्धे द्वादशमुहूर्त्ता रात्रिः । एवमित्यादि एवमुक्तेन प्रकारेण तावद्वक्तव्यं यावत् त्रयोदशमुहूर्त्तानंतरो दिवसो वक्तव्यः । एकैकस्मिंश्च सप्तदशादिके संख्या

सूर्यप्रज्ञप्ति विशेषसमकाले मुहूर्त्तैरंतरेऽत्र किं विवक्षितो येनायमालापकः प्रवृत्तो उच्यते सर्वत्र द्वादशमुहूर्त्ता रात्रिः । तथा च जया
॥७७ णं जंबुद्दीवे दीवे दाहिणड्ढे सत्तरसमुहुत्ते दिवसे भवइ तया णं उत्तरड्ढे दुवालसमुहुत्ता राई भवइ जया णं उत्तरड्ढे
सत्तरसमुहुत्ते दिवसे भवइ तया णं दाहिणड्ढे दुवालसमुहुत्ता राई भवइ जया णं जंबुद्दीवे दीवे दाहिणड्ढे सत्तरसमु
हुत्ताणंतरे दिवसे भवइ तया णं उत्तरड्ढे दुवालसमुहुत्ता राई जया णं उत्तरड्ढे सत्तरसमुहुत्ताणंतरे दिवसे भवइ त
या णं दाहिणड्ढे दुवालसमुहुत्ता राई भवइ एवं । षोडशमुहूर्त्तानंतरपंचदशमुहूर्त्तपंचदशमुहूर्त्तानंतरचतुर्द
शमुहूर्त्तचतुर्दशमुहूर्त्तानंतरत्रयोदशमुहूर्त्त त्रयोदशमुहूर्त्तानंतरद्वादशमुहूर्त्तेष्वपि वक्तव्या आलाप
का वक्तव्याः द्वादशमुहूर्त्तानंतरं चत्वा लापकं साक्षादाह । जया णमित्यादि यदा जंबूद्वीपे द्वी
पे दक्षिणार्द्धे द्वादशमुहूर्त्तानंतरो दिवसो भ वति तदोत्तरार्द्धे द्वादशमुहूर्त्ता रात्रिर्भवति यदा चोत्तरार्द्धे
द्वादशमुहूर्त्तानंतरो दिवसो भवति तदा दक्षि णार्द्धे द्वादशमुहूर्त्ता रात्रिः यदा चाष्टादशमुहूर्त्तानंतरो दिवसः का
ले जंबूद्वीपे द्वीपे मंदरस्य पर्वतस्य पूर्वस्मिन् पश्चिमे णं तत्पूर्वस्यां पश्चिमायां च दाशानवस्थितं तत्र पंचदश
मुहूर्त्तो दिवसो भवति नाप्यस्य तत्र यथापि चतुर्दशमुहूर्त्ता रात्रिर्भवतीति । अत एवाह । जया णं दाहिणड्ढे णमित्यादि व्याख्या छि
त्ता निणमिति खलु तत्र मंदरस्य पर्वतस्य पूर्वस्यां पश्चिमायां च अष्टादशादीनि दिवाप्रमाणानि दिवसमणद्यायुष्यवेक्ष्य वे ७७
वोपसंहारमाह । एगे एवमाहंसु ॥ एते प्रतिपत्ती सापि प्रतिपत्तयो मिथ्यारूपा भगवतोऽनभिमतत्वात् अपि चायं तथा

मे वादिनः सा देवरात्रिश्च द्वादशमुहूर्त्तप्रमाणा नित्यावस्थितिं प्रत्यक्षविरोधः ॥ प्रत्यक्षत एव हीनाधिकत्वच्छायाया रात्रेरुपल
भ्यमानत्वात् ॥ ८ ॥ संप्रति स्वमतं भगवानुपदर्शयति ॥ ८ ॥ वयं पुण इत्यादि वयं पुनरेवं वक्ष्यमाणेन प्रकारेण व
दामः स्वमतमेव प्रकारमाह । ता जंबुद्दीवे दीवे इत्यादि । ता इति पूर्ववत् । जंबूद्वीपे द्वीपे सूर्यौ यथायोगं मंडलपरिभ्रम्या
समंततो मेरोरुदक्प्राच्यामुत्तरपूर्वस्यां दिशि उद्गच्छतः । तत्र चोद्गत्य प्राग्दक्षिणस्यां दक्षिणपूर्वस्यामागच्छतः । ततो
नपरो दिक्षु त्रापि दृत्य प्राग्दक्षिणस्यां दक्षि णपूर्वस्यामुद्गत्य दाक्षिणात्यां दक्षिणापरस्यामागच्छतः सूत्रा
पि वदक्षिणापरस्यामपरविदिक्ष्वाहत्रापि द यामुद्गत्याप्युदीच्यामपरोत्तरस्यामागच्छतस्तत्रापि वापरोत्त
रस्यामैरावतादिक्षेत्रापेक्षयोद्गत्योद क्प्राच्यामुत्तरपूर्वस्यामागच्छतः । एवं तावत्सामान्यतो द्व
योरपि सूर्ययोरुदयविधिरुपदर्शितो विशेषत ॥ पुनरयं यदैकः सूर्यः पूर्वदक्षिणस्यामुद्गच्छति तदाऽपरो
ऽपरोत्तरस्यां दिशि समुद्गच्छति । दक्षिणपूर्वस्यां तत्र सूर्यः पुरस्तादीविक्षेत्राणि मेरुदक्षिणादपूर्वाणि मंडल
स्य परिक्षिमन् प्रकाशयति । अपरो अपरोत्तरस्यामुद्गतः स च तत ऊर्ध्वं मंडलपरिक्षिप्तस्य परिक्षिमन् ऐरावतादीनि
क्षेत्राणि मिश्राणि मेरोरुत्तरादपूर्वाणि प्रकाशयति । भारतश्च सूर्यो दक्षिणापरस्यामागतः सन्नपरविदेहाक्षे
मा त्रापेक्षया उदयं साधयति । ऐरावतः सूर्य उत्तरपूर्वस्यामागतः पूर्वविदेहापेक्षया समुद्गच्छति ततो दक्षि
णापरस्यामुद्गतः सन् तत ऊर्ध्वं मंडलस्य परिक्षिमन् अपरविदेहान् प्रकाशयति उत्तरपूर्वस्यामुद्गतस्तत

ऊर्ध्वं मंडलगत्या चरन् पूर्वविदेहानवभासयति तत एष पूर्वविदेहप्रकाशकोऽन्यो दक्षिणपूर्वस्यां चरन् तां दिशमपेक्ष्यो-
दयमासादयति। अपरविदेहप्रकाशकश्चापरो भरतस्येति। तादेवं जंबूद्वीपे सूर्ययोरुदयविधिरुक्तः संप्रति तद्वि-
भागेन दिवसरात्रिविभागमाह। ता जया णमित्यादि। तत्र यदा णमिति वाक्यालंकारे जंबूद्वीपे द्वीपे दक्षिणार्द्धे दिव-
सो भवति तदा उत्तरार्द्धेऽपि दिवसो भवति एकस्य सूर्यस्य दक्षिणदिशि परिभ्रमणसंभवादपरस्य सूर्यस्यावश्य-
मुत्तरदिशि परिभ्रमणसंभवात्। यदा चोत्तरार्द्धे दिवसस्तदा जंबूद्वीपे द्वीपे मंदरस्य पर्वतस्य पुरच्छिमपच्चच्छिमेणं
ति पूर्वस्यामपरस्यां च दिशि रात्रिर्भवति। तदानीमेकस्यापि सूर्यस्य तत्राभावात्। ता जया णमित्यादि। तत्र
यदा जंबूद्वीपे मंदरस्य पर्वतस्य पूर्वस्यां दिशि दिवसो भवति तदा पश्चिमायामपि दिशि दिवसो भ-
वति एकस्य सूर्यस्य पूर्वदिग्भागे संभवादपरस्य सूर्यस्यावश्यमपरस्यां दिशि संभवात्। एतच्च प्रागेव भावितं
यदा च पश्चिमायामपि दिशि दिवसो भवति तदा जंबूद्वीपे द्वीपे मंदरस्य पर्वतस्य उत्तरदाहिणेणं ति उत्तरतो दक्षि-
णतश्च रात्रिर्भवति। ता जया णमित्यादि। तत्र यदा णमिति प्राग्वत् जंबूद्वीपे दक्षिणार्द्धे उत्कर्षक उत्कृष्टोऽष्टादशमुहूर्त-
प्रमाणो दिवसो भवति तदा उत्तरार्द्धेऽपि उत्कृष्टोऽष्टादशमुहूर्तोऽष्टादशमुहूर्तप्रमाणो दिवसः। उत्कृष्टोऽष्टादश-
मुहूर्त्तप्रमाणो दिवसः सर्वाभ्यंतरमंडलचारित्वे च यदैकः सूर्यः सर्वाभ्यंतरमंडलचारी भवति तदा अपरोऽप्यवश्यं त-
त्रैवायातत्वेन सर्वाभ्यंतरमंडलचारी भवति। तदा दक्षिणार्द्धे उत्कृष्टदिवससंभवादुत्तरार्द्धेऽप्युत्कृष्टदिवससंभव ७८

दा उत्तरार्द्धे उत्कृष्टोऽष्टादशमुहूर्त्तप्रमाणो दिवसो भवति तदा जंबूद्वीपे द्वीपे मंदरस्य पर्वतस्य पुरच्छिमपच्चच्छिमे-
णं ति पूर्वस्यामपरस्यां च दिशि जघन्या द्वादशमुहूर्त्ता रात्रिर्भवति। सर्वाभ्यंतरमंडले चारं चरतोः सूर्ययोः सर्वदा-
पि रात्रेर्द्वादशमुहूर्त्तप्रमाणाया एव भावात्। ता जया णमित्यादि। तत्र यदा जंबूद्वीपे द्वीपे मंदरस्य पर्वतस्य पू-
र्वस्यां दिशि उत्कर्षक उत्कृष्टोऽष्टादशमुहूर्त्तो दिवसो भवति तदा मंदरपर्वतस्य पश्चिमायामपि दिशि उत्कृष्टोऽष्टा-
दशमुहूर्त्तो दिवसः। कारणं दक्षिणोत्तरार्द्धगतं प्रागुक्तमनुसरणीयं। यदा च मंदरपर्वतस्य पश्चिमायामपि दि-
शि उत्कृष्टोऽष्टादशमुहूर्त्तो दिवसो भवति तदा जंबूद्वीपे द्वीपे मंदरस्य पर्वतस्य उत्तरदाहिणेणं ति उत्तरतो
दक्षिणतश्च जघन्या द्वादशमुहूर्त्ता रात्रिः। अत्रापि कारणं पूर्वपश्चिमार्द्धरात्रिगतं प्रागुक्तमनुसरणीयं
एवं मित्यादि एवमुक्तेन प्रकारेण एतेनानंतरोदितेन गमेनालापकगमेन वक्ष्यमाणमपि नेतव्यं
किं तद्वक्ष्यमाणमित्याह। अट्ठारसमुहुत्ताणंतरं इत्यादि। यदा मंदरस्य पर्वतस्य दक्षिणोत्तरार्द्धयोः पूर्वपश्चिम-
योर्वा अष्टादशमुहूर्त्तानंतरः समनंतरः स्यादष्टादशमुहूर्त्तस्योपरि किंचिद्विहीनाष्टादशमुहूर्त्तप्रमाणो दिवसस्तदा पूर्वप-
श्चिमयोर्दक्षिणोत्तरार्द्धयोर्वा सातिरेकद्वादशमुहूर्त्ता रात्रिर्भवतीति। एवं शेषाण्यपि पदानि भावनीयानि सू-
त्रपाठोऽपि शुद्धालापकगमानुसारेण सूर्यपरिभावनीयः। स चैवं ता जया णं जंबुद्दीवे दीवे दाहिणद्धे अट्ठारस-
मुहुत्ताणंतरे दिवसे हवइ तया णं उत्तरद्धे वि अट्ठारसमुहुत्ताणंतरे दिवसे भवइ। जया णं उत्तरद्धे अट्ठारसमुहु-

सूर्यप्र०वृत्ति
७७

नाणंतरे दिवसे भवइ तया णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरच्छिमपच्चच्छिमेणं सातिरेगदुवालसमुहुत्ता राई भवइ ता
जया णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरच्छिमे णं अट्ठारसमुहुत्ताणंतरे दिवसे भवइ तया णं पच्चच्छिमे णं अट्ठारस
मुहुत्ताणंतरे दिवसे भवइ जया णं पच्चच्छिमे णं वि अट्ठारसमुहुत्ताणंतरे दिवसे भवइ तया णं जंबुद्दीवे दीवे मंद
रस्स पव्वयस्स उत्तरदाहिणेणं साइरेगदुवालसमुहुत्ता राई भवइ एवं सप्तदशमुहूर्त्तादिदिवसादिप्रतिपादका अपि
सूत्रालापका भावनीयाः ता जया णमित्यादि तत्र यदा जंबूद्वीपे द्वीपे दक्षिणार्द्धे वर्षाणां वर्षाकालस्य प्रथमः समय
ः प्रतिपद्यते भवति तदा उत्तरार्द्धेऽपि वर्षाणां प्रथ मः समयो भवति समकालतयेत्वेन दक्षिणार्द्धोत्तरार्द्धे
सूर्ययोश्चारभावात् यदा चोत्तरार्द्धे वर्षा कालस्य प्रथमः समयो भवति तदा जंबूद्वीपे द्वीपे मंद
रस्य पर्वतस्य पुरच्छिमपच्चच्छिमेणं ति पूर्वस्यां मपरस्यां च दिशि अणंतरपुरक्खडंसि अनंतरमव्यवधानेन पु
रः कृतः अग्रे कृतः यः सोऽनंतरपुरस्कृतः तस्मिन्नंतरं तीय इत्यर्थः तस्मिन् काले समयसि समयः संकेतादिरपि भ
वति ततस्तद्व्यवच्छेदार्थं कालग्रहणं कालश्चासौ समयश्च कालसमयस्तत्र वर्षाकालस्य प्रथमः समयः प्रतिपद्यते
भवति यस्मिन् समये दक्षिणोत्तरार्द्धयोर्वर्षाकालस्य प्रथमः समयो भवति तस्मादूर्ध्वमनंतरवर्तिनि समय
ये पूर्वपश्चिमयोर्वर्षाकालस्य प्रथमः समयो भवति ता जया णमित्यादि तत्र यदा णमिति प्राग्वत् जंबूद्वीपे द्वीपे
मंदरस्य पर्वतस्य पूर्वस्यां दिशि वर्षाकालस्य प्रथमः समयो भवति तदा मंदरस्य पर्वतस्य पश्चिमायामपि दिशि ७७

वर्षाकालस्य प्रथमः समयो भवति समकालतया नयत्वेन पूर्वपश्चिमयोरपि सूर्ययोश्चारचरणात् यदा च पश्चि
मायामपि दिशि वर्षाकालस्य प्रथमः समयो भवति समकालतयत्वेन पूर्वपश्चिमयोरपि सूर्ययोश्चारचरणा
त् यदा च पश्चिमायामपि दिशि वर्षाकालस्य प्रथमः समयो भवति तदा जंबूद्वीपे द्वीपे मंदरस्य पर्वतस्य उत्तरद
क्षिणेणं ति उत्तरतो दक्षिणतश्च अनंतरमव्यवधानेन पश्चात्कृतोऽनंतरपश्चात्कृतः तस्मिन् कालसमये वर्षाका
लस्य प्रथमः समयः प्रतिपन्नो भवति अतीत इत्यर्थः इह यस्मिन् समये दक्षिणार्द्धोत्तरार्द्धे वर्षाकालस्य प्र
थमः समयो भवति तदनंतरमग्रेतने द्वितीये समये पूर्वपश्चिमयोर्वर्षाणां प्रथमः समयो भवतीत्य
तावन्मात्राकालेऽपि यस्मिन् समये पूर्वप श्चिमयोर्वर्षाकालस्य प्रथमः समयो भवति ततोऽनंतरे
पश्चाद्भाविनि समये दक्षिणोत्तरार्द्धयोर्वर्षा कालस्य प्रथमः समयो भवति इति गम्यते तत्किमर्थमस्या
पदानं उच्यते इह क्रमाक्रमाभ्यामभिहितार्थ स्वपंचितं ज्ञानं शिष्याणाममतिसुनिश्चितं भवति ततस्तेषा
मनुग्रहाय तदुक्तमित्यादोषः जहा समय इत्यादि यथा समय उक्तः तथा आवलिका प्राणापानौ स्तोको लवो
मुहूर्त्तमहोरात्रः पक्षो मासः ऋतुश्च प्रावृडादिरूपो वक्तव्यः एवं च समयगतमालापकमादिं कृत्वा दशआ
लापका भवंति ते च समयगतालापकरीत्या स्वयं परिभावनीयाः सुगमाश्च जया णं जंबुद्दीवे दीवे वासाणं
पढमा आवलिया पडिवज्जइ तया णं उत्तरड्ढे वि वासाणं पढमा आवलिया पडिवज्जइ तया णं उत्तरड्ढे वि वासा

१ सूर्यप्र० वृ० णं पढमा आवलिया पडिवज्जइ तया णं उत्तरड्ढे वि वासाणं पढमा आवलिया पडिवज्जइ। जया णं जंबुद्दीवे दीवे मं-
१८७ दरस्स पव्वयस्स पुरत्थिमपच्चत्थिमे णं अणंतरपुरक्खडकालसमयंसि वासाणं पढमा आवलिया पडिवज्जइ त-
या णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरत्थिमे णं वासाणं पढमा आवलिया पडिवज्जइ। तया णं पच्चत्थिमे-
णं पढमा आवलिया पडिवज्जइ। जया णं पच्चत्थिमे णं वासाणं पढमा आवलिया पडिवज्जइ तया णं जंबुद्दी-
वे दीवे मंदरस्स पव्वयस्स उत्तरदाहिणेणं अणं तरपच्छाकडकालसमयंसि वासाणं पढमा आवलिया प-
डिवन्ना भवइ। इह च प्राग्वद्व्याख्यातव्या तु सा त णव्याख्यानं नवरम् आवलिया पडिवज्जइत्ति आवलिका प्र-
तिपद्यते। शेषं तथैव एवं प्राणापाना दिकाअप्यालापका भणनीयाः। प्राणापानादि यथा व-
र्षाणां वर्षाकालस्य प्रतिपादितास्स मयादिगता अत्र आलापका भणिताः एवं हेमंताणं ति-
शीतकालस्य गिम्हाणं ति ग्रीष्मकालस्यापि। कालस्य प्रत्येकं समयादिगता दश दश आलापका भ-
णितव्याः। अयनगतं त्वालापकं साक्षात्पठति। जया णं इत्यादि सुगमं। जहा अयणे इत्यादि यथा अयने
शतवर्ष०२ आलापको भणितस्तथा संवत्सरयुगमाणे स्वरूपे वं जा दिसंवत्सरं पंचकात्मके वर्षशते वर्षसहस्रे वर्षशतसहस्रे पू-
र्वांगे पूर्वे एवं यावच्छीर्षप्रहेलिकायामपि। अत्र एवं व्याकरणात् सूत्रपातः आलापनिदृश्यानि। तुडियंगे तुडिए
अडडंगे अडडे। अववंगे अववे। हूहूयंगे। हूहूए। उप्पलंगे उप्पले। पउमंगे पउमे। नलिणंगे नलिणे। अत्थ- ८०

णिउरंगे अत्थणिउरे अउयंगे अउए नउयंगे नउए पउयंगे पउए चूलियंगे चूलिया सीसपहेलियंगे इति। अत्र चतुरशीति व-
र्षलक्षाणि एकं पूर्वांगं चतुरशीतिपूर्वांगलक्षाणि एकं पूर्वम् एवं पूर्वः पूर्वराशिश्चतुरशीतिलक्षैर्गुणितः उत्तरो-
त्तरो राशिर्भवति यावच्चतुरशीतिशीर्षप्रहेलिकांगलक्षाणि एका शीर्षप्रहेलिका। एतावता राशिना गणितविषया
तत्क्षयेण नातः सर्वं पल्योपमादिः। पलिउवमसागरोवमा अनाद्याः स्वरूपं संग्रहणिटीकायामुक्ता आलो-
पकास्तु स्वयं वक्तव्याः। अवसप्पिणी उस्सप्पिणी विषं यमालापकं साक्षादाह जया णं इत्यादि यदा जंबू-
द्वीपे द्वीपे मंदरस्य पर्वतस्य दक्षिणार्धे अवसर्पि णी प्रतिपद्यते परिपूर्णा भवति। तदा उत्तरार्धेऽपि अवसर्पि-
णी प्रतिपद्यते यदा उत्तरार्धेऽपि अवसर्पि णी प्रतिपद्यते तदा जंबूद्वीपे द्वीपे मंदरस्य पर्वतस्य पू-
र्वस्यापरस्यां च दिशि नैवास्त्यवसर्पिणी ना प्युत्सर्पिणी। कुत इत्याह। अवस्थितो णं इति खलु त-
त्र पूर्वस्यामपरस्यां च दिशि कालः प्रज्ञप्तो मया शेषैश्च तीर्थकरैः हे श्रमण आयुष्मन्। एतेन तत्रावसर्पिण्युत्स-
र्पिण्योरभावः। एवं उस्सप्पिणी वि। एवमुक्तेन प्रकारेणोत्सर्पिण्यपि उत्सर्पिण्यालापको वक्तव्यः। सा च
एवं जया णं जंबुद्दीवे दीवे दाहिणड्ढे पढमा उस्सप्पिणी पडिवज्जइ। तया णं उत्तरड्ढे वि। पढमा उस्सप्पिणी
पडिवज्जइ जया णं उत्तरड्ढे वि पढमा उस्सप्पिणी पडिवज्जइ तया णं जंबुद्दीवे दीवे मंदरस्स पव्वयस्स पुरत्थिमपच्चत्थिमे णं ने-
वत्थि उस्सप्पिणी नेवत्थि अवसप्पिणी अवट्ठिए णं तत्थ काले पन्नत्ते समणाउसो। तदेवं जंबूद्वीपवक्तव्यता

क्षाः संप्रति लवणसमुद्रवक्तव्यतामाह । ता लवणेणं समुद्दे इत्यादि । सुगमं । नवरं यथा जंबूद्वीपे सर्वविषयेष्वालाप
कास्तथात्रापि वक्तव्याः । स चैवं । लवणेणं समुद्दे सूरिया उदीणपाईणमुग्गच्छ पाईणदाहिणमागच्छंति । पा
ईणदाहिणमुग्गच्छ दाहिणपाईणमागच्छंति । पईणउदीणमुग्गच्छ उदीणपाईणमागच्छंति । इदं चा
सूत्रं जंबूद्वीपगताः समसूत्रवत् । सूर्यपरिभावनीयं । नवरमत्र सूर्याश्चत्वारो वक्तव्याः । चत्वारि य सागरे ल
वणे इति वचनात् । तत्र जंबूद्वीपगतसूर्यस्य सह समश्रेण्या प्रतिबद्धस्तथाह्येकः सूर्यो विकल्प जंबूद्वीपगत
सूर्यस्य सह समश्रेण्या प्रतिबद्धस्तथा ॥ द्वौ सूर्यावेकस्य जंबूद्वीपगतस्य सूर्यस्य श्रेण्या प्रतिबद्धौ
द्वौ द्वितीयस्य जंबूद्वीपगतस्य सूर्यस्य । तत्र यदैकः सूर्यो जंबूद्वीपे दक्षिणपूर्वस्यामुद्गच्छति । तदा त
त्समश्रेण्या प्रतिबद्धौ द्वौ सूर्यौ लवणसमुद्रे तस्यामेव दक्षिणपूर्वस्यामुदयमागच्छतः । यदैव जंबूद्वीप
गतेन सूर्येण सह समश्रेण्या प्रतिबद्धौ यतो लवणसमुद्रे तस्यां दिशि उदयमासादयतः ।
तत उदयविधिरपि द्वयोर्द्वयोः सूर्ययोर्जंबूद्वीपसूर्ययोरिव भावनीयः । ततो दिवसरात्रिविभागोऽपि क्षेत्रवि
भागेन तथैव द्रष्टव्यः । तथा दाह । ता जयाणं इत्यादि सुगमं । नवरं जहा जंबुद्दीवे दीवे इत्यादि यथा जंबूद्वी
पे द्वीपे प्रथमपद्मे णं तालवत्यादिकं सूत्रमुक्तं यावदुस्सप्पिणी आलापकस्तथा लवणस
मुद्रेऽप्यन्यूनातिरिक्तं समस्तं भणितव्यं । नवरं जंबूद्वीपे द्वीपे इत्यस्य स्थाने लवणसमुद्रे इति वक्तव्यमिति विशेष



तादेव लवणसमुद्रगतापि वक्तव्यतोक्ता । संप्रति धातकीखंडविषयां तामाह । ता धायइसंडेणं सूरिया इत्यादि अ
त्राप्युद्गमविधिः प्राग्वद्भावनीयो नवरमत्र सूर्या द्वादश । धायइसंडे दीवे बारस चंदा य सूरा य इति वचनात् । तत्र ष
ट् सूर्या दक्षिणदिक्चारिणो जंबूद्वीपगतलवणसमुद्रगतैः सूर्यैः सह समश्रेण्या प्रतिबद्धाः षट् उत्तरदिक्चारिणः
संप्रत्यत्रापि क्षेत्रविभागेन दिवसरात्रिविभागमाह । ता जयाणं इत्यादि । यदा धातकीखंडे द्वीपे दक्षिणार्धे
दिवसो भवति तदा उत्तरार्धेऽपि दिवसो भवति । यदा उत्तरार्धेऽपि दिवसो भवति तदा उत्तरार्धेऽपि दिवसस्तदा धा
तकीखंडे मंदरयोः पर्वतयोः पूर्वपश्चि ॥ मार्धगतयोः प्रत्येकं पूर्वस्यामपरस्यां च दिशि रात्रिर्भवति
एवमित्यादि । एवमुक्तेन प्रकारेण यथा । जंबूद्वीपे उक्तं तथैवात्रापि वक्तव्यं । तच्च तावद्यावदुस्सप्पि
णी आलापकः ॥ ता कालोए इत्यादि । कालोदे । समुद्रे यथा लवणेऽभिहितं तथैवाभिधातव्यं । नवरं कालो
दे सूर्या द्विचत्वारिंशत् । तत्रैकविंशतिर्दक्षिणदि क्चारिणो जंबूद्वीपलवणसमुद्रधातकीखंडगतैः सह समश्रेण्या
संबद्धा एकविंशतिरुत्तरदिक्चारिणः । तत उदयविधिर्दिवसरात्रिविभागश्च क्षेत्रविभागेन तथैव वक्तव्यः ॥
सांप्रतमभ्यंतरपुष्करवरार्धवक्तव्यतामाह । ता अब्भिंतरपुक्खरद्धे इत्यादि । इदमपि सूत्रं सुगमं । तदपि तथै
व जंबूद्वीपवद्वक्तव्यं । नवरमत्र सूर्या द्वासप्ततिः । तत्र षट्त्रिंशद्दक्षिणदिक्चारिणो जंबूद्वीपादिगतैः सह समश्रे
ण्या प्रतिबद्धाः षट्त्रिंशदुत्तरदिक्चारिणः । तत उदयविधिर्दिवसरात्रिविभागश्च क्षेत्रविभागेन प्राग्वदवसेयस्तथा

सूर्यप्र० वृत्ति ८२ च्चाह ॥ ७ ॥ ता जयणमित्यादि सुगमं ॥ ८ ॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायामष्टमं प्राभृतं समा
प्तं ॥ ८ ॥ तदेवमुक्तमष्टमं प्राभृतं संप्रति नवममारभ्यते तस्य चायमर्थाधिकारः कतिकाष्ठां पौरुषीं छायां निर्वर्तयतीति त
द्विषयं प्रश्नसूत्रमाह । ता कइकट्ठं ते इत्यादि पूर्ववत् कति किंप्रमाणा काष्ठा प्रकर्षो यस्याः सा कतिकाष्ठा तां
कतिकाष्ठां किंप्रमाणामित्यर्थः सूर्यः पौरुषीं पुरुषः प्रमाणमस्याः पौरुषी तां पौरुषीं छायां निर्वर्तयति निर्वर्त
यन्नाख्यात इति वदेत् । किंप्रमाणां पौरुषीं छायां यावत्यादयवस्थायां सम्यक् वर्त्तयन्नाख्यात इति वदेदिति
संक्षेपार्थः एवं प्रश्ने कृते भगवानेतद्विषये यावत्यः प्रतिपत्तयः संवित्तिरूपं दर्शयति ॥ ८ ॥ तत्थ
इत्यादि तत्र तस्याः पौरुष्याश्छायायाः प्रमाणचिंतायां प्रथमं तस्मादेव दिमासपाकविस्वरूप
विषयाः स्वल्पतिम्नः प्रतिपत्तयः प्रज्ञप्ताः यथा तत्र तेषां त्रयाणां परतीर्थिकानां मध्ये एके एवमा
हुः ॥ ता जेणमित्यादि ता इति पूर्ववत् जेणमिति वाक्यालंकारे पुद्गलाः सूर्यस्य लेश्यां स्पृशं
ति ते पुद्गलाः सूर्यलेश्यां संस्पृशंतः संतप्यंते संतापमनुभवंति संतप्यंत इति कर्मकर्तरि प्रयोगः तेषां
पुद्गलाः संतप्यमानाः तदनंतरान् तेषां संतप्यमानानां पुद्गलानामनंतरावस्थितान् ये स्थिताः पुद्गलास्तद
नंतरास्तान् बाह्यान् पुद्गलान् सूत्रे च नपुंसकनिर्देशः प्राकृतत्वात् संतापयंति इति एष द्वितीयः प्रस्तुतवक्तव्यताप
रिमाणविस्तरकः पसणमित्यादि एतत्रयपर्वस्वरूपा सतस्य सूर्यस्य समितमुपपन्नं तापक्षेत्रं अत्रोपसंहार ८२

माह । एगे एवमाहंसु ॥ १ ॥ एके पुनरेवमाहुः ॥ ता इति पूर्ववत् जेणमिति प्राग्वत् पुद्गलाः सूर्यस्य लेश्यां स्पृशं
ति ते पुद्गला न संतप्यंते न संतापमनुभवंति यस्य पावकफलकादीनां सूर्यलेश्यां संस्पृष्टानां संतापानुपलब्धे
ते संतप्यमानानां सूर्यलेश्यां पुद्गलानामभवस्थापनं तपीठफलकादिगतानां पुद्गलानामिति तत्पर्यवि
तार्थः ॥ तेणमिति ते असंतप्यमानाः पुद्गलाः असंतप्यमानास्तदनंतरान् बाह्यान् पुद्गलान् संतापयंति ता एते व
ति स्वतास्तेषामसंतप्तत्वात् इति द्वितीयः प्रातिपक्षिक एणमित्यादि एतत्रयपर्वस्वरूपा सतस्य सूर्यस्य तापक्षेत्रस
मितमुपपन्नमिति उपसंहारमाह । एगे एवमाहंसु ॥ २ ॥ एके पुनरेवमाहुः ॥ ता इति पूर्ववत् जे पुद्गला
सूर्यस्य लेश्यां स्पृशंति ते पुद्गला अस्ति इति प्राकृतत्वान्निपातत्वादस्तीति एकके ॥ केचन ताप
सूर्यलेश्यां संस्पृशंतः संतप्यं संतापमनुभवं वंतीति एके असंतप्यकाः ॥ केचन पुद्गला अतः संतप्यंते तत्र ये
संतप्यकाः संतप्यमानास्ते तदनंतरान् बाह्यान् पुद्गलान् अस्त्येतत्यत् एकान् कांश्चित् संतापयंतीति अ
स्त्येतदेककान् कांश्चित् संतापयति इति तृतीयः पूर्ववत् एसणमित्यादि एतत्रयपर्वस्वरूपं स तस्य सूर्यस्य सम
तमुपपन्नं तापक्षेत्रं अत्रोपसंहारमाह । एगे एवमाहंसु ॥ ३ ॥ एतास्तिस्रोऽपि प्रतिपत्तयो मिथ्यारूपा इति भगवतो
ऽस्य भगवान् तिस्र स्वमतमाह ॥ ८ ॥ वयं पुण इत्यादि वयं पुनः एवं वक्ष्यमाणेन प्रकारेण वदामः स्वम
तप्रकारमाह । ता जइत्यादि ता इति पूर्ववत् इमाः प्रत्यक्षतः उपलभ्यमानाश्चंद्रसूर्याणां देवानां साक्षात्

सूर्यप्र०
टि ८३

विमानेस्योलेश्या उद्गतादेवद्यावत्तिष्ठतेतिनिःसृता सा प्रतापयंतिवायं यथोचितमाकाशावभासिकाशप्रका
शयंति। एतासां च बहिर्विमानस्यो निःसृतानां लेश्यानामंतरे वे अपांतराले अन्यतराश्छिन्ना लेश्याः संमूर्छितितव।
सा सूतलेश्यिना लेश्याः संमूर्छिता सत्यस्तदनंतरं बाह्यानुत्कलावस्तं तापयंति। इति। अत्र इह द्वितीयपत्र एण मित्यादि
एतदेव सूत्रं सतस्य सूर्यस्य समितप्पपन्नताप क्षेत्रमिति। न दवेतापक्षेत्रस्य सूर्यसंस्थाने उक्तं। ७। संप्रति किं प्र
माणां पौरुषीं छायां निवर्त्तयतीत्यवबोधकामः   प्रश्नं करोति ता कइ कट्टं ते इत्यादि। ता इति पूर्ववत् कतिकाष्ठां कि
प्रमाणां भगवन् त्वया सूर्यः पौरुषी छायां नि।   वर्त्तयन्नाख्यात इति वदेत्। एवमुक्ते भगवान् प्रथमतो ला
श्या प्रकृपविषयेयावंत्यः प्रतीपत्तिकांतो   प्रतिपत्तयस्सा वदीरूपदर्शयति। तच्छ खल्विइत्यादि। तत्र
तस्यां पौरुष्यां छायायां विषये लेश्याम।   धिकृत्य खल्विमाः पंचविंशतिप्रतिपत्तयः प्रज्ञप्तास्तद्यथा
तत्र तेषां पंचविंशतिः परतीर्थिका नामाध्येकाः   एवमाहुः ता इति पूर्ववत् अनुसमयमेव प्रतिक्षणमेव सूर्यः
पौरुषीं छायां इहा लेश्यावशतः पौरुषीं छायां भवतीतितत्र कारणे कार्योपचारात्पौरुषीछायेति लेश्यादशा।
ख्याता। निर्वर्त्तयन्नाख्यात इति वदेत्। किमुक्तं भवति प्रतिक्षणमन्यामन्यां छायालेश्यां निवर्त्तयन्नाख्यात
इति वदेत्। आत्रायसंहारस्तुएवमाहुरित्यादि। एवमुक्तेन प्रकारेणैतेनानंतरादितनाभिलापेन सू
त्रपाठगमेतव्याएवंउक्ताः से स्थितौ पंचविंशतिः प्रतिपत्तयउक्ता सा एवक्रमेणात्रापिनेतव्यास्सार्वद्यावत्तरमप्रतिपत्ति   ८३

प्रतिपादकमिदं सूत्रं गोपुणएवमाहंसु। ता अणुउसप्पिणि उस्सप्पिणिमेवसूरिए इत्यादि। मध्यमेत्वालापका
वं ज्ञातव्याः। एगेपुणएवमाहंसु। ता अणुमुहूत्तमेवसूरिए पोरिसि छायं निवत्तेइ आहियत्ति वएज्जा। एगेएवमा
हंसु इत्यादि। तदेवं लेश्याविषयाः परप्रतिपत्तीरूपदर्श्य संप्रति। तद्वेषयं स्वमतमाह। वयंपुणइत्यादि वि
यं पुनरवं वदामः स्वमित्याह। ता सूरियस्सणमित्यादि। ता इति पूर्ववत्। सूर्यस्येणमितिवाक्यालंकारे उच्च
त्वं लेश्यां वधतीत्यच्छायोद्देशः किमुक्तं भवति   यथा सूर्यस्त्रावेरात्रेस्वराममधिरोहति। यथा च मध्याह्नाद
र्व्वनीचैर्नीचैर्विस्तरामतिकामति। एतदपि लौकिक   कव्यवहारापेक्षयोच्यते। लोकिकाव्यवहारापेक्षया उ
च्यति। लौकिकाहि प्रथमतो दूरतर वर्त्ति   नं सूर्यमुद्यमानमतिनीचैस्तरं प्रपश्यंति। ततः प्रत्यास
न्नतरभवनमध्येरुह्योस्तरामध्याह्नं चक्रमे   ण दूरं दूरतरं ततोऽतिनीचैस्तरमिति। तथा तथा लेश्या
संवर्धति। तद्यथा। अतिनीचैस्तरं वर्त्तमानसूर्ये   सर्वस्यापि प्रकाश्यस्य वस्तुनो दूरतः प
रिपतंति। ततः प्रकाश्यस्य वस्तुनो महती महत्तरा छाया भवति। नवि रावेस्तरां वर्त्तमाने सूर्ये प्रत्यासन्नाः प्रत्यास
न्नतराः परिपतंति। ततः प्रकाश्यस्य वस्तुनो हीनतरा छाया भवति। ततएवं तथा तथा वर्त्तमानं सूर्यास्याच्छेदलं
श्यां वधतीत्य छायायाश्च न्यथा भवत्यास्मादात्सिंघातच्छाः। इह प्रतिक्षणं तत्रस्तु जलाप्यवायनत्तत्तु फल
हान्याकाया। छायायाच्च न्यवैतात्क्वाल्पव्रजा। तिबधस्तु सूर्यादशत सूत्रउक्तं छायोद्देशः इति। ८चवर्त्त

छायं च पडुत्तले सादेमे इति तथा तथा विवर्द्धमानां । सूर्यस्योद्वर्तं छायां च हीनां हीनतराम् अधिकाम् अधिकतरां च तथा तथा
संवर्तीयतीत्याश्रित्य लेश्यायाः प्रकाश्यस्य वस्तुनः प्रत्यासन्नप्रत्यासन्नतरं दूरं दूरतरं वा परिपतंत्यादेशो ज्ञा
तव्यः ॥ तथा लेसं च छायं च पडुच्च उद्वत्तोदाहस इति लेश्यायाः प्रकाश्यस्य वस्तुनो दूरं दूरतरमासन्नमासन्नतरं प
रियंती छायां च हीनां हीनतराम् अधिकाम् अधिकतरां च संवर्तीयतीत्य सूर्यगतस्योद्वर्तस्य तथा तथा विवर्द्धमा॥
नस्यादेशो ज्ञातव्यः ॥ किमुक्तं भवति । येष्वप्येता निष्पत्तिलक्षणमन्यथा विवर्त्तते । तत एकस्य द्वयस्य वा
तथा तथा विवर्द्धमानस्यादेशात् उपलक्षणादि तस्याप्यादेशतोऽवगमः कर्त्तव्य इति तादेव लेश्यापाद्य
रूपमुक्तं ॥ छा ॥ संप्रति पौरुषीच्छायायाः परिमाणविषयप्रतीत्य प्रतिपत्तिसंभवं कथय
ति ॥ छा ॥ तत्थेत्यादि । तत्र तस्याः पौरुष्याश्छा ॥ यायाः परिमाणचिंतायां विषये खलु इमे द्वे प्रतिपत्ती
प्रज्ञप्ते तद्यथा तत्र तथा कथानां परतीर्थिकानां मध्ये एके एवमाहुः । अस्ति स दिवसो यस्मिन् दिवसे सूर्य
उद्गमनमुहूर्त्ते अस्तमयमुहूर्त्ते च चउःपौरुषीं चतुःपुरुषप्रमाणां पुरुषग्रहणमुपलक्षणं तेन सर्वस्या
पि प्रकाश्यस्य वस्तुनश्चतुर्गुणां छायां निर्वर्त्तयति । अस्ति स दिवसो यस्मिन् दिवसे उद्गमनमुहूर्त्ते अस्तम
यमुहूर्त्ते च द्विपौरुषीं द्विपुरुषप्रमाणां छायां सूर्यो निर्वर्त्तयति । अत्रापि पुरुषग्रहणमुपलक्षणं । ततः ८४
सर्वस्यापि वस्तुनः प्रकाश्यस्य द्विगुणां छायां निर्वर्त्तयतीति द्रष्टव्यं । अत्रोपसंहारः । एगे एवमाहंसु ॥ एके ।

---

पुनरेवमाहुः ॥ ता इति पूर्ववत् । अस्ति स दिवसो यस्मिन् दिवसे उद्गमनमुहूर्त्ते अस्तमयमुहूर्त्ते च सूर्यो द्विपौरु
षीं पुरुषद्वयप्रमाणां छायां निर्वर्त्तयति पुरुषग्रहणस्योपलक्षणत्वात् सर्वस्यापि प्रकाश्यवस्तुनो द्विगुणां छायां
निर्वर्त्तयतीत्यर्थः । तथा अस्ति स दिवसो यस्मिन् दिवसे सूर्योऽस्तमयमुहूर्त्ते उद्गमनमुहूर्त्ते न कांचिदपि
पौरुषीं छायां निर्वर्त्तयति । संप्रत्येतदेव मतं भावयति । तत्थेत्यादि । तत्र तेषां द्वयानां मध्ये ये ते वादिन एवमा
हुरस्ति स दिवसो यस्मिन् दिवसे चतुःपौरुषीं छा यां सूर्यो निर्वर्त्तयति । अस्ति स दिवसो यस्मिन् दिवसे सू
र्यो द्विपौरुषीं छायां निर्वर्त्तयति । ते एवं स्वमति विभावनार्थमाहुः ॥ ता जयाणमित्यादि ॥ तत्र यदास्मि
न् काले णमिति वाक्यालंकारे सर्वाभ्यंत रमंडलमुपसंक्रम्य चारं चरति । तदा उत्तमकाष्ठाप्रा
प्तोत्कर्षिका अष्टादशमुहूर्त्ता दिवसो भवति जघन्या द्वादशमुहूर्त्ता रात्रिः । तस्मिंश्च दिवसे सूर्यश्चतुःपौ
रुषीं चतुःपुरुषप्रमाणां छायां निर्वर्त्तयति । तद्यथा उद्गमनमुहूर्त्ते अस्तमयमुहूर्त्ते च सर्वोद्गमनमुहूर्त्ते ॥
स्तमयमुहूर्त्ते च चउःपौरुषीं छायां निर्वर्त्तयति लेश्याभिवर्द्धयन् प्रकाश्यवस्तुनश्च परिक्षवमानो दूरतरं परि॥
क्षिपन् । नो चेव णं निवेष्टयन् प्रकाश्यवस्तुनः परिक्षवमानानां प्रत्यासन्नं प्रत्यासन्नतरं परिक्षिपन् तथा सति
छाया हीना हीनतरा च संभवात् । ता जयाणमित्यादि । तत्र यदा सर्वबाह्यमंडलमुपसंक्रम्य चारं चरति । तदा
उत्तमकाष्ठाप्राप्तोत्कर्षिका अष्टादशमुहूर्त्ता रात्रिर्भवति जघन्या द्वादशमुहूर्त्ता दिवसः तस्मिंश्च दिवसे

सूर्यप्र०टी
टी०८५.

सूर्यो द्विपौरुषीं द्विपुरुषप्रमाणां छायां निर्वर्त्तयति तद्यथा । उद्गमनमुहूर्त्ते अस्तमयमुहूर्त्ते चैव सर्वदा द्विपौरु
षीं छायां निर्वर्त्तयति लेश्यामभिवर्द्धयन् नो चैव निर्वेष्टयन् अत्र स्ववाक्यस्य लावको पि पूर्ववद्भावनीय ॥ सप्तानां तत्र तेषां द्वि
यानां मध्यायात वादिन एवमाहुः अस्ति स दिवसो यस्मिन् दिवसे सूर्यो द्विपौरुषीं छायां निर्वर्त्तयति । अस्ति स दि
वसः सूर्यो न किंचिदपि पौरुषीं छायां निर्वर्त्तयति । तदेवं स्वमत विज्ञापनाय भावस्ते ता जयाणं मित्यादि । तत्र यदा सू
र्यः सर्वाभ्यंतरमंडलमुपसंक्रम्य चारं चरति तदा उत्तम काष्ठाप्राप्त उत्कर्षकोऽष्टादशमुहूर्त्तो दिवसो भवति । जघ
न्या द्वादशमुहूर्त्ता रात्रिः । तस्मिंश्च दिवसे सूर्यो द्वि पौरुषीं छायां निर्वर्त्तयति । तद्यथा । उद्गमनमुहूर्त्ते अस्तमय
मुहूर्त्ते च सर्वदा नो पौरुषीं छायां निर्वर्त्तय ति लेश्यामभिवर्द्धयन् ना चैव निर्वेष्टयन् ता जदाणं
मित्यादि । तत्र यदा णमिति वाक्यालंकारे सूर्यः सर्वबाह्यं मंडलमुपसंक्रम्य चारं चरति तदा उत्तमकाष्ठा
प्राप्ता उत्कर्षिका अष्टादशमुहूर्त्ता रात्रिः । जघन्यो द्वादशमुहूर्त्तप्रमाणो दिवसः । तस्मिंश्च दिवसे उद्गमनमुहूर्त्ते
अस्तमयमुहूर्त्ते च सूर्यो न किंचिदपि पौरुषीं छायां निर्वर्त्तयति । नो चेवणमित्यादि न च नैव तदानीं सूर्यो लेश्यामभि
वर्द्धयन् नवति । निर्वेष्टयन्नु वा अभिवर्द्धयन् अधिकाधिकतराया निर्वेष्टयन् हीनहीनतराया छायायाः संप्रत्येवं
सप्तानां तद्वप्रतीपत्तिकप्रतिपत्तिद्वयस्य त्वा भगवान् गौतम स्वमतं भगवति । ता अहं पुणमित्यादि । यथेवं परतीर्थिकानां
प्रतिपत्तीनां भगवन् स्वमतेन व्याकरोति काष्ठां किंप्रमाणा सूर्यः पौरुषीं छायां निर्वर्त्तयन् आख्यात इति वदेत् । त ८५

त्र भगवानाह स्वमतेन उद्देश विभागतः पौरुषीच्छायां तथा तथा अनियतप्रमाणां वक्ष्यति परतीर्थिकास्तु प्रतिनियता
मेव प्रतिदिवसं उद्देशविभागेन इति । ततः प्रथमतस्तन्मान्या वाप्यदर्शयति । तत्थेत्यादि । तत्र तस्मिन् उद्देशविभागेन अति
दिवसं प्रतिनियताया पौरुष्याश्छायाया विषयेष्व सप्तवाद प्रतिपत्तयः प्रज्ञप्ता स्तद्यथा । तत्र तेषां सप्तानां परतीर्थि
कानां मध्ये एक एवमाहुः ता अत्थि पूर्ववत् अस्ति स देशो यस्मिन् देशे आगतः सन् एकपौरुषीमेकपुरुषप्रमा
णां पुरुषग्रहणमुपलक्षणं सर्वस्यापि प्रकाश्य वस्तुनः स्वप्रमाणां छायां निर्वर्त्तयति । अत्रोपसंहारः एगे एवमाहं
सु ॥१॥ एके पुनरेवमाहुः । अस्ति स देशो यस्मिन् देशे समागतः सूर्यो द्विपौरुषीं द्विपुरुषप्रमाणां पुरुष
ग्रहणस्योपलक्षणत्वात् सर्वस्यापि वस्तुनः प्रकाश्यस्य द्विगुणमित्यर्थः छायां निर्वर्त्तयति । अत्राप्युप
संहारः एगे एवमाहंसु । २ एवमित्यादि । एवं उक्तप्रकारेण एतेनानंतरोदितेन अभिलापेन सूत्रपाठगमेन
प्रतिपत्तिगतमपि सूत्रं नेतव्यं । तावद्यावच्च रम प्रतिपत्तिगतं सूत्रं तदेवं खंडशो दर्शयति तिन्नि ८ इत्यादि एत
द्वि चैव परिशेषं एगे एवमाहंसु । अत्थि णं से देसे जंसि णं देसंसि सूरिए अट्ठ पोरिसिं छायं निव्वत्तेइ । अहियाति
वएग्गा एगे एवमाहंसु । मध्यम प्रतिपत्तिगतो ऽत्रालापकः सुगमत्वात् स्वयं परिभावनीयः । संप्रत्येतासां सर्वासां प्र
तिपत्तीनां भावनिकां चिकाऽपुराह ॥ तत्थेत्यादि ॥ तत्थेत्यादि । तत्र ये ते एवमाहु परतीर्थिकानां मध्ये ये ते वादि
न एवमाहुः । अस्ति स देशो यस्मिन् देशे समागतः सन् सूर्य एकां पौरुषीं प्रकाश्यवस्तुनः स्वप्रमाणां छायां निर्वर्त्तय

ति। तएवं स्वमतविभावनार्थमाह। ता सूरियस्स णमित्यादि। ता इति पूर्ववत्। सूर्यस्य सर्वाभ्यंतरे सूर्यस्य प्रतिबिंबः सू
र्यप्रतिबिंबता सूर्यनिवेशादित्यर्थः। बहिर्निःसृताया लेश्यायाः संलेशता डिंबमाणे हिति। ताश्च माना लेश्या रत्नप्रभा
याः पृथिव्या बहुसमरमणीयाद्भूमिभागाद्यावति सूर्य ऊर्ध्वं व्यवस्थितस्तावता ऊर्ध्वं वस्तुनं प्रमाणानि वसा
न्यपि च दीर्घसकला तत् किंरूपं दर्शितं उमानेन ततस्त्वं यावन्मानप्रमाणेन तत्कृतं उमाणं त्रिवमितः परिछिन्नो
ऽतः सर्वत्र अथ सूर्यस्य स्ववितर्कनिर्देशः प्राकृतत्वात्। एकेन च छायायाउमानप्रमाणेन प्रकाश्यवस्तुनोयङ्देशात
प्रमाणमउमायातत्तन च इह आकाशादाशसू यमभीप प्रकाश्यस्य एवं आयादेशः प्रदेशाय स्मिन् प्रद
शे आगतः सन् सूर्य एकापौरुषीं छायां निर्वर्तयति तस्यापलक्षणं वा सर्वस्य प्रकाश्यस्य वस्तुनः प्र
माणे स्वतां छायां निर्वर्तयति। इयमत्र भा वना। प्रथमतउदयमानस्य सूर्यस्यालेश्या विनिर्गता प्रकाश
मास्रिता स्यात्। प्रकाश्यवस्तुदर्शकं क्रियमा णा सा किंचित्स्वर्वासिसुखमवनताभिः प्रकाश्यतनवस्तुना
यः संसाद्यातपरिछिन्नश्चाकाशप्रदेशास्तत्रागतः सूर्यः प्रकाश्यवस्तुप्रमाणां छायां निर्वर्तयति। एवमुक्तं स्वा
पिसावनाक्रायतिः इत्यादि। तत्र एते वादिनः माहुः स्रिसदेशोयस्मिन्प्रदेशे समागतः सूर्यो द्विपौरुषीं छायां
निर्वर्तयति। तएवं स्वमतविस्फारणार्थमाह। ता सूरियस्स णमित्यादि। ता इति पूर्ववत्। सूर्यस्य सर्वाभ्यंतरस्य
र्यप्रतिबिंबः सूर्यनिवेशादहिर्निःसृता सलेश्या सिसाश्चमाना लेश्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद्भू। ८६

मिभागादूर्ध्वं उद्वेतद्व्यवस्थितः। एतावद्भिः सार्धं माराम स्यां च छायायाउमानप्रमाणास्यां प्रकाश्यवस्तुप्रमाणा
स्याम वमितः परिछिन्नाया देशास्तत्र समागतः सूर्यो द्विपौरुषीं प्रकाश्यवस्तुनो द्विगुणां छायां निर्वर्तयति
एवमेकैकप्रतिपत्ताविवेकेकार्धसागेकैक छायाउमानप्रमाण वृद्ध्याता वाक्रितं छायावत्यस वति तमाप्र
तिपत्तिसूत्राणि वसूत्राणि स्वयं परिभावनीयानि सुगमत्वात् तदेवमुक्ता परतीर्थिकप्रतिपत्तयः संप्रति स्वा
मतमुपदर्शयति। तावयं पुण इत्यादि। वयं पुन नारकं वस्तुप्रमाणेन प्रकारेण वदामस्तमेव प्रकारमाह सा
तिरेगेत्यादि। सूर्यत्रिक्रमसावइत्सु मतसम त्वावसातिरेकैकोनषष्टि पुरुषप्रमाणां छायां निर्वर्तयति
तातादव विभाव यिष्वराह ताश्वावइत्यादि अपगतमर्धं यस्याः साऽपार्धा सा चासौ पौरुषी च अपा
र्धपौरुषी छाया पुरुषग्रहणस्यापलक्षणं प्रावसर्वस्यापि वस्तुनः प्रकाश्यस्यार्धप्रमाणा छाया एवं छंत
रत्रापुपलक्षणत्वाख्यानं द्रष्टव्यं। दिवसस्य किं गतेकतितमे भागे गते शेषे वा। कतितमे वा भागे शेषे सवति
सगवानाह। ता इत्यादि। ता इति पूर्ववत्। दिवसस्य त्रिभागे गते सवति। दिवसस्य त्रिभागावा शेषता इत्यादि पौ
रुषा पुरुषप्रमाणा प्रकाश्यस्य वस्तुनः स्वप्रमाणा इत्यर्थः। छाया किं गतेकतितमे भागे गते शेषे वेति कतितमे
वा भागे शेषे सवति। सगवानाह। दिवसस्य चतुर्भागे गते चतुर्भागे शेषे वा प्रकाश्यस्य वस्तुनः स्वप्रमाणं द्विगुणा
छाया। अन्यच्च शंवा तदा सर्वाभ्यंतरमंडलमाश्रित्यो च्यते यावनं दिव पिंगिया। पुरिसत्ति संख्या पुरिससरीरस्व

ततो पुरिसे ति प्पन्ना पोरिसी। एवं सव्वस्स वत्थुणो यदा स्वप्रमाणा छाया भवति तदा पोरिसी हवइ। एयं पोरिसीपमाणं
उत्तरायणस्स अंते दक्खिणायणस्स आईए इक्कं दिणं भवइ। अतो परं अट्ठ एगसट्ठिभागा अंगुलस्स दक्खिणायणे
वड्ढंति। उत्तरायणे ऊस्संति। एवं मंडले मंडले अन्ना पोरिसी। इति। ततः इदं सकलमपि पोरुषीविभागप्रमाणं प्रतिपादितं
सर्वाभ्यंतरं मंडलमधिकृत्यावसेयं। तथा ता इति पूर्ववत् अर्द्धपोरुषीं अर्द्धपुरुषप्रमाणां छायां दिवसस्य किं भागे
गते वा भवति किं वा शेषे वा इति तमेव। भागे शेषे भगवानाह। ता इति पूर्ववत् दिवसस्य त्रिभागे गते
वा भवति शेषे वा एवमेव भागे एवमित्यादि। एवमुक्तेन प्रकारेण अर्द्धपौरुषीं द्विपुरुषप्रमाणां छायां
द्विपुरुषप्रमाणां छायां चतुर्भागे दिवसस्य गते
व्याकरणसूत्रं सूत्रं ज्ञातव्यं तथा चैवं विधोऽ॰
। पूर्वसूत्रापेक्षया एकैकमधिकं दिवसभागं द्विपुरु
षीं छायां किं गते वा शेषे वा अर्द्धार्द्धरूपपौरुषीं छायां किं
गते वा शेषे वा ता सप्त भागे गते वा शेषे वा इत्या।दि। एतदुपतामवश्यानुवर्तते अगुणषष्ट्या दि सुगमं सा ति। तथा केको
नषष्टिपौरुषीं छायां दिवसस्य प्रारंभसमयपर्यंते समायवतात आह। ता ना। किंचिद्विगते वा शेषे वा इति संप्रति
छायाभेदाद्भ्यां चाह। ता ता इत्यादि। तत्र तस्यां छायायां विचार्यमाणायां स्वरूपभेदेन पंचविंशतिविधा छाया प्रज्ञ
प्ता। तद्यथा खंभछायेत्यादि। प्रायः सुगमं विशेषव्याख्यानं नामीषां पदानां ज्ञानाभावात् तथाविधसंप्रदायाभावात्। गोल 
छायेत्युक्तं। तत्र तामेव गोलछायां भेदतः आह। ता ता इत्यादि। तत्र तासां पंचविंशतिछायानां मध्ये खलु इयं गोल-

छाया अष्टविधा प्रज्ञप्ता। तद्यथा गोलछाया गोलमात्रस्य छाया गोलछाया। अपार्द्धस्य अर्द्धमात्रस्य गोलस्य छा
या अपार्द्धगोलछाया। गोलावलिः गोलपंक्तिस्तस्याश्छाया गोलावलिछाया। गोलानां समूहो गोलपुंजस्तस्य छाया गोलपुंजछा
या। अपार्द्धस्य अर्द्धमात्रस्य गोलावल्याश्छाया अपार्द्धगोलावलिछाया। गोलानामावलिः गोलावलिस्तस्याश्छा
या गोलावलिछाया। अपार्द्धायाः अपार्द्धमात्राया गोलावल्या अपार्द्धगोलावलिछाया। गोलानां पुंजो गोलपुंजः उत्क
रस्तस्य। तस्य छाया गोलपुंजछाया अपार्द्धमा- त्रस्य गोलपुंजस्य छाया अपार्द्धगोलपुंजछाया॥ ८॥ इति श्री
मलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां नवमं प्राभृतं समाप्तं॥ ९॥ तदेवमुक्तं नवमं प्राभृतं संप्र
ति दशममारभ्यते। तस्य चायमर्थाधिकारः योगः इति किं भगवन्नु योगमाख्यातमिति
ततस्तद्विषयनिर्वचनसूत्रमाह॥ ९॥ वा जो गइ ति वत्थुस्स इत्यादि। ता इति अथ तावत् प्रथमतोऽस्य
प्राभृतप्राभृतादौ योगः इति वस्तुनो नक्षत्रजातस्य आवलिका निपातः आवलिकाक्र
मेण निपातः स च साक्षीसंयोगो वक्तव्या तामाख्यातमिति वदेत् स्वशिष्यस्य। एवमुक्ते भगवान् गौतमः पृच्छ
ति। ता कहं ते इत्यादि। ता इति पूर्ववत् केन प्रकारेण भगवान् त्वया योगः इति योगवस्तुनो नक्षत्र
जातस्य आवलिकानिपातः आख्यात इति वदेत्। भगवानाह। ९। तत्र खलु इत्यादि तत्र तस्मिन् नक्षत्रजात
स्यावलिकानिपातविषये खल्विमाः पंच प्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ताः। तद्यथा। तत्र तेषां

पंचानां परतीर्थिकानां मध्ये पंचमपरतीर्थिका एवमाहुः॥ ता इति पूर्ववत् सर्वाण्यपि नक्षत्राण्यश्विन्यादीनि।
भरणीपर्यवसानानि प्रज्ञप्तानि स्वशिष्येभ्यो निर्दिशेत्। प्राकृतत्वाच्चात्रापि संहारः। एगे एवमाहंसु॥ एवं शेषप्र-
तिपत्तिचतुष्टयगतान्यपि सूत्राणि परिभावनीयानि। तदेवं परप्रतिपत्तीरुपदर्श्य संप्रति स्वमतमुपदर्शयति एवं
पुण इत्यादि वयं पुनरेवमुपमानेन प्रकारेण वदामः स्वमेव प्रकारमाह। ता सव्वे वि णमित्यादि। ता इति पू-
र्ववत्। सर्वाण्यपि नक्षत्राणि अभिजिदादीनि उत्तराषाढापर्यवसानानि प्रज्ञप्तानि। कस्मादिति चेदुच्यते इ-
ह सर्वेषामपि सुषमसुषमादिरूपाणां काल विशेषाणामादिर्युगं एतच्च समस्तसमाद्यं श्रावण विस
साङ्गमादिना सह प्रवर्त्तते युगानन्तरं हस कव्यंती विश्रीपादलिप्तसूरिवचनप्रामाण्यात्। युग-
स्य चादिः प्रवर्त्तते श्रावणमासि बहुलपक्षे प्रतिपदि तिथौ बालवकरणे अभिजिन्नक्षत्रे चन्द्रेण सह यो-
गमुपागच्छति। तथा चाह ज्योतिष्करंडके। सावणबहुलपडिवए बालवकरणे अभीइनक्खत्ते। सव्वत्थ पढमस-
मए जुगस्स आइं वियाणाहि॥ अत्र सर्वत्र भरतैरवतमहाविदेहे च शेषं सुगमं। ततः इह सर्वेषामपि कालविशे-
षाणामादौ चन्द्रयोगमधिकृत्य अभिजिन्नक्षत्रस्य प्रवर्त्तमानत्वादभिजिदादीनि नक्षत्राणि प्रज्ञप्तानि। तान्येव त-
थाचेत्यादिनोपदर्शयति॥ ॥ अभिई सवणे इत्यादि॥ ॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां
दशमस्य प्राभृतस्य प्रथमं प्राभृतप्राभृतं समाप्तं॥ ॥ तदेवमुक्तं दशमस्य प्राभृतस्य प्रथमं प्राभृतप्राभृतं। सं- ८८

प्रति द्वितीयमारभ्यते तस्य चायमर्थाधिकारो नक्षत्रविषयं मुहूर्त्तपरिमाणं वक्तव्यमिति। ततस्तद्विषयं प्रश्नसूत्रमा-
ह। ता कहं ते इत्यादि। ता इति पूर्ववत्। कथं भगवन् प्रतिनक्षत्रं मुहूर्त्तैर्मुहूर्त्तपरिमाणमाख्यातमिति वदेत्। एव-
मुक्ते भगवानाह। ता एएसि णमित्यादि। ता इति पूर्ववत्। एतेषामष्टाविंशतिनक्षत्राणां मध्येऽस्ति तन्नक्षत्रं यन्न-
व मुहूर्त्तानेकस्य च मुहूर्त्तस्य सप्तविंशतिं सप्तषष्टिभागान् यावच्चन्द्रेण सार्द्धं योगं युनक्ति उपैतीति। तथास्ति-
निपातत्वादेकत्वे बहुत्वे वा सन्ति तानि नक्षत्राणि यानि पंचदश मुहूर्त्तान् यावच्चन्द्रेण सह योगमुपयां-
ति। तथा सन्ति तानि नक्षत्राणि यानि त्रिंशतं मु- हूर्त्तान् यावच्चन्द्रेण सह योगं युंजते। तथा संति तानि नक्षत्राणि
यानि पंचचत्वारिंशतं मुहूर्त्तान् यावच्चंद्रे- ण सह योगं युंजंति। एवं सामान्येन भगवतोक्ते विशेष-
निर्द्धारणाय भगवान् गौतमः ता एएसि- णमित्यादि। ता इति पूर्ववत्। एतेषामष्टाविंशतेर्नक्षत्राणां
मध्ये कतरन्नक्षत्रं यन्नव मुहूर्त्तानेकस्य च मु- हूर्त्तस्य सप्तविंशतिं सप्तषष्टिभागान् यावच्चंद्रेण सह योगं
युनक्ति। तथा कतराणि तानि नक्षत्राणि यानि पंचदश मुहूर्त्तान् यावच्चंद्रेण सह योगं युंजंति। तथा कतराणि
तानि नक्षत्राणि यानि त्रिंशतं मुहूर्त्तान् यावच्चंद्रेण सह योगमुपयांति। तथा कतराणि तानि नक्षत्राणि यानि
पंचचत्वारिंशतं मुहूर्त्तान् यावच्चंद्रेण सार्द्धं योगमुपयांति। एवं गौतमेन प्रश्ने कृते भगवानाह। ता एएसि णमि-
त्यादि। ता इति पूर्ववत्। एतेषामष्टाविंशतेर्नक्षत्राणां मध्ये अभिजिन्नक्षत्रं नव मुहूर्त्तानेकस्य च मुहूर्त्तस्य सप्तविंश-

सूर्यप्र० टी०॥८८

ति सप्तषष्टिभागान्यावच्चंद्रेण सह योगं युनक्ति तदेवमभिजिन्नक्षत्रमवसेयं। कथमिति चेदुच्यते इह अभिजिन्नक्ष
त्रं सप्तषष्टिखंडीकृतस्याहोरात्रस्यैकविंशतिं भागान्यावच्चंद्रेण सह योगमुपैति एवं च एकविंशतिः सप्तषष्टिभागास्तु त्रिं
शद्भागकरणार्थं त्रिंशता गुण्यंते जातानि षट्शतानि त्रिंशदधिकानि॥ इत्थं पतद्भावयता वा तत्कालमधिकृत्य सी
मा विस्तारोऽभिजिन्नक्षत्रस्यान्यथाप्युक्तः॥ शेषनक्षत्राणां सीमविष्कंभो दृष्टः सप्तषष्टिभागास्त्रै
द्विःत्रिंशंतनाणी। तेषां सप्तषष्ट्या भागो ह्रियते लब्धा नव मुहूर्ताः एकस्य च मुहूर्तस्य सप्तविंशतिः सप्तषष्टि
भागाः॥ ५॥ उक्तं च अभिजिस्स चंदजोगो सत्तट्ठी खंडिओ अहोरत्तो। भागा य एगवीसं ते पुण अहिया नव मुहुत्ता
नव मुहूर्त्ता॥ तथा तान्यादितिवाक्यमष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि पंचदश मुहू
र्त्तान्यावच्चंद्रेण सह योगमनुवर्तते तानि षट्। तद्यथा॥ शतभिषक् इत्यादि तथा तेषामपि नक्षत्रा
णां प्रत्येकं सप्तषष्टिखंडीकृतस्याहोरात्रस्य॥ सार्द्धत्रयस्त्रिंशद्भागान्यावच्चंद्रेण सह योगमनुवर्त
ते तो मुहूर्तगतसप्तषष्टिभागकरणार्थं त्रयस्त्रिंशता गुण्यंते जातानि नव शतानि नवत्यधिकानि॥ एतेष्वर्धमपि
त्रिंशत्गुणितं लब्धाः पंचदश मुहूर्तास्तस्य सप्तषष्टिभागास्ते पूर्वराशौ प्रक्षिप्यंते जाताः स
हस्राणि सहस्रं पंचोत्तरं॥ एतावता तेषां प्रत्येकं कालमधिकृत्य सीमाविस्तारो मुहूर्तगतसप्तषष्टिभागानां पंचो ८८
त्तरं सहस्रमुक्तः सयभिसया भरणीओ अद्दा अस्सेस साइ जिट्ठा य पंचोत्तरं सहस्सं भागाणं सीमविक्खंभो॥ अस्य

पंचोत्तरसहस्रस्य सप्तषष्ट्या भागो ह्रियते लब्धाः पंचदश मुहूर्ताः॥ उक्तं च सयभिसया भरणीओ अद्दा अस्सेस साइ जिट्ठा
य। एए छन्नक्खत्ता पन्नरसमुहुत्तसंजोगा॥ तथा च ये तेषामष्टाविंशतेर्नक्षत्राणां मध्ये नक्षत्राणि त्रिंशतं मु
हूर्तान्यावच्चंद्रेण सह योगं युंजंति तानि पंचदश तद्यथा॥ श्रवण इत्यादि तथा तेषां कालमधिकृत्य प्र
त्येकं सीमाविष्कंभो मुहूर्तगतसप्तषष्टिभागानां द्वाविंशत्तराणि सहस्राणि तत्र सप्तषष्ट्या भागे हृते लब्धा
स्त्रिंशन्मुहूर्ताः॥ तथा त्रीणि नक्षत्राणि पंचचत्वारिंशतं मुहूर्तान्यावच्चंद्रेण सार्द्धं योगं युंजंति तानि षट्
तद्यथा॥ उत्तरभद्रपदा इत्यादि। तेषां प्रत्येकं कालमधिकृत्य सीमाविष्कंभो मुहूर्तगतसप्तषष्टि
भागानां त्रीणि सहस्राणि पंचदशोत्तराणि॥ एतेषां सप्तषष्ट्या भागे हृते लब्धाः पंचचत्वारिंश
न्मुहूर्त्ताः॥ उक्तं च तिन्नेव उत्तराइं पुणव्वसू रोहिणी विसाहा य। एए छन्नक्खत्ता पणयालमुहु
त्तसंजोगा॥ १॥ अवसेसा नक्खत्ता पन्नरस य हुंति तीसइमुहुत्ता। चंदंमि एस जोगो नक्खत्ताणं समक्खाओ॥ २॥ एतावंत
मुहूर्तान् नक्षत्राणां चंद्रेण सह योगः। संप्रति सूर्येण सह तमभिधित्सुराह॥ ता एएसि णमित्यादि। ता इति पूर्व
वत् एतेषामनंतरोदितानामष्टाविंशतेर्नक्षत्राणां मध्ये अस्ति तन्नक्षत्रं यच्चत्वारोऽहोरात्रान् षट् च मुहूर्त्तान्या
वत् सूर्येण सार्द्धं योगमुपैति तथास्ति तानि नक्षत्राणि यानि षट् अहोरात्रान् एकविंशतिं च मुहूर्तान् सूर्येण सा
र्द्धं योगं युंजंति तथास्ति तानि नक्षत्राणि यानि त्रयोदश अहोरात्रान् द्वादश च मुहूर्त्तान्यावत् सूर्येण सह यो

गच्छयंति।तत्रामीतितन्नक्षत्राणियानि त्रिंशतिमहोरात्रान्त्रीन्मुहूर्त्तान्यावत्सूर्येणसमंयोगंयुंजंति।एवंभगवता
सामान्यतोनक्षत्रविशेषावगमनिमित्तंभूयोपिसनवान्गौतमःपृच्छति।ताएएसिणंमित्यादि।सुगमं।भगवानाह।निर्विव
नमादाताएएसिणमित्यादि।।ताइतिपूर्ववत्।एतेषामष्टाविंशतेर्नक्षत्राणांमध्येयन्नक्षत्रंचतुरोहोरात्रान्षट्चमु
हूर्त्तान्सूर्येणसार्द्धंयोगंयुनक्तितदेकमभिजिन्नक्षत्रमवसेयं।तथाहि।सूर्ययोगविषयेपूर्वाचार्यप्रदर्शितमिदंक
रणं।।अभिजिच्छुद्धेकुगैवत्सरेपवंपंचाभागन्तहोरात्र। तेनेत्यागेतस्यदिवसस्यरोपताःगश्ररस्याः अक्षरगमनिका
यन्नक्षत्रंयावतोरात्रिंदिवसान्होरा त्रस्यसंबंधिनःसप्तषष्टिभागान्चंद्रेणसहयोगंयुज्यति
नक्षत्रंरात्रिंदिवस्यपंचसागावताःवतःसू र्येणसमंयुज्यति।तत्राभिजिदेकविंशतिःसप्तषष्टिभागान्
चंद्रेणसमंवर्त्तते।ततएतावतःपंचभागानहो रात्रस्यसूर्येणसमवर्त्तमानमवसेयं।एकविंशतिश्चपंचगुणिता
एकोतलब्धंसहस्राहोरात्राः।एकःपंचभागाः गोऽवतिष्ठति।समुहूर्त्तानयनायत्रिंशतागुण्यतेजातानित्रिंशत्
स्याःपंचभिःभागेहृतेलब्धाःषण्मुहूर्त्ताइतितदुक्तं।चाअभिइछच्चमुहूर्त्तेचत्तारियकेवलेअहोरत्तेसूरेणसमं
गच्छईनामाएसामाणुभूजाभि।।रयं।रायंर।।।।।।तथातत्रतेषामष्टाविंशतेर्नक्षत्राणांमध्येयानिनक्षत्राणिषड्
होरात्रानेकविंशतिंचमुहूर्त्तान्यावत्सूर्येणसमायोगंयुंजंतितानिषट्शतभिषग्भरणीआर्द्राश्लेषास्वातिज्येष्ठाइत्या
दि।तथाहितानिनक्षत्राणिप्रत्येकंचंद्रेणसमंसार्द्धत्रयस्त्रिंशत्संख्याकान्सप्तषष्टिभागानहोरात्रस्य



यान्ति।अपार्द्धक्षेत्रत्वादितिएषां।ततएतावतःपंचभागानहोरात्रस्यसूर्येणसमंवृजंतीतिप्रत्येकं।प्राकुक्तकरणभावा
पण्णत्रयस्त्रिंशतश्चपंचभिर्गुणितेलब्धाःषडहोरात्राःपश्चाद्वतिष्ठंतिसार्द्धाश्चयःपंचभागाअपवर्त्तनायां
जाताःसप्ततेमुहूर्त्तानयनायत्रिंशतागुण्यतेजातादशातदावाग्नारश्या।तेचमुहूर्त्तविगततततःपरिशिष्टा
मुहूर्त्तानयनादशभिर्भागोहियते।लब्धाएकविंशतिमुहूर्त्ताः।उक्तंच।सयभिसयाभरणीएअद्दाअस्सेसेसाइ
जेट्ठायावंतिछअहोरत्तेइक्कवीसंचमुहूत्ते।।तथातत्रतेषामष्टाविंशतेर्नक्षत्राणांमध्येयानिनक्षत्राणि
त्रयोदशाहोरात्रान्द्वादशचमुहूर्त्तान्यावत् सूर्येणसमंयोगंयुंजंतितानिपंचदशउत्तराश्रवणो
इत्यादि।तथाहितानिप्रत्येकंसप्तषष्टि भागान्चंद्रेणसमंयुंजंति।ततःसूर्येणसहएतावतःपंचभा
गानहोरात्रस्यसप्तषष्टिसंख्याकान्गच्छंति सप्तषष्टिश्चपंचभिर्गुणितालब्धायोदशअहोरात्राःशेषाद्य
द्वौभागौतिष्ठतः।।तौत्रिंशतागुण्येतेजाताःष ष्टिःतस्याःपंचभिर्भागेहृतेलब्धाद्वादशमुहूर्त्ताः।उक्तंच।।अ
वसेसानक्खत्तापन्नरसविहुंतिसूरसहगयाउंति।बारसचेवमुहुत्तेतेरसयसमेअहोरत्ते।।तथातत्रतेषामष्टाविंशते
र्नक्षत्राणांमध्येयानिनक्षत्राणिविंशतिमहोरात्रान्त्रीन्मुहूर्त्तान्यावत्सूर्येणसमायोगंयुंजंतितानिषट्
त्र्युत्तरादित्याइत्यादि।एतानिहिषडपिनक्षत्राणिप्रत्येकंचंद्रेणसमंसप्तषष्टिभागानां।शतामकस्यव
सप्तषष्टिभागस्यार्द्धंभजंति।ततएतावतःपंचभागानहोरात्रस्यसूर्येणसमंव्रजंतनमवगंतव्यं।शतस्यचपंच

सिलगिक्षेत्रस्य त्रिंशतिरहोरात्रा यदपि चैकस्य पंचभागस्यार्द्धं भवति तदपि त्रिंशतायुक्तत्वात् ज्ञाता त्रिंशत् तस्य
स्वा सिलगिक्षेत्रस्थायो वशात्त्रुक्ता इति ॥६॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां दशमस्य प्राभृत-
स्य द्वितीयप्राभृतप्राभृतं समाप्तं ॥६॥ तदुक्तं दशमस्य प्राभृतस्य द्वितीयं प्राभृतप्राभृतं समाप्तं ॥६॥ तदुक्तं दशमस्य
प्राभृतस्य द्वितीयं प्राभृतप्राभृतं संप्रति तृतीयमारभ्यते तस्य चायमर्थाधिकारः एवं भागानि नक्षत्राणि वक्तव्यानी-
ति ततस्तद्विषयं प्रश्नसूत्रमाह ता कहं ते इत्यादि। ता इति पूर्ववत् कथं केन प्रकारेण भगवन् त्वया एवं भागानि नक्ष-
त्राणि प्रकारभागानि नक्षत्राणि आख्यातानि इति भगवान् वदेत् एवमुक्ते भगवानाह ॥६॥ ता एएसि णमि-
त्यादि ॥ ता इति पूर्ववत् तेषामष्टाविंशति नक्षत्राणां मध्ये अस्ति तानि नक्षत्राणि यानि
पूर्वभागानि दिवसस्य पूर्वभागे चंद्रयोगस्या- दिमधिकृत्य विख्याता यथा तानि पूर्वभागानि समक्षेत्राणि ते
समक्षेत्रमहोरात्रप्रमितं चंद्रयोगमधिकृत्यास्ते येषां तानि समक्षेत्राणि अत एवाह त्रिंशन्मुहूर्तानि प्रज्ञप्तानि त-
थास्ति तानि नक्षत्राणि यानि पश्चाद्भागानि दिवसस्य पश्चाद्भागे चंद्रयोगस्यादिमधिकृत्य विख्याता यथा ता-
नि पश्चाद्भागानि समक्षेत्राणि त्रिंशन्मुहूर्तानि प्रज्ञप्तानि तथास्ति तानि नक्षत्राणि यानि नक्तंभागानि नक्तं रा-
त्रौ चंद्रयोगस्यादिमधिकृत्य भागो येषां तानि तथा अपार्द्धक्षेत्राणि अपगतमर्द्धं यस्य तदपा-
र्द्धमर्द्धमात्रमित्यर्थः अपार्द्धमर्द्धमात्रं क्षेत्रमहोरात्रप्रमितं येषां चंद्रयोगमधिकृत्य तानि अपार्द्धक्षेत्राणि अ- ९२

---

त एव पंचदश मुहूर्तानि पंचदशचंद्रयोगमधिकृत्य मुहूर्तानि विख्यातानि येषां तानि तथा प्रज्ञप्तानि तथास्ति
तानि नक्षत्राणि यानि नक्षत्राणि उभयभागानि उभयदिवसरात्र्यात्तस्य दिवसरात्रिमित्यर्थः चंद्रयोग-
स्यादिमधिकृत्य भागा येषां तानि तथा द्व्यर्द्धक्षेत्राणि द्वितीयमर्द्धं यस्य तद् द्व्यर्द्धं सार्द्धमित्यर्थः द्व्यर्द्धं सार्द्धमहो-
रात्रप्रमितं क्षेत्रं येषां तानि तथा अत एव पंचचत्वारिंशन्मुहूर्तानि प्रज्ञप्तानि एवं भगवता सामान्येनोक्ते विशे-
षावबोधनार्थं भगवान् गौतमः पृच्छति ॥६॥ ता एएसि णमित्यादि सुगमं भगवान् प्रतिवचनमाह ता एएसि ण-
मित्यादि। ता इति पूर्ववत् तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि पूर्वभागानि समक्षेत्र-
णि त्रिंशन्मुहूर्तानि प्रज्ञप्तानि तानि षट् तद्यथा पुव्वपोट्ठवया इत्यादि। एतच्चानंतर एव प्राभृते
यएस्यादि। चंद्रमा नक्षत्राण्युपनीतवानिति। तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि पश्चाद्भागानि
समक्षेत्राणि त्रिंशन्मुहूर्तानि प्रज्ञप्तानि तानि दश तद्यथा अभिइ इत्यादि। तथा तत्र तेषामष्टाविंशतेर्नक्षत्रा-
णां मध्ये यानि नक्षत्रभागानि अपार्द्धक्षेत्राणि पंचदशमुहूर्तानि प्रज्ञप्तानि तानि षट् तद्यथा सयभिसया इत्यादि
तथा तत्र तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि उभयभागानि द्व्यर्द्धक्षेत्राणि पंचचत्वारिंशन्मुहूर्ता-
नि तानि षट् तद्यथा उत्तरापोट्ठवया इत्यादि। सर्वत्रापि व्याख्यानमयं तत्रमेव भावयिष्यते ॥६॥ इति श्रीम-
लयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य तृतीयं प्राभृतप्राभृतं समाप्तं ॥६॥ तदेवमुक्तं।

तृतीयं प्राभृतप्राभृतं। सांप्रतं चतुर्थमारभ्यते। तस्य चायमर्थाधिकारो योगस्यादिर्वक्तव्य इति। किंच पूर्वमि-
नंतरं प्राभृतप्राभृतेन नक्षत्राणां पूर्वभागतादिरुक्तं। तस्य च योगस्यादिपरिज्ञानमंतरेण नावगंतुं शक्यते ततः
स्तद्विषयं प्रश्नसूत्रमाह॥ ता कहं ते इत्यादि। ता इति पूर्ववत्। कथं ते त्वया भगवन् योगस्यादिराख्यात इति
वदेत्। इह निश्चयनयमतेन चंद्रयोगस्यादिता सर्वेषामपि नक्षत्राणामप्रतिनियतकालप्रमाणा ततः प्रा-
करणवशाद्व्यवहारतः प्रतिनियतकरणाद्यपातितः करणं केषामपीति तद्वैचित्र्यवतात् दिवसप्रपंचं भावितमतः सूत्रोक्त-
मर्थमंतरं व्यवहारनयमधिकृत्य बाह्य ल्पनयस्य नक्षत्रस्य यदा चंद्रयोगस्यादिस्तावदितमते-
धिकृत्य सूत्रं॥ ता अभिई इत्यादि। ता इते पूर्ववत्। अभिजिच्छ्रवणौ एते नक्षत्रे पश्चाद्भागसमे
क्षेत्रे इह अभिजिन्नक्षत्रं समासेन नवापि यत्वं तापि केवलं केऽश्रवणनक्षत्रेण सह संब-
द्धमुपात्तमित्यते देयपचारात्तदपि समक्षेत्रमु पकल्प्य समक्षेत्रमित्युक्तं सातिरेकोनवत्रिंशन्मु-
हूर्तप्रमाणे तथा हि सा तावत्कालं नवमुहूर्ता ति त्रिंशन्मुहूर्ताः श्रवणस्य तत्फलस्य मीलने एको-
नं मुहूर्तं परिमाणं भवति। तत्प्रथमतया चंद्रयोगस्य प्रथमतया सायं विकालवेलायां इह दिवसस्य क-
तिपयो मुहूर्तमात्रो भागो रजन्याश्च द्वित्रिकति नाभागो यत्र तारा अपि स्फुटं नक्षत्रमंडलोपलोकः साव-
कालविशेषः सायमिति विवक्षितो द्रष्टव्यः। तस्मिन् सायंसमये चंद्रेण सार्धं योगं युक्तः। इहाभिजिन्नक्षत्रं य- १७२

---

द्यपि युगस्यादौ प्रातश्चंद्रेण सह योगमुपैति तथापि श्रवणेन सह संबद्धमिदमिति विवक्षितं श्रवणनक्षत्रं समभ्य-
स्था इदं मपसरति दिवसे चंद्रेण सह योगमुपादत्ते। ततः समासाद्य चतुर्विंदा च सायंसमये चंद्रेण युज्यमानं विवक्षित-
त्वा आमान्यतः सायं चंद्रेण सह योगं युक्तं ति इत्युक्तं। अथवा युगस्यादिमतिरिच्य अन्यदा बाह्यकल्पमधिकृत्य तदेवु-
क्तं। ततो न कश्चिद्दोषः। ततो पश्चाद् इत्यादि। पश्चात्तत ऊर्ध्वं अपरमन्यं सातिरेकं दिवसं यावद् एवं दद्वोपसंहारश्यात्।
न इयकीकरोति। एवं खलु इत्यादि। एवमुक्तेन प्रकारेण खल्विति निश्चये अभिजिच्छ्रवणौ द्वे नक्षत्रे सायंस-
मयादारभ्य एकां रात्रिमेकं च सातिरेकं दिव सं चंद्रेण सार्धं योगं युक्तः। एतावतं च कालं योगं युक्त्वा तदन-
तरं योगमनुपरिवर्तयतः आत्मनस्त्याग यवतस्त्यक्तः योगं चानुपरिवर्त्य सायं दिवसस्य कतिपये
पश्चाद्भागे चंद्रं धनिष्ठायाः समर्पयतः इदमत्र अभिजिच्छ्रवणौ धनिष्ठाः सायंसमये चंद्रेण सह प्रथमतो योगं
युंजति। तेन सा धनिष्ठा पश्चाद्भागा नक्षत्रं तथा इति। ता इत्यादि। ततः समर्पणादनंतरं धनिष्ठा खलु नक्षत्रं
पश्चाद्भागं सायंसमये तस्य प्रथमतश्चंद्रेण सह युज्यमानत्वात् समाख्यं चं विंशत्मुहूर्तं तत्र प्रथमतया सायंसम-
ये चंद्रेण सह योगं युनक्ति चंद्रेण सह योगं युक्त्वा ततः सायंसमयादूर्ध्वं ततः पश्चाद्रात्रिमपरं च दिवसं यावद्यो-
गं युनक्ति। एतदेवोपसंहारद्वारेण व्याचष्टे एवं खल्वित्यादि सुगमं। यावद्योगमनुपरिवर्त्य सायं समय-
चंद्रं शतभिषजः समर्पयति परिस्फुटनक्षत्रं नक्षत्रं सायं द्रष्टव्यं। तथा वा ता इत्यादि। इति ततः समर्पणाद

नंतरं शतभिषक्नक्षत्रं खलु तत्कं नागमपार्द्धक्षेत्रं पंचदश मुहूर्त्तान् तत्प्रथमतया योगप्रथमतया चंद्रेण सार्द्धं यो-
गं युनक्ति तत्र यथायुक्तं सन्नक्तमेव अपरं दिवसं पंचदशमुहूर्त्तप्रमाणत्वात् । किं उक्तं भवति योगमधि-
कृत्य परिसमाप्तिमुपैति तथा चाह । एवं खल्वित्यादि सुगमं । यावद्योगमनुपरिवर्त्य प्रातश्चंद्रं पूर्वायाः प्रो-
ष्ठपदायाः समर्पयति । इह पूर्वप्रोष्ठपदानक्षत्रस्य प्रतिचंद्रेण सह प्रथमतया योगः प्रवृत्तः सन्
पूर्वभागमुपयाति तथा चाह । ता पुव्वा इत्यादि । ता समर्प्पणादनंतरं पूर्वप्रोष्ठपदानक्षत्रं खलु पूर्वभागं समक्षे-
त्रं त्रिंशन्मुहूर्त्तान् तत्प्रथमतया प्रातश्चंद्रेण सह योगं युनक्ति तत्र यथोक्तं सन्नक्तं प्रातःसमयात् पूर्वं
सकलं दिवसमपरां च रात्रिं यावद्वर्त्तते । एतदेवोपसंहारव्याजेनाह । एवं खल्वित्यादि सुगमं
यावद्योगमनुपरिवर्त्य प्रातश्चंद्रमुत्तरयोः प्रोष्ठपदयोः समर्पयति । इदं किलोत्तराभद्रपदाख्यं नक्ष-
त्रमुभयभागं प्रकारेण प्रातश्चंद्रेण सह योगमधिगच्छति । केवलं प्रथमा पंचदश मुहूर्त्तान् अधिकानप-
नीय समक्षेत्र कल्पयित्वा यदा योगं ब्रुवति तदा नक्तमपि याशोसात्फलयत् गमवसेयं तथा चाह । ता
इत्यादि । ततः समर्प्पणादनंतरं प्रोष्ठपदानक्षत्रं खलु तदपरं भागं सार्द्धक्षेत्रं पंचचत्वारिंशन्मुहूर्त्तान् तत्प्रथमतया
योगप्रथमतया प्रातश्चंद्रेण सार्द्धं योगं युनक्ति तत्र यथोक्तं सन्नक्तं सकलमपि दिवसमपरां च रात्रिं ततः पश्चा-
द्दिवसमपरं दिवसं यावद्वर्त्तते । एतदेवोपसंहारव्याजेनाह । एवं खल्वित्यादि सुगमं । याव ८३

---

द्योगमनुपरिवर्त्य सायंसमये चंद्रं रेवत्याः समर्पयति । ७ । ततो रेवतीनक्षत्रं सायंसमये चंद्रेण सह योगमधि-
गतं सत् पश्चाद्भागमवसेयं तथा चाह । ता रेवई इत्यादि । ता इति ततः समर्प्पणादनंतरं रेवतीनक्षत्रं चंद्रेण संयुक्तं स- क
त् सायंसमयात् पूर्वं सकलां रात्रिमपरं च यावच्चंद्रेण सह युक्तमवतिष्ठते समक्षेत्रत्वात् एतदेवोपसंहारव्या-
जेनाह । एवं खल्वित्यादि सुगमं । यावद्योगमनुपरिवर्त्य सायंसमये चंद्रमश्विन्याः समर्पयति । ८ । ततः इदमश्व-
िनीनक्षत्रं सायंसमये चंद्रेण सह युज्यमानत्वात् पश्चाद्भागमवसेयं तथा चाह । ता इत्यादि सुगमं नवरमि-
दमपि अश्विनीनक्षत्रं समक्षेत्रत्वात् सायंसमयादारभ्य तां सकलां रात्रिमपरं च दिवसं यावच्चंद्रेण स-
ह युक्तमवतिष्ठते । एतदेवोपसंहारव्याजेनाह । एवं खल्वित्यादि सुगमं यावद्योगमनुपरि-
वर्त्य सायं प्रायः परिस्फुटनक्षत्रमालालोकसमये चंद्रं भरण्याः समर्पयति । ९ । इदं च भरणीनक्ष-
त्रमर्द्धक्षेत्रत्वात् रात्रौ चंद्रेण सह योगमुपैति ततो नक्तंभागमवसेयं तथा चाह । ता भरणी इत्यादि पाठसिद्धं नव-
रमिदमपार्द्धक्षेत्रत्वात् पंचदशमुहूर्त्तान् परिसमापयति । ततो नक्तं चंद्रेण सह युक्तमपरं दिवसं तावदेतदेवोप-
संहारव्याजेनाह । एवं खल्वित्यादि सुगमं । यावद्योगमनुपरिवर्त्य प्रातश्चंद्रं कृत्तिकायाः समर्पयति
। १० । इदं च कृत्तिकानक्षत्रमुभयभागं प्रातश्चंद्रेण सह योगमुपैति ततः उभयभागमवसेयं एतदेवाह । ता
कत्तिया इत्यादि सुगमं नवरमिदं समक्षेत्रत्वात् प्रातःसमयात् पूर्वं सकलं दिवसं ततः परमपरां च रात्रिं परिसमापयति चंद्रे ।

सूर्यप्र.वृत्ति ११८४

णसव्वयुक्तं वर्त्तते। एतदेवोपसंहारद्वारेण स्पष्टीकरोति। एवं खल्वित्यादि सुगमं यावद्योगमुपसंक्रामति
यातश्चाऽगारोहिण्या समर्प्पयति॥७॥ इदं च कृत्तिकानक्षत्रमर्द्धक्षेत्रमतः प्रागुक्तयुक्तिवशादुभयभागं
प्रतिपन्नव्यं रोहिणीं जलनक्षत्रं यच्चिन्नो रोहिणी यथाप्राग्नक्षत्रमुपदर्शितं तथावक्तव्यासा च्चैवं तारोहि
णीखलु नक्षत्रमुभयभागं दिवढ्ढखेत्रं पणयालीसमुहुत्तं प्रथममायान्ति पाता चंदेण सद्धिं जोयं जो
एइ अवरं च राइंततो पच्छा अवरं दिवसं एवं खलु रोहिणी नक्खत्ता दो दिवसे एगं च राइं चंदेण सद्धिं जोयं
जोएइ जोगं जोइत्ता जोगं अणुपरियट्टइ दुजोगं अणुपरियट्टित्ता सायं चंदं मिगसिरस्स समप्पेइ
॥७॥ मिगसिरं जहा धणिट्ठा। मृगशिरो नक्षत्रं यथा प्राक् धनिष्ठा तथा वक्तव्या तद्यथा॥ तामि
गासिरनक्खत्तं पच्छंभागं तीसइमुहुत्तं पढमयाए सायं चंदेण सद्धिं जोएइ सायं चंदेण सद्धिं जो
गं जोइत्ता ततो पच्छा अवरं दिवसं एवं खलु॥ मिगसिरनक्खत्ते एगं राइं एगं च दिवसं चंदेण सद्धिं जोयं जो
एइ जोगं जोइत्ता जोगं अणुपरियट्टइ जोगं अणुपरियट्टित्ता सायं चंदं अद्दाए समप्पेइ। अत्र सायमिति प्रा
यः परिस्फुटनक्षत्रमंडलालोकसमये अत्र एवेतन्नक्षत्रं नागंतव्यावाह॥ अद्दा जहा सयभिसया। आर्द्रायथा प्रा
क् शतभिषग्भिहितात थाभिधातव्या। सा चैवं। ता अद्दा खलु नक्खत्ते नत्तं भागे अवड्ढखेत्ते पन्नरसमुहुत्ते १८४
पढमयाए सायं चंदेण सद्धिं जोयं जोएइ। नो लभइ अवरं दिवसं एवं खलु अद्दा एगं राइं चंदेण सद्धिं जोयं जो

एइ जोयं जोइत्ता जोयं अणुपरियट्टइ जोयं अणुपरियट्टित्ता पातो चंदं पुणव्वसूणं समप्पेइ॥७॥ इदं पुनर्वसुन
क्षत्रमपि कृत्स्नमुभयभागमवसेयं तथा चाह। पुणव्वसू जहा अस्सेसा दिवसा भाग्यं पुनर्वसुन्नक्षत्रं य
था प्राग्नक्षत्रमुपदर्शितं तथा वक्तव्यं तच्चैवं। ता पुणव्वसू खलु नक्खत्ते उभयभागे दिवड्ढखेत्ते पणयाली
समुहुत्ते तप्पढमयाए पातो चंदेण सद्धिं जोयं जोएइ अवरं च राइं ततो पच्छा अवरं दिवसं एवं खलु पुणव्वसू नक्ख
त्ते दो दिवसे एगं च राइं चंदेण सद्धिं जोयं जोएइ। जोगं जोइत्ता जोगं अणुपरियट्टइ जोगं अणुपरियट्टित्ता।
सायं चंदं पुस्सस्स समप्पेइ॥७॥ इदं च पुष्यन क्षत्रं सायं समये दिवसावसाने रूपं चंद्रेण सह योगमधिग
च्छति। ततः पश्चाद्भागमवसेयं। तथा चाह पु स्सो जहा धणिट्ठा पुष्यो यथा प्राक् धनिष्ठाभिहितात था
भिधातव्यो ता पुस्से खलु नक्खत्ते पच्छंभागे समक्खेत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण स
द्धिं जोयं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टइ जोगं अणुपरियट्टित्ता सायं चंदं अस्सेसाए समप्पेइ॥७॥
इदं चाश्लेषा नक्षत्रं सायं समये परिस्फुटनक्षत्रमंडलालोके रूपप्राप्ते चंद्रेण सह योगमुपैति। ततः इदं नक्ष
त्रं नागमवसेयं अत्र पार्द्धक्षेत्रत्वात्तस्य अपरवर्त्ताद्योगं परिसमापयति। तथा चाह। अस्सेसा जहा सय
भिसया। यथा प्राक् शतभिषग्भागे निहिता तथा अश्लेषापि वक्तव्या। सा चैव। ता अस्सिलेसा खलु नक्खत्ते नत्तं भा
गे अवड्ढखेत्ते पन्नरसमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं जोयं जोएइ जोयं जोइत्ता नो लभइ अवरं दिवसं

सूर्यप्रज्ञप्ति
८५

वं खलु असलेसा नक्खत्ते एगं राइंदियं चंदेण सद्धिं जोगं जोएइ । जोयं जोइत्ता जोगं अणुपरियट्टइ । जोगं अणुपरि
यट्टित्ता पाओ चंदं मघाणं समप्पेइ ॥ ८ ॥ इदं च मघानक्षत्रमुक्तयुक्त्या प्रातश्चंद्रेण सह योगमुपैति ततः पूर्वसंध्या
मवसातव्यं विवादिः । मघायाः पूर्वफाल्गुनी तथा दृष्ट्यात तथा चाह मघा खलु नक्षत्रं हि द्विः बलागसमक्षेत्र
तीसइमुहुत्ते तप्पढमयाए पाओ चंदेण सद्धिं जोयं जोएइ । ततो पच्छा अवरं राइं । एवं खलु मघा नक्खत्ते एगं दिवसं
एगं च राइं चंदेण सद्धिं जोयं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टइ जोगं अणुपरियट्टित्ता पाओ चंदं पुव्वा
फग्गुणीणं समप्पेइ ॥ ९ ॥ इदमपि पूर्वफा । ल गुनी नक्षत्रं प्रातश्चंद्रेण सह योगमुपक्रमते तस्मात् समधिकृते
। ततः पूर्वसंध्यागमप्रत्यतव्यात तथा चाह । पुव्वा फ ग्गु णीइत्यादि उत्तरसूत्रवद्व्याख्येयं । यथा प्राक् पूर्वसंध्यापदादिविहिता
तथा पूर्वफाल्गुन्यपि सिद्धांत द्रष्टव्यात तथा चाह । पुव्वा फग्गुणी खलु नक्खत्ते उभयभागे समखेत्ते तीसइमुहुत्ते
तप्पढमयाए पाओ चंदेण सद्धिं जोयं जोएइ । ततो पच्छा अवरं राइं एवं खलु पुव्वाफग्गुणी नक्खत्ते एगं च दिवसं
एगं च राइं चंदेण सद्धिं जोगं जोएइ जोगं जोइत्ता जोगं अणुपरियट्टइ जोगं अणुपरियट्टित्ता पाओ चंदं उत्तरा
णं फग्गुणीणं समप्पेइ ॥ १० ॥ एतच्चोत्तराफाल्गुनीनक्षत्रं समक्षेत्रमतः प्रागुक्तयुक्त्या उभयभागीवर्त्तते
तथा चाह । उत्तरा फग्गुणी जहा उत्तरभद्दवया । यथा प्राग् उत्तरभद्रपदोक्ता तथा उत्तराफाल्गुन्यपि वक्तव्या । सा चैवं उत्तरा
फग्गुणी खलु नक्खत्ते उभयभागे दिवड्ढखेत्ते पणयालीसइमुहुत्ते तप्पढमयाए पाओ चंदेण सद्धिं जोयं जोएइ । अवरं च राइं ततो पच्छा
८५

अवरं च दिवसं एवं खलु उत्तराफग्गुणी नक्खत्ते दो दिवसे एगं च राइं चंदेण सद्धिं जोयं जोएइ । जोगं जोइत्ता जोगं अणु
परियट्टइ । जोगं अणुपरियट्टित्ता सायं चंदं हत्थस्स समप्पेइ ॥ ११ ॥ इदं च हस्तनक्षत्रं सायं दिवसावसानसमये चंद्रे
ण सह योगमुपैति । ततः पश्चाद्भागमवसेयं चित्रानक्षत्रं किंचित्समधिके दिवसावसाने चंद्रयोग
मुपैति ततः सदा पश्चाद्भागं मतं नादन्यादृशं हि वा चित्रा त्वर्द्धक्षेत्रा । यथा धनिष्ठा तथा वाह सा चैवं
वक्तव्या तथा चाह हत्थे खलु नक्खत्ते पच्छंभागे समखेत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण
सद्धिं जोगं जोएइ । ततो पच्छा अवरं दिवसं । एवं खलु हत्थ नक्खत्ते एगं राइं एगं च दिवसं चंदेण सद्धिं जो
गं जोएइ जोगं जोइत्ता जोगं अणुपरि यट्टइ । जोगं अणुपरियट्टित्ता सायं चंदं चित्ताए समप्पे
इ त्ति ॥ १२ ॥ चित्ता खलु नक्खत्ते पच्छंभागे सम खेत्ते तीसइमुहुत्ते तप्पढमयाए सायं चंदेण सद्धिं
जोयं जोएइ । ततो पच्छा अवरं दिवसं एवं खलु चित्ता । नक्खत्ते एगं राइं एगं च दिवसं चंदेण सद्धिं जोयं जोएइ । जोयं
जोइत्ता जोगं अणुपरियट्टइ । जोयं अणुपरियट्टित्ता सायं चंदं साईए समप्पेइ ॥ १३ ॥ स्वातिश्च सायंप्राये । परि
स्फुटदृश्यमाननक्षत्रमंडलरूपे चंद्रेण सह योगमुपैति ततः इयं नक्तंभागा प्रत्येया तथा चाह । साई जहा सय
भिसया । यथा शतभिषक् प्रागवक्तव्या । सा चैवं साई खलु नक्खत्ते नत्तंभागे अवड्ढखेत्ते पन्नरसमुहुत्ते तप्पढमया जोयं
ए सायं चंदेण सद्धिं जोयं जोएइ नो लभइ अवरं दिवसं । एवं खलु साई नक्खत्ते एगं राइं चंदेण सद्धिं जोएइ जोगं जो

MEMORIAL

इत्ताजोगंअणुपरियट्टइजोगंअणुपरियट्टित्तापातोचंदंविसाहाणंसमप्पेइ॥७॥इदंचविसाहानक्खत्तंउभयंदिवड्ढखेत्तमत
।प्राग्रकृत्युक्तिवशाड्ढसयसागमवगंतव्यं।तथाचाह।विसाहाखलुनक्खत्तंउभयंभागंजहापदातथाविशा।
खावक्तव्या।तद्यथा।ताविसाहाखलुनक्खत्तंउभयंभागंदिवड्ढखेत्तंपणयालीसमुहुत्तेतप्पढमयाए
पातोचंदेणसद्धिंजोयंजोएइअवरंचराइंततोपच्छाअवरंदिवसंएवंखलुविसाहानक्खत्तेएगंदिवसंएगंचराइंचं
देणसद्धिंजोगंजोएइजोगंजोइत्ताजोगंअणु परियट्टइजोगंअणुपरियट्टित्तासायंचंदंअणुराहाणंसमप्पेइ
॥८॥ततएवमणुराधानक्खत्तंसायंसमायदिवि सावसानत्वपर्वंपरेणसद्धायोगमुपैतीतिपश्चाद्भागमवसे
यं।तथाचाह।अणुराहाजहाधणिट्ठा। यथाधनिष्ठातथाऽनुराधावक्तव्या।साचैवं।अणुराहाखलु
नक्खत्तंपच्छाभागंसमखेत्तंतीसमुहुत्तं। तप्पढमयाएसायंचंदेणसद्धिंजोगंजोएइ।ततोपच्छाअवरंदि
वसंएवंखलुअणुराहानक्खत्तेएगंराइंएगंच दिवसं।चंदेणसद्धिंजोगंजोएइजोगंजोइत्ताजोगंअणुपरिय
ट्टइजोगंअणुपरियट्टित्तासायंचंदंजिट्ठाएसमप्पेइ॥९॥ज्येष्ठायाःसायंसमायसमर्प्यतइतिप्रायापरि
स्फुटंदृष्टमाननक्षत्रमंडलंततइदंज्येष्ठानक्षत्रंनक्तंभागमवसेयं।तथाचाह।जिट्ठाजहासयभिसयायथाश
तभिषक्तथाज्येष्ठावक्तव्या।तद्यथा।ताजेट्ठाखलुनक्खत्तेनत्तंभागेअवड्ढखेत्तेपन्नरसमुहुत्तेतप्पढमयाए
सायंचंदेणसद्धिंजोगंजोएइनोलभइअवरंदिवसंएवंखलुजिट्ठानक्खत्तेएगंराइंचंदेणसद्धिंजोगंजोएइजोगंजोइत्ता ८६

---

जोगंअणुपरियट्टइजोगंअणुपरियट्टित्तापातोचंदंमूलस्ससमप्पेइ॥१०॥मूलनक्षत्रंचेदमुक्तयुक्त्याप्रातश्चंद्रेणस
हयोगमुपागच्छत्पूर्वभागमवसेयं।तथाचाह।मूलाजहापुव्वभद्दवया।यथापूर्वभद्रपदातथामूलनक्षत्रमपिवक्तव्
यं।ताचेवंतामूलेखलुनक्खत्तेपुव्वंभागेसमखेत्तेतीसइमुहुत्तेतप्पढमयाएपातोचंदेणसद्धिंजोगंजोएइततो
पच्छाअवरंचराइं।एवंखलुमूलनक्खत्तेएगंचदिवसंएगंचराइंचंदेणसद्धिंजोगंजोएइजोगंजोइत्ताजोगंअणुपरिय
ट्टइजोगंअणुपरियट्टित्तापातोचंदंपुव्वासाढाणं समप्पेइ॥११॥इदमपिपूर्वाषाढानक्षत्रंप्रातश्चंद्रेणसहयोगमु
पयुक्त्यासमुपैतीतिपूर्वभागंविज्ञेयं।एत दिवाह।पुव्वासाढाजहापुव्वभद्दवया।यथापूर्वभद्रपदातथापूर्वा
षाढावक्तव्या।साचैवं।तापुव्वासाढाखलु नक्खत्तेपुव्वंभागेसमखेत्तेतीसइमुहुत्तेतप्पढमयाएपा
तोचंदेणसद्धिंजोगंजोएइअवरंचराइं।एवंख लुपुव्वासाढानक्खत्तेएगंचदिवसंएगंचराइंचंदेणसद्धिंजोगं
जोएइजोगंजोइत्ताजोगंअणुपरियट्टइजो गंअणुपरियट्टित्तापातोचंदंउत्तरासाढाणंसमप्पेइ॥१२॥उत्तराषा
ढानक्षत्रंचप्रागुक्तयुक्त्याउभयंभागमवसेयं।तथाचाह।उत्तरासाढाजहा।उत्तरभद्दवया।यथोत्तरभद्रपदा
तथोत्तराषाढावक्तव्या।तद्यथा।उत्तरासाढाखलुनक्खत्तेउभयंभागेदिवड्ढखेत्तेपणयालीसमुहुत्तेतप्प
ढमयाएपातोचंदेणसद्धिंजोगंजोएइअवरंचराइंततोपच्छाअवरंदिवसंएवंखलुउत्तरासाढानक्खत्तेदोदि
वसेएगंचराइंचंदेणसद्धिंजोगंजोएइजोगंजोइत्ता।जोगंअणुपरियट्टइजोगंअणुपरियट्टित्तासायंचंदम

सूर्य०वृत्ति
८७

त्रिंईसवणाणं समप्पेइ॥३॥ तदेवं बाहुल्यमधिकृत्योक्तप्रकारेण यथोक्तेषु कालेषु नक्षत्राणि चंद्रेण सह योगमुपयांतीति
तःकानि दिवसभागानि कानि दिनूपस्थानभागानि कानि दिनक्तंभागानि कानि दिवडस्थलभागानि तेऽक्रामीति॥४॥इ
ति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य चतुर्थं प्राभृतप्राभृतं समाप्तं॥४॥ तदेवमुक्तं
दशमस्य प्राभृतस्य चतुर्थं प्राभृतप्राभृतं संप्रति पंचममारभ्यते तस्य चायमर्थाधिकारो यथा कुलानि वक्तव्यानीति
तस्मादर्थविषयं प्रश्नसूत्रमाह॥५॥ ता कहं ते इत्यादि ता इति पूर्ववत् कथं केन प्रकारेण भगवन्त्वया कुलान्याख्या·
तानीति वदेत् एवमुक्ते भगवानाह। ता बारस इत्यादि इह न केवलं भगवता कुलान्येवाख्यातानि किंतूपकुलानि कु-
लोपकुलानि चाततानि घरिमोर्धप्रतिप ख्यातं त्वेति भगवान् सूत्रे तत्र तेषां कुलादीनां मध्ये स्वल्पि
मानि द्वादश कुलानि। सूत्रे पुंस्त्वनिर्देशः प्राकृतत्वात्। इमे इति च। प्रतिपदमभिसंबध्यते। इमानि वक्ष्य-
माणस्वरूपाणि द्वादश उपकुलानि इमानि वा क्ष्यमाणस्वरूपाणि चत्वारि कुलोपकुलानि प्रज्ञप्तानि। अथ
किं कुलादीनां लक्षणमुच्यते इह यैर्नक्षत्रैः प्रायः सदा मासानां परिसमाप्तय उपजायंते माससदृशना-
मानि च तानि नक्षत्राणि कुलानीति प्रसिद्धानि तद्यथा श्राविष्ठो मासः प्रायः श्रविष्ठया धनिष्ठापरपर्यायया प-
रिसमाप्तिमुपैति॥२॥ भाद्रपदः उत्तरभद्रपदया अश्वयुक् अश्विन्या इति धनिष्ठादीनि प्रायो मासपरिसमापका-
नि माससदृशनामानि कुलानि। तेषामेव कुलानामधस्तनानि यानि नक्षत्राणि श्रवणादीनि तानि उपकु- ८७

लानि समीपमुपकुलं तत्र वर्तितया यानि नक्षत्राणि तान्युपवारा उपकुलानि यानि च कुलानि उपकुलानां चाध-
स्तनानि तानि कुलोपकुलानि अभिजिदादीनि चत्वारि नक्षत्राणि। उक्तं च। मासाणं परिणामा होंति कुला उवकुला
उ हेट्ठिमगा। होंति पुण कुलोवकुला अभिइसयभद्दअणुराहा॥१॥ अत्र मासाणं परिणामा इति प्रायो मासानां परि-
समापकानि किं विशिष्टानि मासाणं सरिसनामा इति पाठः सूत्रे मासानां सदृशनामानीति व्याख्येयं। सय इति शतभिषक्
शेषं सुगमं। नवरं तिथ्यानि द्वादश कुलानि यानि। च द्वादश उपकुलानि च चत्वारि कुलोपकुलानीति तानि।
क्रमेण कथयति। बारस कुला तं जहा इत्या दि सुगमं॥५॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्ति-
टीकायां दशमस्य प्राभृतस्य पंचमप्राभृ तप्राभृतं समाप्तं॥५॥ तदेवमुक्तं दशमस्य प्राभृतस्य पं-
चमप्राभृतप्राभृतं संप्रति षष्ठमारभ्यते त- स्य चायमर्थाधिकारो यथा पौर्णमास्योऽमावास्याश्च व-
क्तव्या इति ततस्तद्विषयं प्रश्नसूत्रमाह। ता कहं ते इत्यादि। ता इति पूर्ववत् कथं केन प्रकारेण कति नक्षत्रे-
ण परिसमाप्यमाना इत्यर्थः॥ पौर्णमास्य आख्याता॥ अत्र पौर्णमासीग्रहणममावास्योपलक्षणं तेन कथ-
ममावास्या अप्याख्याता इति वदेत्। एवमुक्ते भगवानाह॥५॥ ता बारस इत्यादि तत्र तासां पौर्णमासीनाममावा-
स्यानां च मध्ये ज्ञातिभेदमधिकृत्य स्वल्पा इमा द्वादश पौर्णमास्यो द्वादश अमावास्याः प्रज्ञप्ताः तद्यथा श्रा-
विष्ठी प्रोष्ठपदी इत्यादि तत्र श्रविष्ठा धनिष्ठा तस्यां भवा श्राविष्ठी श्रावणमासभाविनी प्रोष्ठपदा उत्तरभद्रपदा

तस्मांलवा प्रोष्ठपदी भाद्रपदमाससत्ताविनी । अश्वयुजितवा आश्वयुजी अश्वयुङ्मासभाविनी । एवं मासक्रमेण
तत्तन्नामानुरूपनक्षत्रयोगात् शेषा अपि वक्तव्याः ॥ ॥ संप्रति यैर्नक्षत्रैर्ये ते काः पौर्णमासीः परिसमाप्यते ।
तानि पिपृच्छिषुराह ॥ ता ॥ ता साविट्ठिन्नमित्यादि । ता इति पूर्ववत् श्राविष्ठीं पौर्णमासीं कति नक्षत्राणि युंजंति क
ति नक्षत्राणि युंजंति कतिभिर्नक्षत्रैः सह संयुज्य परिसमापयंति भगवानाह । ता ति न्नि इत्यादि । ता इति पूर्ववत् त्रीणि नक्षत्राणि
युंजंति त्रीणि नक्षत्राणि चाइणसहयथा । योगं संयुज्य परिसमापयंति तद्यथा अभिजित् श्रवणो धनि
ष्ठा चाइह श्रवणधनिष्ठा हृषस्थपवत नक्षत्र श्रा विष्ठीं पौर्णमासीं परिसमापयतः । केवलमभिजिन्नक्षत्रं
श्रवणेन सह संबद्धमिति तदपि परिसमा पयतीत्युक्तं । कथमेतदवसीयते इति चेदुच्यते । इहैव
वचनप्रसिद्धममावास्यापि प्रथमासाविषय चंद्रयोगपरिज्ञानार्थमिदं करणं तानि संदर्श्य माघमावास्याभं
इदं सिद्धिं करणं होई रिक्कम्मि अवरांहवावि । आतत्रियद्ध्रुव हिं सगुणए ॥ १ ॥ छावट्ठी य मुहुत्ता विसट्ठि भागाय
पंचय पडिपुन्ना । वासट्ठिभागसत्तट्ठिगाय एक्का हवइ भागा ॥ २ ॥ एयमवहारशसिं इच्छममावा संगुणं कुज्जा त
स्कवाणपुन्नासोहणगविहिं निसामेह । बावीसं च मुहुत्ता बायालीसं बिसट्ठि भागाय ॥ ३ ॥ पयं पुणव्वसुस्सय ।
सोलसय अट्ठ वसट्ठिवं ॥ ४ ॥ बावत्तरं सयं फग्गुणीण । बाणउया विसाहासु । चत्तारिय बायाला सोझा अह उ
त्तरासाढा ॥ ५ ॥ एयं पुणव्वसुस्सय विसट्ठिभागसहियं तु सोहणगं । एतो अभिईआइं बिइयं तु छाभिसाहण ९८

गं ॥ ६ ॥ अभिइस्स नव मुहुत्ता बिसट्ठिभागा य हुंति चउवीसं । छावट्ठीय समत्ता भागासत्तट्ठिछेयकया ॥ ७ ॥ उगुणट्ठ
ं पोट्ठवया तिसु चेव नउत्तरेसु रोहिणिया । तिसु नवनवएसु भवे पुणव्वसू फग्गुणीओ य ॥ ८ ॥ पंचेव उगुणपन्नं पोट्ठवया तिसु चेव नउत्तरेसु चेव उगु
णपन्नं सयाइं उगुणुत्तराइं छच्चेव । सोज्झाणि विसाहासुं मूले सत्तेव चोयाला ॥ ९ ॥ अट्ठसय उगुणवीसा सो
हणगं उत्तराणसाढाणं । चउवीसं खलु भागा छावट्ठी चुण्णियाओ य ॥ १० ॥ एयाइं सोहइत्ता जं सेसं तं हवेज्ज नक्ख
त्तं । इह अंकाइ हव्वसु वइस्स हत्थस्स अमावासं ॥ ११ ॥ इच्छापुन्निमगुणिओ अवहारो सो उ होइ कायव्वो । तं चेव
य सोहणगं अभिईआइं तु कायव्वं ॥ १२ ॥ सुद्धं मि य सोहणगे जं सेसं तस्स विकृत्य नक्खत्तं तत्थ य काउं उ
डुवइ पडिपुन्नं पुन्निमं विउलं ॥ १३ ॥ एता । संग्रहगाथा अक्रमेण व्याख्या ॥ या ममावास्यामिह युगे
ज्ञातुमिष्टा इष्यते । अस्मिन्नक्षत्रे वर्तमाना परिसमाप्ता भवतीति ताव ज्ञेयातिवंत्यो ऽमावास्या अतिक्रां
तास्तावत्या संख्यायामल्पध्रुवक्र्यमाणं ध्रुवकं गुणयेत । प्रथमतया वाच्यते इत्थव क्षयोर्द्धवराशिस्समा
ख्याति हि पंचहस्रा दोसा पथिवाच उ विन्नत्याधक नपदवा ततनं स गुणण तू अं भीकिं प्रमाण सा व व क्षायों
हि पिंतितत्प्रमाण निरूपणार्थमाह ॥ ता ॥ छावट्ठी गाहा । षट्षष्टिमुहूर्त्ता एकस्य च मुहूर्तस्य पंच परिपूर्णा द्वाषष्टि
भागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभागः ॥ एतावत्प्रमाणो ध्रुवक्षयराशिः । कथमेतावन्मा
त्रस्य प्रमाणस्योत्पत्तिरिति चेदुच्यते । इह यदि चतुर्विंशत्यधिकेन पर्वशतेन पंच सूर्यान् नक्षत्रपर्यायान् लभ्यंते

सूर्यप्र०वृत्ति ततो द्वासौ पर्वस्य किं लभामहे । राशित्रयस्थापना ॥ १२४ । ५ । १ । अत्रांत्येन राशिना द्विकलक्षणेन मध्यराशिः पंच
९९ लक्षणो गुण्यते जाता दश । तेषां चतुर्विंशत्यधिकेन शतेन भागहरणं तत्र छेद्यछेदकराश्योर्द्विकेनापवर्त्तना
क्रियते जात उपरितनो राशिः पंचकरूपोऽधस्तनो द्वाषष्टिरूपः लब्धाः पंच द्वाषष्टिभागाः । एतेन नक्षत्राणि कर्त्त
व्यानीति नक्षत्रकरणार्थमष्टादशभिः शतैस्त्रिंशदधिकैः सप्तषष्टिभागरूपैर्गुण्यते जातान्येकचत्वारिंशच्छ
तानि चतुःपंचाशदधिकानि ॥ ४१५४ उपरितनराशिस्तु [illegible] त्रिंशता गुण्यते जाते द्वे लक्षे चतुःस
प्ततिसहस्राणि पंचशतानि ॥ २७४५०० तेषां चतुःपंचाशदधिकैकचत्वारिंशच्छतैर्भागहरणं लब्धाः षट्षष्टिर्मु
हूर्त्ताः । शेषमुद्धरति त्रीणि शतानि षट्त्रिंशदधिकानि ॥ ३३६ ततो द्वाषष्टिभागानयनार्
थं तानि द्वाषष्ट्या गुण्यंते जातानि विंशतिसहस्राणि अष्टौ शतानि द्वात्रिंशदधिकानि ॥ २०८३२ तेषामनंतरो
क्तेन छेदराशिना ४१५४ भागो ह्रियते लब्धाः पंच द्वाषष्टिभागाः । शेषास्तिष्ठन्ति द्वाषष्टिः । ततस्तस्य द्वाषष्ट्या अपव
र्त्तना क्रियते जात एककः । छेदराशेरपि द्वाषष्ट्यापवर्त्तनायां लब्धाः सप्तषष्टिः । तत आगतं षट्षष्टिर्मुहूर्त्ता एकस्य
च मुहूर्त्तस्य पंच द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभाग इति तावदेव मुहूर्त्तमेव ध्रुवराशिप्रमाणं
संप्रति शेषविधिमाह । ७ ॥ एयमवहारत्था दि । एतमनंतरोदितस्वरूपमवधार्यराशिमिष्टामावास्यासंगुणयाम
मावास्यां ज्ञातुमिष्टमिति संख्यया गुणितं कुर्यात् । अतः कर्त्तव्यनक्षत्राणि शोधनीयानि । ततोऽतः करणेन नक्षत्राणां ९९

त्वा शोधनकविधिं शोधनकप्रकारं वक्ष्यमाणं निवृत्तमयन्तु आकर्णय तत्र प्रथमतः पुनर्वसुशोधनकमाह बावी
सावत्तादि गाथा । द्वाविंशतिमुहूर्त्ता एकस्य च मुहूर्त्तस्य षट्चत्वारिंशद्द्वाषष्टिभागाः । एतदेतावत्प्रमाणं पुनर्व
सुनक्षत्रस्य प्रतिपूर्णत्वे ति । अत्र भावना कथमेवं प्रमाणस्य पुनर्वसुशोधनकस्योत्पत्तिरिति चेदुच्यते इह युगादिचतुर्विंश
त्यधिकेन पर्वशतेन पर्वसूर्यर्त्तस्वप्रमाथि लभ्यते तदेकं पर्वातिक्रम्य कति पर्याया स्युरेकेन पर्वणा लभ्य
ते राशित्रयस्थापना ॥ १२४ । ५ । १ । अत्रांत्येन राशिना एककलक्षणेन मध्यराशिः पंचकरूपो गुण्यते जाता
: पंचैव पंचका एकेन गुणितं तदेव भवतीति वचनात् । तेषां चतुर्विंशत्यधिकेन शतेन भागो ह्रियते तत्र
: पंच चतुर्विंशत्यधिकशतभागाः स्युरित्यन्तं नक्षत्रानयनायमेतेऽष्टादशभिः शतैस्त्रिंशदधिकैः सप्त
षष्टिभागरूपैर्गुणयितव्या इति गुणकारस्थो दशराश्योर्द्विकेनापवर्त्तना जातो गुणकारराशिर्नवशतानि
पंचदशोत्तराणि । ९१५ छेदराशिर्द्वाषष्टिः । ६२ ततः पंच नवभिः पंचदशोत्तरैः शतैर्गुण्यंते जातानि पंच
चत्वारिंशच्छतानि पंचसप्तत्यधिकानि ४५७५ छेदराशिर्द्वाषष्टिलक्षणः सप्तषष्ट्या गुण्यते जातान्येकचत्वारि
शच्छतानि चतुःपंचाशदधिकानि ॥ ४१५४ तत्र पूर्वस्य राशेरमुना विंशतिः सप्तषष्टिभागाः प्राक्तनयुगचर
मपर्वणि सूर्यनक्षत्रयोगमायाति । ततो द्वाषष्ट्या गुण्यते जातानि चतुर्दश शतानि षड्विंशत्यधिकानि ॥ १४
२६ तानि प्राक्तनात्पंचसप्तत्यधिकपंचचत्वारिंशच्छतप्रमाणाद्राशेः शोध्यंते शेषं तिष्ठति एकत्रिंशच्छतानि एको

सूर्य० वृत्ति
१२००

तपंचाशदधिकानि ३४५ एतावतो निमुहूर्त्तानियतार्द्धं त्रिंशता गुणं पंचशतानि चतुर्दशतिसहस्राणि चत्वारिंशता
तिसप्तत्यधिकानि ॥ १४५०७ एतावतां मुहूर्त्तानां चतुःपंचाशदधिके कचत्वारिंशद्भूतरूपणासागा शियतलब्धा
विंशतिमुहूर्त्ताः शेषं तिष्ठति त्राणि सहस्राणि षडशीत्यधिकानि ३०८६ एतानि द्वाषष्टिभागकरणार्थं द्वाषष्ट्या गुण
तानि जातान्येकं लक्षमेकनवतिः सहस्राणि चतुरशीत्यधिकानि १९१८४ तेषां छेदराशिना ॥ १४५४ भागो ह्रि
यते लब्धा ॥ चत्वारिंशन्मुहूर्त्तस्य द्वाषष्टिभागाः ॥ पश्चात् नक्षत्रं शोधनकानि ॥ शोधनका
नि तान्याह ॥ १ ॥ वा चत्वारिंसय मित्यादि ॥ सप्तर्त्तं त्रिसप्तत्यधिकं शतं फाल्गुनीनां उत्तर फाल्गुनी
नां शोध्यं किमुक्तं भवति त्रिसप्तत्याधिकन शतेन पुनर्वसुप्रभृतीन्युत्तरफाल्गुनीपर्यन्तानि नक्षत्राणि
शुध्यंति । द्वे शते नवाधिके विशाखानां सप्तविंशत्यधिके शतद्वये स्वातेः शुध्यंति । एवं मुत्तराषाढापर्यन्तानि ॥
नवत्यधिकानि ३९० अथ अनंतरं मुत्तराषाढापर्यन्तानि नक्षत्राणि शुध्यंति चत्वारिंशतानि षोडशाधिका
नि ४१६ शतायं पूर्वं णत्वादिगाथा पद द अतः ताराकं शोधनकं सकलमपि पुनर्वसु स्य द्वाषष्टिभाग सहितमवसेयम
तत्र उक्तं भवति । यत् पुनर्वसुसका द्वाविंशति मुहूर्त्ताः सम्बपि तत्र सम्बन्धिनः शोधनाकत्वेनः प्रतिष्ठाः पूर्वं तत्र
द्वाषष्टिभागसमेता य ॥ अथ शोधनं धिमार्च तत्र पुनर्वसु सका ॥ षट्चत्वारिंशद्द्वाषष्टिभागा उपरितनास्थाप
नीया इति । एतच्च पुनर्वसुप्रभृत्युत्तराषाढापर्यन्तं प्रथमं शोधनकं । अतः कदंमसिद्धिनामाद्धि कत्वादि द्वितीयं शो १००

तनकं वक्ष्यामि तत्र पश्चिमं विज्ञातमेवं विवक्षितं यति ॥ ८ ॥ अभिजित इत्यादि गाथाचतुष्टयं ॥ अभिजितो नक्षत्रस्या
त्र नव मुहूर्त्ता एकस्य च मुहूर्त्तस्य सक्ताश्चतुर्विंशति द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सप्तष
ष्टिखंडकृता परिपूर्णाः षट्षष्टिभागाः तथा अंकानां षष्टिमेकानां षष्ट्यधिकं शतं शोध्य पदाता सर्वसप्तद
नाशोधनकं किमुक्तं भवति ॥ एकोनषष्ट्यधिकेन शतेन नाभिजिदादीनि उत्तराभाद्रपदापर्यन्तानि नक्षत्राणि
शुध्यंति ॥ एवं उत्तरं शोधनाक्तः ॥ तथा त्रिशुनावा तत्र शुद्धोऽत्र रोहिणिकादि रोहिणीपर्यन्तानि शु
ध्यंति तथा त्रिशततनवत्यधिके पुनर्वसुपर्यन्तं नक्षत्रजातं शुध्य
ति तथा एकोनपंचाशदधिकानि पंच शतानि विप्राप्य फाल्गुन्य उत्तरफाल्गुनीपर्यन्तानि
नक्षत्राणि शुध्यंति । विशाखावसानि विशाखापर्यन्तेषु नक्षत्रेषु एकोनसप्तत्यधिकानि षट्शतानि ६६९
शुध्यंति मूलपर्यन्तं नक्षत्रजातं सप्तशतानि चतुश्चत्वारिंशदधिकानि शोध्यानि ॥ ७४४ उत्तराषाढानामुत्त
राषाढापर्यन्तानां नक्षत्राणां शोधनकमष्टौ शतानि एकोनविंशत्यधिकानि ॥ ८१९ एतावन्त्यपि शोधनकान्युपरि
अभिजितो नक्षत्रस्य संबन्धिनो मुहूर्त्तस्य द्वाषष्टिभागाश्चतुर्विंशतिः सप्तषष्टिखंडरूपाः षट्षष्टिभागाः एकस्य द्वाष
ष्टिभागस्य सप्तषष्टिभागा ॥ शोधनीया ॥ एतदुक्तं भवति ॥ एतान्यनंतरोदितानि शोधनकानि यथायोगं
शोधयित्वा यच्छेषमवतिष्ठते तावत्प्रमाणे नक्षत्रे चन्द्रः करोति सूर्येण समं युतिरमावास्या

सूर्यप्र टि॥१०१

मित्ति। तदेवममावास्याविषयं चंद्रयोगपरिज्ञानार्थं करणमुक्तं। संप्रति पौर्णमासीविषयं चंद्रयोगपरिज्ञाना
र्थं करणमाह। बाउद्धाउ त्रिमित्यादि। यः इदममावास्याचंद्रनक्षत्रपरिज्ञानार्थमवधार्यराशिरुक्तः स एव
पि पौर्णमासीचंद्रनक्षत्रपरिज्ञानविधौ ईप्सितपौर्णमासीगुणितायां। पौर्णमासीस्थाने उद्दिष्टसंख्या
गुणितः कर्तव्यः। गुणिते च सति तदेव पूर्वोक्तं शोधनकं कर्तव्यं। तच्च नमसि जिवादिकं न तु तदेव किंतु
द्वाधनकेय पूर्वेषामवतिष्ठते तत इदं नक्षत्रं पौ। र्णिमास्यां युक्तं तन्निश्चेतव्यं। तथा तत्र द्वितीयां प्रमाणस्य
पूर्वापौर्णमासी विमलामिति। प्रथमपौर्णमा। सीचंद्रनक्षत्रपरिज्ञानविषयकरणगाथा ऽ त्र यावदूरास
प्रत्यसौ वसादना क्रियते। कोपिइ स्तितिगुग स्यादौ प्रथमादौ प्रथमपौर्णिमास्यां विष्टाकसि
नक्षत्रे परिसमाप्तिमुपैति तत्र षट्षष्टिमुहूर्ताः एकस्य च मुहूर्तस्य पंच द्वाषष्टिभागाः एकस्य च द्वाषष्टिभा
गस्य एकः सप्तषष्टिभागः इत्येवंरूपा ऽ वधार्यराशि स्थाप्यते। प्रथमायां किल पूर्णिमायां पृष्टमित्येकेन गुण्यते
कितगुणितं तादवस्थ्येन तिष्ठति ततस्तस्माद् शोधितो नव मुहूर्ताः एकस्य च मुहूर्तस्य चतुर्विंशतिर्द्वाषष्टिभागा एकस्य
छि द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागा इत्येवं परिमाणं शोधनकं शोधनीयं तत्र षट्षष्टेर्नव मुहूर्ताः शुद्धाः स्थिता
पश्चात्सप्तपंचाशन्मुहूर्ताः एकस्य मुहूर्तस्य पंचभ्यो द्वाषष्टिभागेभ्यः चतुर्विंशतिर्न शुद्ध्यति ततो मुहूर्तं रूपं गृही
त्वा द्वाषष्टिभागाः क्रियंते जाताः सप्तषष्टिः तेभ्यः चतुर्विंशतिः शुद्धा स्थिताः पश्चात्त्रिचत्वारिंशत् तेभ्यः एकं रूपमादाय सप्त 

षष्टिभागाः क्रियंते ते च सप्तषष्टिर्भागाः सप्तषष्टिभागेषु मध्ये प्रक्षिप्यंते जाता अष्टषष्टिः सप्तषष्टिभा
गाः तेभ्यः षट्षष्टिः शुद्धा स्थिताः पश्चात् द्वौ सप्तषष्टिभागौ। तत स्थितास्त्रिपंचाशन्मुहूर्ताः श्रवणः शुद्धः स्थिताः पश्चात्
त्रिषट्त्रिंशत् ततः इदमागतं धनिष्ठानक्षत्रस्य त्रयो मुहूर्ता एकस्य मुहूर्तस्य एकोनविंशतिः द्वाषष्टिभागा एकस्य च द्वाषष्टि
भागस्य पंचषष्टिः सप्तषष्टिभागाः शेषाः प्रथमायां पौर्णमास्यां प्रथमायां श्राविष्ठी पौर्णमासी समाप्तिमेति यदा तु द्वितीयां श्राविष्ठीं पौर्णम
सीं चिंत्यते तदा सा त्रिगुणा क्रियते तत्रायं त्रयोदशदिनादावसर
संख्या दृश्यं त्रयोदश सहस्राणि तेजाताति मुहूर्तानि अष्टाशीत्यधिकानि पंच एकस्य च मुहूर्तस्य पंच षष्टि द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सप्तषष्टिभागाः
त्रयो दश सप्तषष्टिभागाः। ततः शोधनकं अतः परमेकोनविंशत्यधिके मुहूर्तानि पंच एकस्य मुहूर्तस्य चतुर्विंशतिः द्वाषष्टिभागा एकस्य
च द्वाषष्टिभागस्य साध्वशेषषष्टिः सप्तषष्टिभागा एकोनचत्वारिंशत्। पर्यायाः शुद्धाः स्थिताः पश्चात् एकोनचत्वारिं
शन्मुहूर्ताः एकस्य च मुहूर्तस्य चत्वारिंशद्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रयोदश सप्तषष्टिभागाः ३
९।४०।१३। ततो नव मुहूर्ताः एकस्य च मुहूर्तस्य चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्
षष्टिः सप्तषष्टिभागा इति शोधनीयं तत्र शुद्धा स्थिताः पश्चात्त्रिंशन्मुहूर्ताः पंचदश मुहूर्तस्य द्वाषष्टिभागा एक
स्य च द्वाषष्टिभागस्य पंचदश सप्तषष्टिभागाः ३०।१५।१४। तेभ्यस्त्रिंशता श्रवणः शुद्धः आगत एकोनविंश

तेषु मुहूर्तेषु एकस्य च मुहूर्तस्य षट्चत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य षड्विंशतौ सप्तषष्टि-
भागेषु शेषेषु धनिष्ठायां द्वितीया आविष्ठी पौर्णमासी परिसमाप्तिमेति। यदा तु तृतीयामाविष्ठी पौर्णमासी
चिन्त्यते तदा स ध्रुवस्यादितः पंचविंशतितमेति स्वेच्छया ध्रुवराशिः ॥६६॥ ५/६२ १/६७ पंचविंशत्या गुण्यते जाता निषो-
डशशतानि पंचाशदधिकानि १६५० एकस्य च मुहूर्तस्य पंचविंशं शतं द्वाषष्टिभागानां १२५ एकस्य च द्वाषष्टिभाग-
स्य पंचविंशतिः सप्तषष्टिभागाः ॥ २५ तत्र षोडश श- तैः शतैस्त्रिंशदधिकैः १६३० मुहूर्तानामेकस्य च मुहूर्तस्य
षट्चत्वारिंशता द्वाषष्टिभागैः ४६ एकस्य च द्वाषष्टिभागस्य त्रिंशदधिकेन शतेन १३२ शोधितो नक्षत्रपर्यायो
शुद्धः ततः स्थिताः पश्चाद् द्वादश मुहूर्ताः १२ एकस्य च मुहूर्तस्य पंचसप्ततिर्द्वाषष्टिभागाः ७५ एकस्य च द्वा-
षष्टिभागस्य सप्तविंशतिः सप्तषष्टिभागाः २७ ततो नवभिर्मुहूर्तैरेकस्य च मुहूर्तस्य चतुर्विंशत्या द्वाषष्टि-
भागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैः अभिजिन्नक्षत्रं शुध्यति। स्थिताः पश्चात् त्रयोदश मुहूर्ताः १३ एक-
स्य च मुहूर्तस्य पंचाशद् द्वाषष्टिभागाः ॥ ५०/६२ एकस्य च द्वाषष्टिभागस्याष्टाविंशतिः सप्तषष्टिभागाः ॥ २८/६७ आगतं श्रवणन-
क्षत्रं षड्विंशतौ मुहूर्तेषु एकस्य च मुहूर्तस्य एकादशसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य एकोनचत्वारिंशति
सप्तषष्टिभागेषु शेषेषु तृतीयामाविष्ठी पौर्णमासी परिसमापयति। एवं चतुर्थीमाविष्ठीं पौर्णमासीं धनिष्ठानक्ष-
त्रं षोडशसु मुहूर्तेषु एकस्य च मुहूर्तस्य चतुस्त्रिंशति द्वाषष्टिभागेषु एकस्य द्वाषष्टिभागस्य पंचविंशतौ सप्तषष्टिभागे- १०२

षु शेषेषु परिसमापयति। पंचमीमाविष्ठीं पौर्णमासीं श्रवणनक्षत्रं द्वादशसु मुहूर्तेषु एकस्य च मुहूर्तस्य षट्त्रिं-
शति द्वाषष्टिभागेषु एकस्य द्वाषष्टिभागस्य द्वाविंशतौ सप्तषष्टिभागेषु शेषेषु परिसमापयतीति। तदेवमाविष्ठीं नक्ष-
त्राणि आविष्ठीं पौर्णमासीं परिसमापयंति। तान्युक्तानि संप्रति यानि प्रौष्ठपदीं समापयंति तान्याह ॥ ता पोट्ठ-
वइण्णं इत्यादि। ता इति पूर्ववत्। प्रौष्ठपदीं प्रोष्ठपदीमिति वाक्यालंकारे पौर्णमासीं कति नक्षत्राणि युंजंति नक्षत्रा-
णि यथायोगं चन्द्रेण सह संयुज्य परिसमापयंती त्यर्थः। एवं सर्वत्रापि युंजंतीत्यस्य पदस्य भावना कर्तव्या ॥ भग-
वानाह ॥ ता इत्यादि। ता इति पूर्ववत् त्रीणि न- क्षत्राणि युंजंति। तद्यथा। शतभिषक् पूर्वप्रोष्ठपदा उत्तरप्रो-
ष्ठपदा। तत्र प्रथमां प्रोष्ठपदीं पौर्णमासीं उत्तरभद्रपदा नक्षत्रं सप्तविंशतौ मुहूर्तेषु एकस्य
च मुहूर्तस्य चतुर्दशसु द्वाषष्टिभागेषु चतुःष- ष्टौ सप्तषष्टिभागेषु शेषेषु परिसमापयति द्वितीयां प्रोष्ठ-
पदीं पौर्णमासीं पूर्वभद्रपदा नक्षत्रं अष्टसु मुहू- र्तेषु एकस्य च मुहूर्तस्य चत्वारिंशति द्वाषष्टिभागेषु ए-
कस्य च द्वाषष्टिभागेषु शेषेषु परिसमापयति। तृतीयां प्रोष्ठपदीं पौर्णमासीं शतभिषक् पंचसु मुहूर्तेषु एकस्य
स्यैकपंचाशति सप्तषष्टिभागेषु चतुर्मुहूर्तेषु षड्द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्याष्टाविंशति सप्त-
षष्टिभागेषु शेषेषु चतुर्थीं प्रोष्ठपदीं पौर्णमासीं उत्तरभद्रपदा नक्षत्रं चत्वारिंशति मुहूर्तेषु एकस्य च मुहूर्तस्ये-
कचत्वारिंशति द्वाषष्टिभागेषु एकस्य च त्रिंशति सप्तषष्टिभागेषु शेषेषु। पंचमीं प्रोष्ठपदीं पौर्णमासीं पूर्वभद्र-

सूर्यप्र०
टी०॥१०२

पदानक्षत्रमेकविंशतिमुहूर्तेष्वेकस्य च मुहूर्तस्य पंचपंचाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागेष्वेकस्य च द्वा-
षष्टिभागस्यैकादशसु सप्तषष्टिभागेषु शेषेषु परिणमयति ॥७॥ ता आसोइं णमित्यादि । आश्वयुजीं णमिति वा-
क्यालंकारे पौर्णमासीं कति नक्षत्राणि युंजंति भगवानाह ता दो इत्यादि । ता इति पूर्ववत् द्वे नक्षत्रे युंक्तः तद्य-
था रेवती अश्विनी च । इहोत्तरभद्रपदानक्षत्रमपि कांचिदाश्वयुजीं पौर्णमासीं परिसमापयति परं तत्र पूर्वपदाम-
पि पौर्णमासीं परिसमापयति तावदेव तल्लोकेन स्य प्राधान्यं तन्नाम्ना तस्याः पौर्णमास्या अभिधानादतस्तद्वि-
दन्नविवक्षितमित्यदोषः । तथा हि प्रथमामाश्वयुजीं पौर्णमासीमश्विनीनक्षत्रमेकविंशतौ मुहूर्ते-
ष्वेकस्य च द्वाषष्टिभागस्य त्रिषष्टौ सप्तषष्टिभागेषु शेषेषु परिसमापयति । द्वितीयामाश्वयुजीं
पौर्णमासीं रेवतीनक्षत्रं सप्तदशसु मुहूर्तेष्वेकस्य च मुहूर्तस्य षट्विंशति द्वाषष्टिभागेष्वेकस्य च
द्वाषष्टिभागस्य पंचाशति सप्तषष्टिभागेषु शेषेषु । तृतीयामाश्वयुजीं पौर्णमासीमुत्तरभद्रपदानक्षत्रं चतु-
र्दशसु मुहूर्तेष्वेकस्य च मुहूर्तस्य एकस्मिन् द्वाषष्टिभागे एकस्य च द्वाषष्टिभागस्य सप्तविंशति सप्तषष्टिभागेषु शे-
षेषु । चतुर्थीमाश्वयुजीं पौर्णमासीं रेवतीनक्षत्रं चतुर्षु मुहूर्तेष्वेकस्य च मुहूर्तस्य त्रयस्त्रिंशति द्वाषष्टिभाग-
ष्वेकस्य द्वाषष्टिभागस्य त्रयोविंशतौ सप्तषष्टिभागेषु शेषेषु । पंचमीमाश्वयुजीं पौर्णमासीमुत्तरभद्रपदानक्ष-
त्रमेकस्य च मुहूर्तस्य पंचाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य दशसु सप्तषष्टिभागेषु शेषेषु परिसमा- १०२

---

पयति ॥८॥ कत्तियं णमित्यादि । कार्त्तिकीं पौर्णमासीं कति नक्षत्राणि युंजंति भगवानाह । द्वे नक्षत्रे युंक्तः तद्-
यथा । भरणी कृत्तिका च । इहाप्यश्विनीनक्षत्रमपि कांचित्कार्त्तिकीं पौर्णमासीं परिसमापयति परं तदाश्वयुज्यां
पौर्णमास्यां प्रधानमिति तत्र न विवक्षितं । तत्र प्रथमां कार्त्तिकीं पौर्णमासीं कृत्तिकानक्षत्रमेकस्य च मुहूर्तस्य च-
तुर्षु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वाषष्टौ सप्तषष्टिभागेषु शेषेषु । द्वितीयां कार्त्तिकीं पौर्णमासीं कृत्तिकान-
क्षत्रं षट्विंशतौ मुहूर्तेष्वेकस्य च मुहूर्तस्यैक त्रिंशति द्वाषष्टिभागेषु । एकस्य च द्वाषष्टिभागस्यैकोनपंचाशति
सप्तषष्टिभागेषु शेषेषु । तृतीयां कार्त्तिकीं पौर्णमासीमश्विनीनक्षत्रं षट्सु मुहूर्तेष्वेकस्य च मुहूर्तस्याष्टाच-
त्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य च षट्त्रिंशति सप्तषष्टिभागेषु शेषेषु । चतुर्थीं कार्त्ति-
कीं पौर्णमासीं कृत्तिकानक्षत्रं षोडशसु मुहूर्तेष्वेकस्य च मुहूर्तस्याष्टादशसु द्वाषष्टिभागेष्वेकस्य च द्वाष-
ष्टिभागस्य द्वाविंशतौ सप्तषष्टिभागेषु शेषेषु । पंचमीं कार्त्तिकीं पौर्णमासीं भरणीनक्षत्रं नवसु मुहूर्तेष्वेकस्य च मु-
हूर्तस्य पंचचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य नवसु सप्तषष्टिभागेषु शेषेषु परिसमापयति ॥९॥ ता म-
ग्गसिरिं णं पुण्णिमं कइ णक्खत्ता जोएंति ति । ता इति पूर्ववत् कति नक्षत्राणि मार्गशीर्षीं पौर्णमासीं युंजंति भगवानाह ॥०॥
ता दो इत्यादि । ता इति प्राग्वत् द्वे नक्षत्रे युंक्तः । तद्यथा । रोहिणी मृगशिरश्च । तत्र प्रथमां मार्गशीर्षीं पौर्णमासीं मृ-
गशिरोऽष्टसु मुहूर्तेष्वेकस्य च मुहूर्तस्य संबंधिनो द्वाषष्टिभागस्य सत्केष्वेकषष्टौ सप्तषष्टिभागेषु शेषेषु । द्वितीयां

मार्गशीर्षीं पौर्णमासीं रोहिणीनक्षत्रं पंचसु मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टि-
भागस्य षट्चत्वारिंशति सप्तषष्टिभागेषु शेषेषु। तृतीयां मार्गशीर्षीं पौर्णमासीं रोहिणीनक्षत्रमेकविंशतिमुहूर्त्तेषु
एकस्य च मुहूर्त्तस्य द्विपंचाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पंचचत्वारिंशति सप्तषष्टिभागेषु शेषेषु
चतुर्थीं मार्गशीर्षीं पौर्णमासीं मृगशिरोनक्षत्रं द्वाविंशतौ मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य त्रयोदशसु द्वाषष्टि-
भागेष्वेकस्य च द्वाषष्टिभागस्यैकविंशतौ सप्तषष्टिभागेषु शेषेषु। पंचमीं मार्गशीर्षीं पौर्णमासीं रोहिणी-
नक्षत्रं अष्टादशसु मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य चत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य षट्सु
सप्तषष्टिभागेषु शेषेषु परिणमयति। पोसीणमित्यादि। ताइति पूर्ववत्। पोसीणमिति वाक्या-
लंकारे पौर्णमासीं कति नक्षत्राणि युंजंति। भगवानाह। ताइत्यादि। ताइति पूर्ववत् त्रीणि नक्षत्राणि युंजं-
ति तद्यथा। आर्द्रा पुनर्वसुः पुष्यः। तत्र प्रथमां पौषीं पौर्णमासीं पुनर्वसुनक्षत्रं द्वयोर्मुहूर्त्तयोरेकस्य च
मुहूर्त्तस्य षट्पंचाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य षष्टौ सप्तषष्टिभागेषु शेषेषु। द्वितीयां पौषीं
पौर्णमासीं एकोनत्रिंशति मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य एकविंशतौ द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य सप्त-
चत्वारिंशति सप्तषष्टिभागेषु शेषेषु। तृतीयां पौषीं पौर्णमासीं अधिकमासादर्वाक् आर्द्रानक्षत्रं दशसु मु-
हूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टाचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुर्विंशति सप्तषष्टिभागेषु शेषेषु 

अधिकमासभाविनीं पुनस्तामेव तृतीयां पौर्णमासीं पुष्यनक्षत्रमेकोनविंशतौ मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य
त्रिचत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशति सप्तषष्टिभागेषु शेषेषु। चतुर्थीं पौषीं पौर्णमासीं पु-
नर्वसुनक्षत्रं षोडशसु मुहूर्त्तेषु एकस्य च मुहूर्त्तस्याष्टसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य विंशतौ सप्त-
षष्टिभागेषु शेषेषु। पंचमीं पौषीं पौर्णमासीं पुनर्वसुनक्षत्रं द्विचत्वारिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पंच-
विंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तसु सप्तषष्टिभागेषु शेषेषु परिसमापयति। ॥६॥ ता।
माघीणमित्यादि। ताइति पूर्ववत्। माघीणमिति वाक्यालंकारे पौर्णमासीं कति नक्षत्राणि युंजंति। भग-
वानाह। ता दोण्णीत्यादि। द्वे नक्षत्रे युंक्तस्तद्यथा। अश्लेषा मघा च। चशब्दात्पूर्वोक्ता विमाघीं पौर्णमा-
सीं पूर्वफाल्गुनीनक्षत्रं कापि स्पृशान्नक्षत्रं च। तद्यथा प्रथमां माघीं पौर्णमासीं मघानक्षत्रमेकादशसु मु-
हूर्त्तेषु एकस्य च मुहूर्त्तस्य एकपंचाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्यैकोनषष्टौ सप्तषष्टि-
भागेषु शेषेषु। द्वितीयां माघीं पौर्णमासीं अश्लेषानक्षत्रमष्टसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षोडशसु द्वाषष्टिभागेष्वेक-
स्य च द्वाषष्टिभागस्य षट्चत्वारिंशति सप्तषष्टिभागेषु शेषेषु। तृतीयां माघीं पौर्णमासीं पूर्वफाल्गुनीनक्षत्रमष्टाविंशतौ
मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टाविंशति द्वाषष्टिभागेषु। एकस्य च द्वाषष्टिभागस्य द्वात्रिंशति सप्तषष्टिभागेषु।
शेषेषु। चतुर्थीं माघीं पौर्णमासीं मघानक्षत्रं पंचविंशतौ मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य त्रिषु द्वाषष्टिभागेषु एक-

स्य च द्वाषष्टिभागस्यैकोनविंशतिः सप्तषष्टिभागाः शेषाः। पंचमीं माघीं पौर्णमासीं भ्रषनक्षत्रं षट्सु मुहूर्त्तेष्वे-
कस्य च मुहूर्त्तस्य विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्सु सप्तषष्टिभागेषु शेषेषु परिसमापयति॥६॥
ता फग्गुणिं णमित्यादि। ता इति पूर्ववत्। फाल्गुनीमिति वा फाल्गुनीं पौर्णमासीं कति नक्षत्राणि युंजंति। भग-
वानाह। ता दोण्णीत्यादि। ता इति प्राग्वत्। द्वे नक्षत्रे तद्यथा। पूर्वफाल्गुनी उत्तरफाल्गुनी च। तत्र प्रथमां फाल्गुनीं पौर्ण-
मासीमुत्तराफाल्गुनीनक्षत्रं विंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च
द्वाषष्टिभागस्य द्वापंचाशति सप्तषष्टिभागेषु शेषेषु। द्वितीयां फाल्गुनीं पौर्णमासीं पूर्वफाल्गुनीनक्ष-
त्रं द्वयोर्मुहूर्त्तयोरेकस्य च मुहूर्त्तस्यैकादशसु द्वाषष्टिभागेष्वेकस्य द्वाषष्टिभागस्य पंचचत्वारिंशति
सप्तषष्टिभागेषु शेषेषु। तृतीयां फाल्गुनीं पौर्णमासीमुत्तराफाल्गुनीनक्षत्रं सप्तसु मुहूर्त्तेष्वेकस्य च मुहू-
र्त्तस्य त्रयस्त्रिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकत्रिंशति सप्तषष्टिभागेषु शेषेषु। चतुर्थीं फाल्गुनीं
पौर्णमासीमुत्तरफाल्गुनीनक्षत्रं त्रयस्त्रिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षष्टौ द्वाषष्टिभागेष्वेकस्य च द्वा-
षष्टिभागस्याष्टादशसु सप्तषष्टिभागेषु शेषेषु। पंचमीं फाल्गुनीं पौर्णमासीं पूर्वफाल्गुनीनक्षत्रं पंचदशसु
मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पंचविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पंचसु सप्तषष्टिभागेषु
शेषेषु परिसमापयति॥७॥ ता चित्तिं णमित्यादि। ता इति पूर्ववत्। चैत्रीं पौर्णमासीं कति नक्षत्राणि युंजंति। भगवा- १०५

---

नाह। ता इत्यादि। द्वे नक्षत्रे युंक्तस्तद्यथा हस्तः चित्रा च। तत्र प्रथमां चैत्रीं पौर्णमासीं चित्रानक्षत्रं चतुर्दशसु मुहूर्त्ते-
ष्वेकस्य च मुहूर्त्तस्यैकचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तपंचाशति सप्तषष्टिभागेषु शे-
षेषु। द्वितीयां चैत्रीं पौर्णमासीं हस्तनक्षत्रमेकादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्सु द्वाषष्टिभागेष्वेक-
स्य द्वाषष्टिभागस्य चतुश्चत्वारिंशति सप्तषष्टिभागेषु शेषेषु। तृतीयां चैत्रीं पौर्णमासीं चित्रानक्षत्रमेकस्मिन्
मुहूर्त्ते एकस्य च मुहूर्त्तस्याष्टाविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चत्वारिंशति सप्तषष्टिभागे-
षु शेषेषु। चतुर्थीं चैत्रीं पौर्णमासीं चित्रानक्षत्रं सप्तविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पंचपंचाश-
ति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तदशसु सप्तषष्टिभागेषु शेषेषु। पंचमीं चैत्रीं पौर्ण-
मासीं हस्तनक्षत्रं चतुर्विंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभा-
गस्य चतुर्षु सप्तषष्टिभागेषु शेषेषु परिसमापयति॥८॥ ता वइसाहिं णमित्यादि। ता इति पूर्ववत्। वैशाखीं णमि-
ति वा वैशाखीं पौर्णमासीं कति नक्षत्राणि युंजंति। भगवानाह। ता दोण्णीत्यादि। ता इति प्राग्वत्। द्वे नक्षत्रे युं-
क्तस्तद्यथा। स्वातिर्विशाखा च। व्यवहारादनुराधा च। इदं हि अनुराधानक्षत्रं विशाखातः परं विशाखायां पौर्णमा-
स्यां प्रवृत्तायां ततः परस्यामेव पौर्णमास्यां तत्र साक्षादुपात्तं नेहेति। तत्र प्रथमां वैशाखीं पौर्णमासीं विशाखानक्ष-
त्रमष्टसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्पंचाशति सप्तषष्टि-

भागेषु शेषेषु। द्वितीयां वैशाखीं पौर्णमासीं विशाखानक्षत्रं पंचत्रिंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैकस्मिन्
द्वाषष्टिभागे एकस्य च द्वाषष्टिभागस्य त्रिचत्वारिंशति सप्तषष्टिभागेषु शेषेषु। तृतीयां वैशाखीं पौर्णमासीम
नुराधानक्षत्रं पंचविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रयोविंशतौ द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्यै
कोनत्रिंशति सप्तषष्टिभागेषु शेषेषु। चतुर्थीं वैशाखीं पौर्णमासीं विशाखानक्षत्रमेकविंशतौ मुहूर्त्तेष्वे
कस्य च मुहूर्त्तस्य पंचाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षोडशसु सप्तषष्टिभागेषु शेषेषु। पंच
मीं वैशाखीं पौर्णमासीं स्वातिनक्षत्रं त्रिषु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य पंचदशसु द्वाषष्टिभागेषु
एकस्य च द्वाषष्टिभागस्य त्रिषु सप्तषष्टिभागेषु शेषेषु परिणमयति॥ ता जेट्ठामूलिं णं इत्यादि छि
ता इति पूर्ववत् ज्येष्ठामूलीं णमिति वाक्यालंकारे पौर्णमासीं कति नक्षत्राणि युंजंति? भगवानाह॥
॥ ता तिन्नि इत्यादि॥ ता इति पूर्ववत् त्रीणि नक्षत्राणि युंजंति, तद्यथा—अनुराधा ज्येष्ठा मूलं च। तत्र प्रथमां ज्येष्ठामू
लीं पौर्णमासीं मूलनक्षत्रं सप्तदशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैकविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टि
भागस्य पंचपंचाशति सप्तषष्टिभागेषु शेषेषु॥ द्वितीयां ज्येष्ठामूलीं पौर्णमासीं ज्येष्ठानक्षत्रं त्रयोदशसु मुहूर्त्तेष्वेक
स्य च मुहूर्त्तस्य चाष्टापंचाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्विचत्वारिंशति सप्तषष्टिभागेषु शेषेषु
तृतीयां ज्येष्ठामूलीं पौर्णमासीं मूलनक्षत्रं चतुर्षु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्याष्टादशसु द्वाषष्टिभागेष्वेकस्य च 

द्वाषष्टिभागस्याष्टाविंशतौ सप्तषष्टिभागेषु शेषेषु। चतुर्थीं ज्येष्ठामूलीं पौर्णमासीं ज्येष्ठानक्षत्रमेकस्य मुहूर्त्तस्य पंचच
त्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पंचदशसु सप्तषष्टिभागेषु शेषेषु॥ पंचमीं ज्येष्ठामूलीं पौर्णमासीम छ
नुराधानक्षत्रमेकादश मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य दशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वयोः सप्तषष्टिभागयोः प
रिसमाप्तिमुपनयति॥ ता आसाढिं णं इत्यादि। ता इति पूर्ववत् आषाढीं णमिति वाक्यालंकारे पौर्णमासीं कति नक्षत्रा
णि युंजंति। भगवानाह। ता दो इत्यादि। ता इति पूर्ववत् द्वे नक्षत्रे युंक्तस्तद्यथा। पूर्वाषाढा उत्तराषाढा च तत्र प्रथमामाषाढीं
पौर्णमासीमुत्तराषाढानक्षत्रं षड्विंशतौ मुहूर्त्तेष्वेक। स्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टि
भागस्य चतुःपंचाशति सप्तषष्टिभागेषु शेषेषु। द्वितीयामाषाढीं पौर्णमासीं पूर्वाषाढानक्षत्रं सप्तसु मुहूर्त्ते
ष्वेकस्य च मुहूर्त्तस्य त्रिपंचाशति द्वाषष्टिभागेष्वेक॥ स्य च द्वाषष्टिभागस्यैकचत्वारिंशति सप्तषष्टिभागेषु शेषेषु।
तृतीयामाषाढीं पौर्णमासीमुत्तराषाढानक्षत्रं त्रयोदश मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य त्रयोदशसु द्वाषष्टिभागेष्वेक
स्य च द्वाषष्टिभागस्य सप्तविंशतौ सप्तषष्टिभागेषु शेषेषु। चतुर्थीमाषाढीं पौर्णमासीमुत्तराषाढानक्षत्रमेकोनचत्वारिं
शति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य चतुर्दशसु सप्तषष्टिभागेषु शेषे
षु परिसमापयति। पंचमीमाषाढीं पौर्णमासीमुत्तराषाढानक्षत्रं चरमसमये परिसमापयति। किमुक्तं भवति। ए
तत्पंचमीमाषाढीं पौर्णमासीं परिसमाप्तमिति। अन्यच्च युगमधिकृत्योत्तराषाढानक्षत्रमिति। इह सूत्रकृता पर्यंतावलीयत्र
नक्षत्रं पौर्णमासीममावास्यां वा परिसमापयति। तदा वक्तव्यो शेषपरिसमाप्तितां वक्तुमारोपंक्तभवति। तत्सहदर्शनेनास्मानि

सूर्य० वृत्ति
१०७

रप्यत्रतत्त्ववेदोक्तं। यावता पुनर्यावत्यतिक्रांते परिसमापयति तावदेव प्राग्रुक्तकरणवशात्कथनीयं। वेडप्रक्तन्नावपितत्रै
वक्ष्यामि। अमावास्याधिकारमपि अतंतरं तथैव वक्ष्यमः॥ तदेवं यावंति नक्षत्राणि याः पौर्णमासीं युंजंति तान्युक्तानि सं
प्रतिगतार्थमिथमिदं मभिविवाधनार्थं कुलादियोजनामाह॥ ता तासाविट्ठिएमित्यादि ता इति पूर्ववत्। श्राविष्ठी पौर्णमा
सीं किं कुलं युनक्ति उपकुलं युनक्ति कुलोपकुलं वा युनक्ति। भगवानाह। ता कुलं वा इत्यादि। कुलं वा युनक्ति वा शब्दः समु
च्चयार्थः ततः कुलमपि युनक्तीत्यर्थः। एवमुपकुलमपि कुलोपकुलमपि। तत्र कुलं युंजन् धनिष्ठानक्षत्रं युनक्ति तस्यैव
कुलप्रसिद्धस्य सतः श्राविष्ठ्यां पौर्णमास्यां संभवात् उप कुलं युंजन् श्रवणनक्षत्रं युनक्ति। कुलोपकुलं युंजन् अभिजि
न्नक्षत्रं युनक्ति। तद्धि तृतीयायां श्राविष्ठ्यां पौर्णमास्यां क दशसु मुहूर्त्तेषु किंचित्समधिकेषु शेषेषु प्रुवं ड्णगद्वयो
गमुपैति ततः श्रवणेन सह सहचरत्वात् स्वयमपि त स्याः पौर्णमास्याः पर्यंतवर्त्तित्वात् दपितां परिसमापयतीति
विवक्षितत्वात् नक्षत्रं संप्रत्ययमुपेत्वारमाता सा विट्ठिन्नमित्यादि यत एवं त्रिभिरपि कुलादिभिः श्राविष्ठ्याः
पौर्णमास्या योजना ततः श्राविष्ठीं पौर्णमासीं कु लं वा युनक्ति उपकुलं वा युनक्ति कुलोपकुलं वा युनक्ति
ति वक्तव्यं स्यात् तत्स्वशिष्यस्य प्रतिपादनं कुर्यात् दिवा कुलं वा युनक्ति सती श्राविष्ठी पौर्णमासी उपकुलेन
वा युक्ता कुलोपकुलेन वा युक्ता। युक्तेति वक्तव्यं स्यात्। एवं शेषमपि त्रैविगमनीयं। यावदवसेयं तत्सूत्रमत्यादि एवमुक्ते
न प्रकारेण शेषा अपि पौर्णमास्यो नेया। यावत्क्रमेण वक्तव्या॥ नवरं पौषी पौर्णमासी ज्येष्ठामूली वा पौर्णमासी कु
लोपकुलमपि युनक्ति शेषा वा मासु च पौर्णमासी षु कुलोपकुलं नास्तीति परिभाव्य वक्तव्या सा चैवं। ता कत्तियण्णं १०७

सू

न्निमासिणीं किं कुलं वा जोएइ उवकुलं वा जोएइ ता कुलं पि जोएइ उवकुलं पि जोएइ। ता कुलं जोएइ कुलोवकुलं कु
लं जोएमाणे कत्तिया नक्खत्ते जोएइ उवकुलं जोएमाणे भरणी नक्खत्ते जोएइ। ता कत्तियन्नं पुन्निमं कुलं वा जो
एइ उवकुलं वा जोएइ कुलेण वा जुत्ता जोएमाणे कत्तिय निक्खत्ते जोएइ उवकुलं जोएमाणे भरणी नक्खत्ते जो
एइ उपकुलेण वा जुत्ता कत्तिय पुन्निमा जुत्तत्ति वत्तव्वं सिया इत्यादि। तावद्वक्तव्यं यावदाषाढी पौर्णमासी सूत्रपर्यं
तं सूत्राणि चावाढा वा आसाढी पुन्निमा जुत्तत्ति वत्तव्वं सिया। तदेवं पौर्णमासी वक्तव्यतोक्ता। संप्रत्यमावास्यावक्त
व्यतामाह॥ ता॥ दुवालसत्यादि। बाद वाऽमावा स्याः प्रज्ञप्ता। तद्यथा। श्राविष्ठी प्रौष्ठपदी इत्यादि तत्र मासप
रिसमापकं तत्र विशाखानक्षत्रेण यत्नात् तायः श्रावणो मासः सा पूर्वा गतः। श्रविष्ठा तत्र भवा
श्राविष्ठा किमुक्तं भवति। श्रविष्ठानक्षत्रपरिस मा तः श्रावणमाससत्कीति। प्रौष्ठपदी प्रोष्ठपदानक्षत्र
परिसमाप्यमानत्वाद् भाद्रपदमाससत्कीति। एवं सर्वत्र पिवाक्या भावनीयः॥ ता॥ तासाविट्ठिमित्यादि ता इ
ति पूर्ववत्। श्राविष्ठीममावास्यां कति नक्षत्राणि युंजंति कति नक्षत्राणि यथायोगं चंद्रेण सह संयुज्य श्रावि
ष्ठीममावास्यां परिसमापयंति भगवानाह॥ ता दोणीत्यादि। ता इति पूर्ववत् द्वे नक्षत्रे युक्तः। तद्यथा। आश्ले
षा मघा च। इह व्यवहारनयमतेन यस्मिन्नक्षत्रे पौर्णमासी भवति ततः आरभ्यार्वाक् तनं पंचदशं नक्षत्रेऽमा
वास्या भवति यस्मिंस्तु नक्षत्रेऽमावास्या ततः आरभ्य परतः पंचदशे नक्षत्रे पौर्णमासी। तत्र श्राविष्ठी

पौर्णमासी किल श्रवणेन धनिष्ठया चोक्ता। ततोऽमावास्यायामप्यस्यामाविष्ठायाम् अश्लेषामघाश्चोक्ता। लोके च
तिथिगणितानुसारतो गतायाममावास्यायां वर्तमानायामपि च प्रतिपदि यस्मिन् नक्षत्रे प्रथमतोऽमावास्या
ऽभूत् स सकलोऽप्यहोरात्रोऽमावास्यातिथ्या व्याप्तः। ततो मघानक्षत्रमप्यवश्यं नक्षत्रतोऽमावास्यायां
प्राप्यत इति न कश्चिद्विरोधः॥ परमार्थतः पुनरिमाममावास्यामाविष्टानीमानि त्रीणि नक्षत्राणि परिसमापयंति
तद्यथा पुनर्वसुः पुष्यास्त्रेषा चा तथा ह्यमावास्या चंद्रयोगपरिज्ञानार्थं करणं प्रागेवोक्तं तत्र तद्भावना क्रियते
कोपि पृच्छति युगस्यादौ प्रथमा श्राविष्ठमावास्या केन नक्षत्रयुक्तेन नक्षत्रेण योगोपेता सती समाप्तिमुपगच्छति
तत्र पूर्वोदितस्वरूपोऽवधार्यो राशिः ६६ षष्टिमुहूर्ताः एकस्य च मुहूर्तस्य पंच द्वाषष्टिभागा एक-
स्य च द्वाषष्टिभागस्य एकः सप्तषष्टिभाग इति प्रमाणो ध्रियते। ध्रुवा चैकेन गुण्यते प्रथमायाममा-
वास्यायां पृष्टत्वात् एकेन च गुणितं तादवस्थ्यमेव भवतीति राशिस्तावानेव जातः तस्माद्द्वाविंशतिर्मुहूर्ता एक-
कस्य च मुहूर्तस्य षट्चत्वारिंशत् द्वाषष्टिभागा इत्येवंपरिमाणं पुनर्वसुशोधनकं शोध्यते। तत्र षट्षष्टेर्मुहू-
र्त्तेभ्यो द्वाविंशतिर्मुहूर्ताः शुद्धाः स्थिताः पश्चाच्चतुश्चत्वारिंशत्। ४४। एकस्य च मुहूर्तस्य पंच द्वाषष्टिभागाः
किं यंता रूपं गृहीत्वा द्वाषष्टिभागराशिमध्ये प्रक्षिप्यंते जाताः सप्तषष्टिः। तेभ्यः षट्चत्वारिंशच्छुद्धाः शेषाः स्थिताः
एकविंशतिः। त्रिचत्वारिंशतो मुहूर्तेभ्यस्त्रिंशता मुहूर्तैः पुष्यः शुद्धः स्थिताः पश्चात् त्रयोदश मुहूर्ताः। अश्लेषा १०८

नक्षत्रं च षट्त्रिंशन्मितिपंचदशमुहूर्तप्रमाणं। तत इदमागतमाश्लेषानक्षत्रमेकस्मिन् मुहूर्ते एकस्य च मुहू-
र्त्तस्य चत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य सप्तषष्टिधा छिन्नस्य षट्षष्टिसंख्येषु भागेषु शेषेषु
प्रथमामावास्या समाप्तिमुपगच्छति। तथा च वक्ष्यति॥ ता एएसि णं पंचण्हं संवच्छराणं पढमं अमावासं चंदे केणं
नक्खत्तेणं जोएइ? ता अस्सेसाहिं अस्सेसाणं एक्को मुहुत्तो चत्तालीसं च बावट्ठिभागा मुहुत्तस्स बावट्ठिभागं
च सत्तट्ठिहा छेत्ता छावट्ठी चुण्णिया भागा सेसा इति। यदा तु द्वितीयामावास्या जिज्ञास्यते तदा सा युगस्यादित आर-
भ्य त्रयोदशीति स ध्रुवराशिः ६६। ५/६२। १/६७ त्रयोदशभिर्गुण्यते जाता मुहूर्तानामष्टौ शतान्यष्टपंचाश-
दधिकानि ८५८ एकस्य च मुहूर्तस्य पंचषष्टिर्द्वाषष्टिभागाः ६५ एकस्य च द्वाषष्टिभागस्य सत्कास्त्रयोदश
सप्तषष्टिभागाः १३ ततश्चत्वारिंशयथायोग्यालाश्च द मो प्रागुक्तरासाधाः इति चतुर्भिः शतैर्द्विचत्वारिंशदधिकैर्मु-
हूर्तशतैः षट्चत्वारिंशता द्वाषष्टिभागैरेतावता शोधयंते नक्षत्रपर्यायः शुद्धः स्थिताः पश्चान्मुहूर्तानां चत्वा-
रिंशतानि षोडशोत्तराणि एकस्य च मुहूर्तस्य एकोनविंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सत्का-
स्त्रयोदश सप्तषष्टिभागाः ४१६। १९/६२। १३/६७ ततस्तस्मात् त्रीणि शतानि नवनवत्यधिकानि मुहूर्तानामेकस्य च मुहूर्त-
स्य चतुर्विंशतिर्द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य षट्षष्टिः सप्तषष्टिभागाः ३९९। २४/६२। ६६/६७ इति शोधनीयं तत
तथा उत्तराषाढान्तानि शोध्यानि ततः त्रीणि शतानि नवनवत्यधिकानि शुद्धानि स्थिताः पश्चात् सप्तदश मुहूर्तास्तस्य

सूर्य० वृ० एकं मुहूर्त्तं गृहीत्वा तस्य द्वाषष्टिभागाः क्रियन्ते कृत्वा च द्वाषष्टिभागराशौ प्रक्षिप्यन्ते जाता एकाशीतिस्तस्या
२०७ श्चतुर्विंशतिः शुद्धा स्थिता पश्चात्सप्तपंचाशत् तस्या रूपमेकमादाय सप्तषष्टिभागाः क्रियन्ते ते सप्तषष्टिः
शुद्धाः पश्चादेकोऽवतिष्ठते सप्तषष्टिभागराशौ प्रक्षिप्यते जाताश्चतुर्दश सप्तषष्टिभागाः ॥ आगतं पुष्यन
क्षत्रं षोडशसु मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य षट्पंचाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य चतुर्दशसु सप्त
षष्टिभागेष्वतिक्रान्तेषु द्वितीयां श्राविष्ठीममावास्यां परिसमापयति। यदा तु तृतीयां श्राविष्ठीममावास्यां जिज्ञासि
ता सा युगादित आरभ्य पंचविंशतितमेति। सध्रु वशि ॥ ६६ । ५/६२ । १/६७ । पंचविंशत्या गुण्यते जाता निषोडश
शतानि पंचाशदधिकानि मुहूर्त्तानि १६५० एकस्य च मुहूर्त्तस्य पंचविंशत्यधिकं द्वाषष्टिभागशतं । १२५/६२ । एकस्य च
द्वाषष्टिभागस्य पंचविंशतिः सप्तषष्टिभागाः । २५/६७ तत्र चतुर्भिः शतैर्द्विचत्वारिंशदधिकैर्मुहूर्त्तानामेकस्य च मु
हूर्त्तस्य षट्चत्वारिंशता द्वाषष्टिभागैः प्रथमं शुद्धं अष्टापंचाशत्पर्यन्तं शुद्धाः स्थिताः निपश्चान्मुहूर्त्तानां द्वादश
शतान्यष्टोत्तराणि । १२०८ । द्वाषष्टिभागाः मुहूर्त्तस्य एकोनाशीतिः ७९ एकस्य च द्वाषष्टिभागस्य पंचविंशतिः स
प्तषष्टिभागाः ॥ २५ ततोऽष्टाभिः शतैरेकोनविंशत्यधिकैः ८१९ मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाष
ष्टिभागैरेकस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरेकोऽहोरात्रपर्यायः शुद्धः तिष्ठन्ति पश्चात्त्रीणि श
तानि नवाशीत्यधिकानि ३८९ एकस्य च मुहूर्त्तस्य चतुःपंचाशद्द्वाषष्टिभागाः ॥ ५४ एकस्य च द्वाषष्टिभागस्य षड्वि १०७

---

ंशतिः सप्तषष्टिभागाः ॥ २६ ततोऽपि त्रिभिः शतैर्नवोत्तरैर्मुहूर्त्तानामेकस्य च मुहूर्त्तस्य चतुर्विंशत्या द्वाषष्टिभागैरे
कस्य च द्वाषष्टिभागस्य षट्षष्ट्या सप्तषष्टिभागैरभिजिदादीनि रोहिणिकापर्यन्तानि शुद्धानि स्थिताः पश्चान्मु
हूर्त्ता अशीतिः एकस्य च मुहूर्त्तस्य एकोनत्रिंशद् द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य सप्तविंशतिः सप्तषष्टिभा
गाः ॥ ८० । २९/६२ । २७/६७ । ततस्त्रिंशता मुहूर्त्तैर्मृगशिरः शुद्धं स्थिताः पश्चात्पंचाशन्मुहूर्त्ताः ॥ ५० ततः पंचदशभिरार्द्रा शुद्धा
स्थिताः पंचत्रिंशत् ॥ ३५ आगतं पुनर्वसुनक्षत्रं पंच त्रिंशति मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य एकोनत्रिंशति द्वाषष्टि
भागेषु एकस्य च द्वाषष्टिभागस्य सप्तविंशतौ स प्तषष्टिभागेषु तृतीयां श्राविष्ठीममावास्यां समापयति। अन्तिमां च
पंचमस्य मुहूर्त्तस्य सप्तसु द्वाषष्टिभागेषु एक स्य च द्वाषष्टिभागस्य एकचत्वारिंशति सप्तषष्टिभागेषु ग
तेषु परिसमापयति ॥ ५ । ७/६२ । ४१/६७ ॥ पंचषष्टीं श्रावि ष्ठीममावास्यां पुष्यनक्षत्रं त्रिषु मुहूर्त्तेषु एकस्य च मुहूर्त्त
स्य द्विचत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाष ष्टिभागस्य चतुःपंचाशति सप्तषष्टिभागेषु ॥ ३ । ४२/६२ । ५४/६७ ॥ प
रिणामयति ॥ ७ ॥ एवमित्यादि एवमुक्तेन प्रकारेण एतेनानन्तरोदितेनाभिलापेनालापकेन शेषम
प्यमावास्याजातं ज्ञातव्यं विशेषमाह ॥ ८ ॥ पाठवयादानरकत्ताजाणाति। अत्र चैव सूत्रपाठः। तापाठव इमस्था
मावासं कडनरकत्ताजाणइति तादाविनरकत्ताजाणंति। तं जहा। उत्तरफग्गुणी। उत्तरफग्गुणी याइ दमपि अवत्ता
रतत्वते पश्चार्थतः पुनः स्फोणि नक्षत्राणि पौर्णमासीममावास्यां परिसमापयंति। तद्यथा। मघा पूर्वफाल्गुनी उत्त

रा फाल्गुनी च तत्र प्रथमां प्रौष्ठपदीममावास्यामुत्तरफाल्गुनीनक्षत्रं चत्वारि मुहूर्त्तानि एकस्य च मुहूर्त्तस्य षड्विं-
शतिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य चत्वारिंशतं सप्तषष्टिभागान् ४।२६।४० इति क्रान्तयो। द्वितीयां प्रौष्ठपदीम-
मावास्यां पूर्वफाल्गुनीनक्षत्रं सप्त मुहूर्त्तानेकस्य च मुहूर्त्तस्यैकं द्वाषष्टिभागमेकस्य पञ्चचत्वारिंशतं सप्तषष्टिभा-
गान् ७।१।४५ तृतीयां प्रौष्ठपदीममावास्यां मघानक्षत्रमेकादश मुहूर्त्तानेकस्य च मुहूर्त्तस्य चत्वारिंशतं
द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्याष्टाविंश- तिं सप्तषष्टिभागान् ११।४०।२८ चतुर्थीं प्रौष्ठपदीममावा-
स्यां पूर्वफाल्गुनीनक्षत्रमेकविंशतिं मुहू- र्त्तानेकस्य च मुहूर्त्तस्यैकादश द्वाषष्टिभागानेकस्य च
द्वाषष्टिभागस्य चत्वारिंशतं सप्तषष्टि- भागान् २१।११।४२ पञ्चमीं प्रौष्ठपदीममावास्यां
मघानक्षत्रं त्रयोविंशतिं मुहूर्त्तानेकस्य च मुहूर्त्तस्य सप्तचत्वारिंशतं द्वाषष्टिभागानेकस्य च द्वाषष्टि-
भागस्य पञ्चपञ्चाशतं सप्तषष्टिभागान् व्यतिक्रान्त- मु २३।४७।५५ परिसमापयति ॥८॥ आसोइंदा णीत्यादि सू-
त्रं पाठः ता आसोइं णं अमावासं कइ नक्खत्ता जोएंति ता दो नक्खत्ता जोएंति तं जहा हत्थो चित्ता य
तदपि सुगमं नवरं निश्चयतः अश्वयुजीममावास्यां त्रीणि नक्षत्राणि परिसमापयंति तद्यथा उत्तरफा-
ल्गुनी हस्त चित्रा च तत्र प्रथमामाश्वयुजीममावास्यां हस्तनक्षत्रं पञ्चविंशतिं मुहूर्त्तानेकस्य च मुहूर्त्तस्यैकत्रिं-
शतं द्वाषष्टिभागानेकस्य द्वाषष्टिभागस्य त्रीन् सप्तषष्टिभागान् २५।३१।३ गतान्। द्वितीयामाश्वयुजीमम- ११०

MEMORIAL

वास्यामुत्तरफाल्गुनीनक्षत्रं चतुश्चत्वारिंशतं मुहूर्त्तानेकस्य च चतुरो द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य षोडश
सप्तषष्टिभागान् ४४।४।१६ गतान्। तृतीयामाश्वयुजीममावास्यामुत्तरफाल्गुनीनक्षत्रं सप्तदश मुहूर्त्तानेकस्य
च मुहूर्त्तस्यैकोनचत्वारिंशतं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्यैकोनत्रिंशतं सप्तषष्टिभागान् १७।३९।
२९ गतान्। चतुर्थीमाश्वयुजीममावास्यां हस्तनक्षत्रमेकादश मुहूर्त्तानेकस्य च मुहूर्त्तस्य सप्तदश द्वाषष्टिभागान्
एकस्य च द्वाषष्टिभागस्य त्रिचत्वारिंशतं सप्तषष्टिभागान् ११।१७।४३ गतान्। पञ्चमीमाश्वयुजीममावास्यामुत्तरफाल्गु-
नीनक्षत्रं विंशतिं मुहूर्त्तानेकस्य च मुहूर्त्तस्य द्वि- पञ्चाशतं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य चतुःपञ्चा-
शतं सप्तषष्टिभागान् २०।५२।५४ गतान् प- रिसमापयति ॥९॥ कत्तियाणं साई विसाहा य त्ति अत्रा-
प्येवं सूत्रपाठः ता कत्तियं णं अमावासं कइ नक्ख- त्ता जोएंति ता दो नक्खत्ता जोएंति तं जहा साई विसाहा य
त्ति। एतदपि सुगमं नवरं निश्चयतः त्रीणि नक्षत्राणि कार्त्तिकीममावास्यां परिसमापयंति तद्यथा
स्वातिर्विशाखा चित्रा च तत्र प्रथमां कार्त्तिकीममावास्यां चित्रानक्षत्रं षोडश मुहूर्त्तानेकस्य च मुहूर्त्तस्य च-
तुर्विंशतिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य चतुरः सप्तषष्टिभागान् १६।२४।४ गतान्। द्वितीयां कार्त्तिकी-
ममावास्यां स्वातिनक्षत्रं पञ्च मुहूर्त्तानेकस्य च मुहूर्त्तस्य द्वाविंशतिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभाग-
स्य सप्तदश सप्तषष्टिभागान् ५।२२।१७ गतान्। तृतीयां कार्त्तिकीममावास्यां चित्रानक्षत्रमष्ट मुहूर्त्तानेक

स्य च मुहूर्त्तस्य चतुश्चत्वारिंशति द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य त्रिंशत् सप्तषष्टिभागा ८।४४।३० गते
षु। चतुर्थी कार्त्तिकीममावास्यां विशाखानक्षत्रं चतुर्दशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य द्वाविंशतौ द्वाषष्टिभागे
ष्वेकस्य च द्वाषष्टिभागस्य चतुश्चत्वारिंशति सप्तषष्टिभागेषु १४।२२।४४ गतेषु। पंचमी कार्त्तिकीममावास्यां वि
शाखानक्षत्रमेकविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तपंचाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तपंचा
शति सप्तषष्टिभागेषु ॥२१।५७।५७ गतेषु समाप्नोति ॥ परिसमापयति ॥७॥ मग्गसिरं ति णं तंजहा ॥ अणुराहा जेट्ठा मूलो स्ति मा
अत्रापि सूत्रालापका एवं ता मग्गसिरं अमावासं कइ नक्खत्ता जोएंति ता तिन्नि नक्खत्ता जोएंति तंजहा अणु
राहा जिट्ठा मूलो इति। तदा पश्चाद्व्यवहारतो निश्चयतः अत्र त्रीणि नक्षत्राणि मार्गशीर्षीम
मावास्यां परिसमापयंति तद्यथा। विशाखा अनुराधा ज्येष्ठा तत्र प्रथमां मार्गशीर्षीममावास्यां ज्ये
ष्ठानक्षत्रं सप्तसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैक चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पंचसु
सप्तषष्टिभागेषु गतेषु ७।४१।५५ ॥ द्वितीयां मार्गशीर्षीममावास्यामनुराधानक्षत्रमेकादशसु मुहूर्त्तेष्वे
कस्य च मुहूर्त्तस्य चतुर्दशसु द्वाषष्टिभागेष्वेकस्य च मुहूर्त्तस्य चतुर्दशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभा
गस्य च द्वाषष्टिभागस्याष्टादशसु सप्तषष्टिभागेषु गतेषु ॥११।१४।१८ तृतीयां मार्गशीर्षीममावास्यां वि
शाखानक्षत्रमेकोनविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैकोनपंचाशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभाग १११

स्यैकत्रिंशति सप्तषष्टिभागेष्वतिक्रांतेषु ॥१९।४९।३१ चतुर्थी मार्गशीर्षीममावास्यामनुराधानक्षत्रं चतुर्वि
शतौ मुहूर्त्तेष्वेकस्य च सप्तविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पंचचत्वारिंशति सप्तषष्टिभागेषु
गतेषु २४।२७।४५। पंचमी मार्गशीर्षीममावास्यां विशाखानक्षत्रं त्रिचत्वारिंशति मुहूर्त्तेष्वेकस्य मुहूर्त्तस्य सं
धिना द्वाषष्टिभागस्याष्टापंचाशति सप्तषष्टिभागेषु गतेषु ४३।०।५८ परिसमापयति ॥८॥ ता पोसिं च दो त्रि पुव्वासाढा उत्त
रासाढा य त्ति। अत्रैवं सूत्रालापकः ता पोसिं अमावासं कइ नक्खत्ता जोएंति ता दोन्नि नक्खत्ता जोएंति तंज
हा। पुव्वासाढा उत्तरासाढा य त्ति। तदा पश्चाद्व्यवहारतः निश्चयतः पूर्वाणि नक्षत्राणि परिसमा
पयंति तद्यथा। मूलं पूर्वाषाढा उत्तराषाढा च तत्र प्रथमां पौषीममावास्यां पूर्वाषाढानक्षत्रम
ष्टाविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य षट्
सु सप्तषष्टिभागेषु गतेषु २८।४६।६ द्वितीयां पौषीममावास्यां पूर्वाषाढानक्षत्रं द्वयोर्मुहूर्त्तयोरेकस्य
मुहूर्त्तस्यैकोनविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकोनविंशतौ सप्तषष्टिभागेष्वतिक्रांतेषु
२।१९।१९ तृतीयामधिकमाससंवर्तिनीं पौषीममावास्यामुत्तराषाढानक्षत्रमेकादशसु मुहूर्त्तेष्वेकस्य
च मुहूर्त्तस्यैकोनषष्टौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य त्रयस्त्रिंशति सप्तषष्टिभागेषु ११।५९।३३ चतु
र्थी पौषीममावास्यां पूर्वाषाढानक्षत्रं पंचदशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्पंचाशति द्वाषष्टिभागेष्वेकस्य

चद्वाषष्टिभागस्य षट्चत्वारिंशति सप्तषष्टिभागेषु गतेषु ४६।५६।४६। पंचमीं पौषीममावास्यां मूलनक्षत्रमेकोनविंशतिमुहूर्त्तान् एकस्य च मुहूर्त्तस्य पंचसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्यैकोनषष्टौ सप्तषष्टिभागेषु व्यतिक्रांतेषु १९।५।५९। परिसमापयति॥७॥ माहिं ति तिन्नि अभिई सवणो धणिट्ठा इति अत्राप्येवं सूत्रालापकः। ता माहिं णं अमावासं कइ नक्खत्ता जोएंति? ता तिन्नि नक्खत्ता जोएंति, तंजहा अभिई सवणो धणिट्ठा य। एतदपि व्यवहारतो निश्चयतः पुनरमूनि त्रीणि माघीममावास्यां परिसमापयंति तद्यथा उत्तराषाढा अभिजित् श्रवणश्च। तथा हि प्रथमां माघीममावास्यां श्रवणनक्षत्रं दश मुहूर्त्तान् एकस्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्याष्टसु सप्तषष्टिभागेषु १०।२६।८। द्वितीयां माघीममावास्यामभिजिन्नक्षत्रं त्रिषु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य विंशतौ सप्तषष्टिभागेषु ३।२६।२०। तृतीयां माघीममावास्यां श्रवणनक्षत्रं द्वाविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैकोनचत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पंचत्रिंशति सप्तषष्टिभागेषु गतेषु २२।३९।३५। चतुर्थीं माघीममावास्यामभिजिन्नक्षत्रं षट्सु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य सप्तचत्वारिंशति सप्तषष्टिभागेषु गतेषु ६।२७।४७। पंचमीं परिसमापयति॥८॥ फग्गुणिं दोन्नि तं जहा सयभिसया पुव्वभद्दवया इति अत्राप्येवं सूत्रालापकः। ता फग्गुणिं णं अमावासं कइ नक्खत्ता जोएंति? ता दोन्नि नक्खत्ता जोएंति, तं ११२

जहा सयभिसया पुव्वभद्दवया य। एतदपि व्यवहारतो निश्चयतः पुनरमूनि त्रीणि नक्षत्राणि फाल्गुनीममावास्यां परिसमापयंति तद्यथा धनिष्ठा शतभिषक् पूर्वभद्रपदा च। तत्र प्रथमां फाल्गुनीममावास्यां पूर्वभद्रपदा षट्सु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्यैकत्रिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य नवसु सप्तषष्टिभागेषु गतेषु ६।३१।९। द्वितीयां फाल्गुनीममावास्यां शतभिषक्नक्षत्रं विंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य चतुर्षु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वाविंशतौ सप्तषष्टिभागेषु व्यतिक्रांतेषु २०।४।२२। तृतीयां फाल्गुनीममावास्यां पूर्वाषाढानक्षत्रं चतुर्दश मुहूर्त्तान् एकस्य च मुहूर्त्तस्य चतुश्चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पंचत्रिंशति सप्तषष्टिभागेषु गतेषु १४।४४।३५। चतुर्थीं फाल्गुनीममावास्यां शतभिषक्नक्षत्रं त्रिषु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तदशसु द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकोनपंचाशति सप्तषष्टिभागेषु गतेषु ३।१७।४९। पंचमीं फाल्गुनीममावास्यां धनिष्ठानक्षत्रं षट्सु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षड्विंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकषष्टौ सप्तषष्टिभागेषु गतेषु ६।२६।६१। परिसमापयति॥९॥ चित्तिं ति तिन्नि तं जहा उत्तरभद्दवया रेवती अस्सिणी य इति अत्राप्येवं सूत्रालापकः। ता चित्तिं णं अमावासं कइ नक्खत्ता जोएंति? ता तिन्नि नक्खत्ता जोएंति, तं जहा उत्तरभद्दवया रेवई अस्सिणी य। एतदपि व्यवहारतो निश्चयतः पुनरमूनि त्रीणि नक्षत्राणि चैत्रीममावास्यां परिसमापयंति तद्यथा पूर्वभद्रपदा।

सूर्यप्र० वृत्ति
॥११३

उत्तराषाढपदा ॥ रेवती च । तत्र प्रथमां चैत्रीममावास्यामुत्तरभद्रपदा नक्षत्रं सप्तविंशति मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य
द्वाविंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य दशसु सप्तषष्टिभागेषु गतेषु ॥ २७ ॥ २२ ॥ १० ॥ द्वितीयां चैत्रीममा
वास्यामुत्तरभद्रपदा नक्षत्रमेकादशसु मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य नवसु द्वाषष्टिभागेषु एकस्य च द्वाषष्टि
भागस्य त्रयोविंशतौ सप्तषष्टिभागेषु गतेषु ॥ ११ ॥ ९ ॥ २३ ॥ तृतीयां चैत्रममावास्यां रेवती नक्षत्रं पंचसु मुहूर्त्तेषु एक
स्य च मुहूर्त्तस्य एकोनपंचाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य सप्तत्रिंशति सप्तषष्टिभागेषु अतिक्रांतेषु
॥ ५ ॥ ४९ ॥ ३७ ॥ चतुर्थीं चैत्रममावास्यामुत्तरभद्रपदा नक्षत्रं त्रयोविंशतौ मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य द्वाविंश
तौ द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य पंचाशति सप्तषष्टिभागेषु गतेषु ॥ २३ ॥ २२ ॥ ५० ॥ पंचमीं चै
त्रीममावास्यां पूर्वभद्रपदा नक्षत्रं सप्तविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तपंचाशति द्वाषष्टिभागेष्वेकस्य
च द्वाषष्टिभागस्य चतुःषष्टौ सप्तषष्टिभागेष्वतिक्रांतेषु ॥ २७ ॥ ५७ ॥ ६४ ॥ परिसमाप्यते ॥ ७ ॥ वैशाखीप्रभृतीनां किंचित्
इति अत्राप्येवं सूत्रपाठः ता वइसाहिं णं अमावासं कइ नक्खत्ता जोएंति ता दो णक्खत्ता जोएंति तं जहा रेवई य अस्सि
णी य एतदपि व्यवहारतो निश्चयतः पुनरश्विनी नक्षत्रे वैशाखीममावास्यां परिसमापयतः तद्यथा ॥ रेवती अश्विनी च । तत्र प्रथमां वैशाखीममावास्यामश्विनी नक्षत्रमष्टाविंशतौ मुहूर्त्तेष्वेकस्य च मु
हूर्त्तस्य एकचत्वारिंशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टिभागस्य एकादशसु सप्तषष्टिभागेषु गतेषु ॥ २८ ॥ ४१ ॥ ११ ॥ ११३

द्वितीयां वैशाखीममावास्यामश्विनी नक्षत्रं द्वयोर्मुहूर्त्तयोरेकस्य च मुहूर्त्तस्यैकोनचत्वारिंशति द्वाषष्टिभागे
षु एकस्य च द्वाषष्टिभागस्य त्रयोविंशतौ सप्तषष्टिभागेषु अतिक्रांतेषु ॥ २ ॥ ३९ ॥ २३ ॥ तृतीयां वैशाखीममावास्यां
रेवती नक्षत्रमेकादशसु मुहूर्त्तेषु एकस्य च मुहूर्त्तस्य चतुःपंचाशति द्वाषष्टिभागेषु एकस्य च द्वाषष्टि
भागस्याष्टात्रिंशति सप्तषष्टिभागेषु गतेषु ॥ ११ ॥ ५४ ॥ ३८ ॥ चतुर्थीं वैशाखीममावास्यामश्विनी नक्षत्रं पंचदशसु मु
हूर्त्तेष्वेकस्य च मुहूर्त्तस्य सप्तविंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्यैकपंचाशति सप्तषष्टिभागेषु गते
षु ॥ १५ ॥ २७ ॥ ५१ ॥ पंचमीं वैशाखीममावास्यां रेवती नक्षत्रमेकोनविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य सं
धिता द्वाषष्टिभागस्य साकं चतुःषष्टौ सप्तषष्टिभागेषु गतेषु १९ ॥ ६४ ॥ परिसमाप्यते ॥
७ ॥ जेट्ठामूलिं णं अमावासं कइ नक्खत्ता जोएंति इत्यत्राप्येवं सूत्रालापकः ॥ ता जेट्ठामूलिं णं अमावासं कइ नक्खत्ता जो
एंति ता दो णक्खत्ता जोएंति तं जहा रोहिणी मिगसिरं च ॥ एतदपि व्यवहारतो निश्चयतः पुनरिमे द्वे नक्षत्रे ज्येष्ठा
मूलीममावास्यां परिसमापयतः तद्यथा ॥ रोहिणी कृत्तिका च तत्र प्रथमां ज्येष्ठामूलीममावास्यां रोहिणी नक्षत्रमे
कोनविंशतौ मुहूर्त्तेष्वेकस्य च मुहूर्त्तस्य षट्चत्वारिंशति द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य द्वादशसु
सप्तषष्टिभागेषु गतेषु १९ ॥ ४६ ॥ १२ ॥ द्वितीयां ज्येष्ठामूलीममावास्यां कृत्तिका नक्षत्रं त्रयोविंशतौ मुहूर्त्तेष्वेक
स्य च मुहूर्त्तस्यैकोनविंशतौ द्वाषष्टिभागेष्वेकस्य च द्वाषष्टिभागस्य पंचविंशतौ सप्तषष्टिभागेष्वतिक्रांतेषु २३

सूर्य०टी० ॥११४

१०।२।पद्वितीयां ज्येष्ठामूलीममावास्यां रोहिणीनक्षत्रं माविंशतिमुहूर्त्तानेकस्य च मुहूर्तस्यैकोनषष्टिं द्वाषष्टि
भागानेकस्य च द्वाषष्टिभागस्योक्तान् चत्वारिंशतिसप्तषष्टिभागान् समतिक्रान्तं भुक्त्वा ॥५०।२०।चतुर्थी ज्येष्ठा
मूलाममावास्यां रोहिणीनक्षत्रं षड्मुहूर्त्तानेकस्य च मुहूर्त्तस्य द्वात्रिंशतिं द्वाषष्टिभागानेकस्य द्वाषष्टिभाग
स्य पंचाशतिं सप्तषष्टिभागान् भुक्त्वा ॥ ६।३२।५०। पंचमां ज्येष्ठामूलीममावास्यां कृत्तिकानक्षत्रं दश मुहूर्त्ता
न् एकस्य मुहूर्त्तस्य पंच द्वाषष्टिभागा एकस्य च द्वाषष्टिभागस्य पंचषष्टिं सप्तषष्टिभागान् भुक्त्वा ॥१०
।५।६५ परिसमापयति ॥७॥ ता आसाढीणं मित्यादि । ताः इति पूर्ववत् । आषाढीणमिति वा क्रमालेक्षा
रेकृतिनक्षत्राणि युंजंति । भगवानाह ता इत्यादि । ताः इति पूर्ववत् त्रीणि नक्षत्राणि युंजंति
तद्यथा । आर्द्रा पुनर्वसू पुष्य आपतदपि व्यवहा रतउक्तं । परमार्थतः पुनरत्र त्रीणि नक्षत्राणि आषा
ढीममावास्यां परिणमयति । तद्यथा मृगशिरा आर्द्रा पुनर्वसुश्चात्र प्रथमामाषाढीममावास्यामार्द्रा न
क्षत्रं द्वादशमुहूर्तानेकस्य च मुहूर्त्तस्य एकपंचाशतिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य त्रयोदश
सप्तषष्टिभागान् भुक्त्वा ॥१२।५१।१३ द्वितीयामाषाढीममावास्यां मृगशिरो नक्षत्रं चतुर्दश मुहूर्त्तानेक
स्य च मुहूर्त्तस्य चतुर्विंशतिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य षड्विंशतिं सप्तषष्टिभागान् प्रतिक्रान्तं ॥१
४।२४।२६ तृतीयामाषाढीममावास्यां पुनर्वसुनक्षत्रं नव मुहूर्त्तानेकस्य च मुहूर्त्तस्य द्वात्रिंशतं द्वाषष्टिभागा ११४

योरेकस्य च द्वाषष्टिभागस्य चत्वारिंशतं सप्तषष्टिभागान् गत्वा ॥९।३२।४०। चतुर्थीमाषाढीममावास्यां मृग
शिरो नक्षत्रं सप्तविंशतिं मुहूर्त्तानेकस्य च मुहूर्त्तस्य सप्तत्रिंशतिं द्वाषष्टिभागानेकस्य च द्वाषष्टिभागस्य
त्रिपंचाशतं सप्तषष्टिभागान् गत्वा ॥२७।३७।५३।पंचमीमाषाढीममावास्यां पुनर्वसुनक्षत्रं द्वाविंशतिं मुहूर्त्ता
नेकस्य च मुहूर्त्तस्य षड्विंशतिं द्वाषष्टिभागान् भुक्त्वा ॥२२।६।६६ परिसमापयतीति ॥७॥ तादवद्वादशानाममा
वास्यानां चंद्रयोगोपि तं नक्षत्रावधिसक्तः ॥७॥ सं प्रत्येतासामेव कुलादियोजनामाह ॥८॥ ता सा विट्ठिन्नि इ
त्यादि । ताः इति पूर्ववत् । श्राविष्ठी श्रावणमासस्य विनाममावास्यां किं कुलं युनक्ति उपकुलं वा युनक्ति
कुलोपकुलं वा युनक्ति भगवानाह ॥८॥ कुलं वेत्यादि कुलमपि युनक्ति । वा शब्दात् पितृ श्रा
वी । उपकुलं वा युनक्ति तत्र सातत्यामस्य । कृत्वा कुलोपकुलं । तत्र कुलं कुलसंज्ञं नक्षत्रं श्राविष्ठी
ममावास्यां युनक्ति मघा नक्षत्रं युनक्ति । एतच्च व्यवहारत उक्तं । यावता परतो दिगतायाममावास्यायां व
र्तमानायां प्रतिपदा आहोरात्रिः । श्रावणमावास्यं यस्य सा सकलामहारावा उमावास्यति श्रव
ण्यति । तत एव व्यवहारतः श्राविष्ठ्याममावास्यायां मघा नक्षत्रं संलग्नं कुलं युनक्ति मघानक्षत्रं युनक्ति
ति । परमार्थतः पुनः कुलं युनक्ति अनक्षत्रं युनक्तीति प्रतिपत्तव्यं । तस्यैव कुलं प्रसिद्धा प्रसिद्धस्य श्रावि
ष्ठाममावास्यायां संतानानुगा तत्र प्रागेवा कृ युक्तत्वात् तमपि व्यवहारतः यमधिकृत्य सा योगं परिसा

वत्तीयमिति उपकुलं युक्तं अश्लेषानक्षत्रं युनक्ति। संप्रत्युपसंहारमाह॥ ७॥ ता ता सा विठिन्नमित्यादि पतद्रूपप्र
कारेण मासां कुलाद्याश्च विष्ठाममावास्यायां च इयोगः समस्ति। न तु कुलोपकुलेन ततः श्राविष्ठीममावास्यां कु
लमेवा वा इत्यादि यो इशेत्यादि। युनक्ति उपकुलं वा युनक्ति इति वक्तव्यं स्यात् मघादि कुलेन वा युक्ता उपकुलेन वा यु
क्ता श्राविष्ठ्याममावास्या युक्ते ति वक्तव्यं स्यात्। एवं नेतव्यमिति। एवमुक्तप्रकारेण शेषमप्यमावास्याजातं नेतव्यं नव
रं मार्गशीर्षी माघी फाल्गुनी आषाढी ममावास्या॥ कुलोपकुलमपि युनक्तीति वक्तव्यं शेषास्त्वमावास्याः कुलो
पकुलं नो तिष्ठि संप्रति पाठक्रमो उच्यते स्वाला ... पकादश्यंति ता ताश्च वइसं अमावासं किं कुलं झोएइ उव
कुलं वा झाएइ कुलावकुलं जोएइ ता कुलं ... वा झोएइ उवकुलं वा झाएइ नो लसइ कुलोवकुलं कु
ला झाएमाणे उत्तराफग्गुणी झाएइ उवकुलं जो एमाणे पुब्बाफग्गुणी झोएइ ता पुट्ठवइसं अमावासं कुलं
वा झोएइ कुलेण वा जुत्ता उवकुलेण वा जुत्ता पोठवया अमावासा जुत्तत्तिवत्तव्वं सिया। ता अस्सोइसं अमाव
सं किं कुलं झोएइ उवकुलं झाएइ कुलोवकुलं जोएइ ता कुलं वा झोएइ उवकुलं वा झोएइ नो लसइ कुलोव
कुला कुलं झाएमाणे चित्ता नक्खत्ते जोएइ उवकुलं जोएमाणे हत्थनक्खत्ते जोएइ ता अस्सोइन्नं अमावासं कुलं
झोएइ कुलेण वा जुत्ता उवकुलेण वा जुत्ता अस्सोइ अमावासा जुत्तत्तिवत्तव्वं सिया॥ ८॥ ता कत्तिं किं अमावासं किं ११५
कुलं झोएइ उवकुलं वा झोएइ कुलोवकुलं वा झाएइ ता कुलं वा जोएइ उवकुलं वा जोएइ ता कुलं वा जोएइ उव

कुलं वा झाएइ उवकुलं वा जोएइ उवकुलं वा जोएइ नो लसइ कुलोवकुलं। कुलं जोएमाणे विसाहा नक्खत्ते जोएइ
उवकुलं वा जोएमाणे साईनक्खत्ते जोएइ ता कत्तियं अमावासं कुलं वा जोएइ उवकुलं वा जोएइ कुलेण वा जुत्ता॥
उवकुलेण वा जुत्ता कत्तिइ अमावासा जुत्तात्ति वत्तव्वं सिया॥ ९॥ ता मग्गसिरं अमावासं किं कुलं जोएइ उवकुलं जोएइ
कुलोवकुलं वा जोएइ ता कुलं वा जोएइ उवकुलं वा जोएइ कुलोवकुलं वा जोएइ कुलं जोएमाणे मूलनक्खत्ते जो
एइ उवकुलं जोएमाणे जेठा नक्खत्ते जोएइ कुलो वकुलं जोएमाणे अणुराहा नक्खत्ते जोएइ कुलं वा जोएइ
उवकुलं वा जोएइ कुलोवकुलं वा जोएइ कुल ण वा जुत्ता उवकुलेण वा जुत्ता कुलोवकुलेण वा जुत्ता मग्ग
सिरी अमावासा जुत्तत्तिवत्तव्वं सिया॥ इत्यादि नि अत्र उवयुत्तः कुलादियोजना प्रयुक्तं चंद्रयोगमधिकृत्य।
सूत्र परिभावनीया॥ १०॥ इति श्रीमलयगिरिविरचि तायां सूर्यप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य षष्ठं प्राभृतप्रा
भृतं समाप्तं॥ ॥ तदेवमुक्तं दशमस्य प्राभृतस्य ष ष्ठं प्राभृतप्राभृतं संप्रति सप्तममारभ्यते। तस्य चायमर्थाधि
कारः। पौर्णमास्यमावास्यानां चंद्रयोगमधिकृत्य सन्निपातो वक्तव्यः ततस्तद्विषयं प्रश्नसूत्रमाह॥ १॥ ता कहं ते
इत्यादि। ता इति पूर्ववत् कथं केन प्रकारेण भगवन् त्वया चंद्रयोगमधिकृत्य पौर्णमास्यमावास्यानां सन्निपाता
आख्याता इति वदेत्। एवमुक्ते भगवानाह। ता जया णमित्यादि। इह द्वे वारे नवमासेनैव अस्मिन् जाव पोर्णमा
पौर्णमासी भवति तत्र आश्रयस्याद्युक्तेन पंचदशोच तु दशे वा न स्व नियमतो अमावास्या ततो यदा श्राविष्ठी प्रवि

ष्ठानक्षत्रयुक्ता पौर्णमासी भवति। तदा तस्यां अर्वाक्तनी अमावास्या माघी मघानक्षत्रयुक्ता भवति। मघानक्षत्रा
दारभ्य श्रविष्ठानक्षत्रस्य पंचदशत्वात्। एतच्च श्रावणमासमधिकृत्य भावनीयं। यदा णं इति वाक्यालंकारे माघी
मघानक्षत्रयुक्ता पौर्णमासी भवति तदा पाश्चात्या अमावास्या श्राविष्ठी श्रविष्ठायुक्ता भवति। मघात आरभ्य पूर्वं श्रवि
ष्ठानक्षत्रस्य पंचदशत्वात्। एतच्च माघमासमधिकृत्यावसेयं। ता जयाणंमित्यादि। तत्र यदा णं इति वाक्यालं
कारे प्रोष्ठपदा उत्तरभद्रपदायुक्ता पौर्णमासी भवति तदा णं इति प्राग्वत् पाश्चात्या अमावास्या फाल्गुनी
उत्तराफाल्गुनीनक्षत्रयुक्ता भवति। उत्तरभद्रपदा तत आरभ्य पूर्वमुत्तरफाल्गुनीनक्षत्रस्य पंचदशत्वात्। एत
पतिरालआलाजवनक्षत्रतवसाक्ककालत्वा भूत्र योः नच्चवदारपथमवतरति। तथा च समवायांगसूत्रं जंबु
द्वीपे द्वीपे अभिजिद्वर्जैः सप्तविंशत्या नक्षत्रैः संव्यवहारो वर्त्तते इति। ततः सर्वथापि तत्र गणना इति पंचदशत्वे
त्वात् उत्तरभद्रपदात आरभ्य पूर्वमुत्तरफाल्गुनीनक्षत्रस्य इति। एतच्च भाद्रपदमासमधिकृत्योक्तमवसेयं॥
जयाणंमित्यादि। यदा च फाल्गुनी उत्तरफाल्गुनीनक्षत्रयुक्ता पौर्णमासी भवति तदा पाश्चात्या अमावास्या प्रो
ष्ठपदा उत्तरभद्रपदोपेता भवति। उत्तरफाल्गुन्या आरभ्य पूर्वमुत्तरभद्रपदानक्षत्रस्य चतुर्दशत्वात्। इदं च फाल्गुनमा
समधिकृत्योक्तं॥ जयाणंमित्यादि। यदा च आश्वयुजी अश्वयुग्नक्षत्रोपेता पौर्णमासी भवति तदा पाश्चात्या
नंतरा अमावास्या चैत्री चित्रानक्षत्रसमन्विता भवति। अश्विन्या आरभ्य पूर्वं चित्रानक्षत्रस्य पंचदशत्वात्। एतच्च अश्वयुजमास ११६

---

यमधिकृत्योक्तमवसेयं। निश्चयतः कस्यामप्यश्वयुग्मासभाविन्याममावास्यायां चित्रानक्षत्रं संभवादेतच्च प्रागेव दर्शितं
यदा च चैत्री चित्रानक्षत्रोपेता पौर्णमासी जायते तदा ततः पाश्चात्यानंतरा अमावास्या आश्वयुजी अश्वयुग्नक्षत्रोपेता भवति। एत
दपि व्यवहारतो निश्चयतः कस्यामपि चैत्रमासभाविन्याममावास्यायामश्विनीनक्षत्रस्यासंभवात्। एतच्च सूत्रमश्वयुक्चैत्रमा
सावधिकृत्य प्रवर्तितं वदितव्यं॥ जयाणंमित्यादि। यदा च कार्त्तिकी कृत्तिकानक्षत्रोपेता पौर्णमासी भवति तदा वैशाखी वि
शाखानक्षत्रोपेता अमावास्या भवति। कृत्तिकातो अर्वाक् विशाखाया पंचदशत्वात्। यदा वैशाखी विशाखानक्षत्रोपेता पौर्ण
मासी भवति तदा ततोऽनंतरा पाश्चात्या अमावास्या कार्त्तिकी कृत्तिकानक्षत्रोपेता भवति। विशाखातः पूर्वं कृत्तिका
या अपि चतुर्दशत्वात्। एतच्च कार्त्तिकवैशाखमासावधिकृत्योक्तं। एवमुत्तरमप्यपि भावनीयं॥ इति श्रीमल
यगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य सप्तमं प्राभृतप्राभृतं समाप्तं॥ तदेवमुक्तं दशमस्य
प्राभृतस्य सप्तमं प्राभृतप्राभृतं। साम्प्रतमष्टममारभ्यते। तस्य चायमर्थाधिकारो नक्षत्राणां संस्थानं वक्तव्यमिति ततस्तद्वि
षयप्रश्नसूत्रमाह॥ ता कहं ते इत्यादि। ता इति पूर्ववत् कथं केन प्रकारेण भगवन् नक्षत्राणां संस्थितिः संस्थानमा
ख्यातमिति वदेत्। एवमुक्ते भगवानाह प्रत्येकं प्रश्नं विदधाति॥ ता इत्यादि। ता इति प्राग्वत् एतेषामनंतरोदितानामष्टाविंशति
नक्षत्राणां मध्ये यदेतदभिजिन्नक्षत्रं तत्किंसंस्थितं। किमस्य वस्तु संस्थितं संस्थानं यस्य तत्किंसंस्थितं प्रज्ञप्तं भगवता॥ ता एए
सिणमित्यादि। ता इति पूर्ववत् एतेषामनंतरोदितानामष्टाविंशतेर्नक्षत्राणां मध्ये अभिजिन्नक्षत्रं गोशीर्षावलिसंस्थितं

प्रज्ञप्तं ॥ गो ॥ श्रीषं गोश्रीषं तस्यावली तत्तुल्यानां दीर्घरूपा श्रेणि स्तत्समं संस्थानं प्रज्ञप्तं ॥ एवं शेषाण्यपि सूत्राणि भावनीया
नि नवरं दामनी पशुबंधनं शेषं प्राग्वत् सुगमं ॥ संस्थानसंग्राहिकाश्चेमा जंबूद्वीपप्रज्ञप्तिसत्काः सिद्धा गाथा ॥ गोसीसा
वलि काहार सगुणि पुप्फोवयार वावी य ॥ गोवाअसक्कंधग मगभुरधरायसगडुद्धी ॥१॥ मिगसीसावलि रुहिरबिंदु
तुलवद्धमाणगपडागा ॥ पागारपल्लंक हत्थमुहफुल्लपंचेव ॥२॥ खीलववामणिगावली यगयदंतविछुअम्भेयाग ॥
यविक्कमियत्तवासीदिनि साइयसंठाणा ॥७॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां दशमस्य प्रा
भृतस्याष्टमं प्राभृतप्राभृतं समाप्तं ॥७॥ तदेवमुक्तं दशमस्य प्राभृतस्याष्टमं प्राभृतप्राभृतं संप्रति नवमम
रभ्यते तस्य चायमर्थाधिकारः प्रतिनक्षत्रं ताराप्रमाणं वक्तव्यमिति ततस्तद्विषयं प्रश्नसूत्रमाह ॥७॥
ताकहं ते इत्यादि ॥ ताइति पूर्ववत् कथं केन प्रकारेण ते त्वया भगवन्नक्षत्राणां ताराग्रेण ताराप्रमाण
माख्यातमिति वदेत् एवं सामान्यतः प्रश्ने कृते भगवानाह प्रतिनक्षत्रं पृष्टे ता एएसि णमित्यादि ॥ ताइति पूर्ववत् ॥ ए
तेषामष्टाविंशतिनक्षत्राणामभिजिन्नक्षत्रं कतितारं प्रज्ञप्तं भगवानाह ॥ अभिजिन्नक्षत्रं त्रितारं प्रज्ञप्तं एवं शेषा
ण्यपि प्रश्ननिर्वचनसूत्राणि भावनीयानि ताराप्रमाणसंग्राहिका चेयं जंबूद्वीपप्रज्ञप्तिसत्का गाथा ॥७॥ तिगति
गपंचगसयदुगदुगबत्तीसं तिगं तह तिगं च ॥ छप्पंचगतिगइक्कग पंचगतिगइक्कगं चेव ॥१॥ सत्तगदुगदुगपंचगइक्किक्क
गपंच चउतिगं चेव ॥ इक्कारसगचउक्कं चउक्कगं चेव ताराग्गं ॥२॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां दशम ११७

---

स्य प्राभृतस्य नवमं प्राभृतप्राभृतं समाप्तं ॥७॥ तदेवमुक्तं दशमस्य प्राभृतस्य नवमं प्राभृतप्राभृतं संप्रति दशमम
रभ्यते तस्य चायमर्थाधिकारो यथा कति नक्षत्राणि स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया कं मासं नयंती
ति ततस्तद्विषयं प्रश्नसूत्रमाह ॥७॥ ताकहं ते णेत्ता आहियत्ति वएज्जा ॥ ताइति पूर्ववत् कथं केन प्रकारेण भगवन्
त्वया स्वयमस्तंगमनेनाहोरात्रपरिसमापकानि नक्षत्ररूपाणि नेतार आख्याता इति वदेत् तावत् प्रतिमासं पिपृच्छि
षुराह ॥७॥ ता वासाणमित्यादि ॥ ता इति पूर्ववत् वर्षाणां वर्षाकालस्य चतुर्मासप्रमाणस्य प्रथमं मासं श्रावणलक्षणं क
ति नक्षत्राणि स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया नयंति गमयंति भगवानाह ॥७॥ ता चत्तारीत्या
दि ॥ ता इति पूर्ववत् चत्वारि नक्षत्राणि स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया क्रमेण नयंति
तद्यथा उत्तराषाढा अभिजित् श्रवणो धनिष्ठा तत्रोत्तराषाढा प्रथमान् चतुर्दश अहोरात्रान्
स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया नयति तदनंतरमभिजित् सप्त अहोरात्रान्नयति ततः
परं श्रवणनक्षत्रमष्टौ अहोरात्रान्नयति एवं च सकलतया श्रावणमासस्यैकोनत्रिंशदहोरात्रा गता अतः प
रं श्रावणमासस्य संबंधिनं चरममेकमहोरात्रं धनिष्ठानक्षत्रं स्वयमस्तंगमनेनाहोरात्रपरिसमापकतया नयति ए
वं च त्रीणि नक्षत्राणि श्रावणं मासं नयंति तंसि चणं मित्यादि तस्मिंश्च श्रावणे मासे चतुरंगुलपौरुष्या चतुरंगुलाधि
कपौरुष्या चतुरंगुलाधिकपौरुष्या छायया सूर्योऽनुप्रतिदिवसं परावर्तते किमुक्तं भ

सूर्यप०टी
११८

वतिश्रावणमासस्य प्रथमादहोरात्रादारभ्य प्रतिदिवसमन्यान्यमंडलसंक्रांत्या तथा कथंचनापि परावर्त्तते यथा तस्य
श्रावणमासस्य पर्यंते चतुरंगुलाधिका द्विपदा पौरुषी भवति तावदवादितस्स णमित्यादि तस्य श्रावणमासस्य चरमे
दिवसे द्वे पादे चत्वारि चांगुलानि पौरुषी भवति तावासाणमित्यादि ता इति पूर्ववत् वर्षाणां वर्षाकालस्य चतुर्मासप्र
माणस्य द्वितीयं भाद्रपदलक्षणं मासं कति नक्षत्राणि नयंति अत्र भगवानाह ता
इत्यादि ता इति पूर्ववत् चत्वारि नक्षत्राणि नयंति तद्यथा धनिष्ठा शतभिषक् पूर्वप्रोष्ठपदा उत्तराप्रोष्ठपदा तत्र ध
निष्ठा तस्मिन् भाद्रपदमासे प्रथमान् चतुर्दश अहो॰ रात्रान् स्वयमस्तगमनेन अहोरात्रपरिसमापकतया नयति
तदनंतरं शतभिषक् सप्त अहोरात्रान् नयति परमष्टावहोरात्रान् पूर्वप्रोष्ठपदा तदनंतरमेकमहो
रात्रमुत्तरप्रोष्ठपदा एवमेनं भाद्रपदं मासं चत्वारि नक्षत्राणि नयंति ॥७॥ तस्सिं च णमित्यादि तस्मिंश्च णमिति वा
क्यालंकारे मासे भाद्रपदे अष्टांगुलां पौरुष्या अष्टांगुलाधिकपौरुष्याश्छायया सूर्योऽनुप्रातेदिवसं परावर्त्तते
अत्राप्येषा भावना भाद्रपदमासे प्रथमादहोरात्रादारभ्य प्रतिदिवसमन्यान्यमंडलसंक्रांत्या तथा कथमपि परावर्त्तते
यथा तस्य भाद्रपदस्य मासस्यांते अष्टांगुलिका पौरुषी भवति एतादवादितस्स णमित्यादि सुगमं एवं शेषमासगता
न्यपि सूत्राणि भावनीयानि नवरं लेहट्ठाइं ति निय आइ ति रेखा पादपर्यंतवर्तिनी सीमा तत्रस्थानि त्रीणि पदानि पौ
रुषी भवति किमुक्तं भवति परिपूर्णानि त्रीणि पदानि पौरुषी भवति ततश्चतुरंगुला प्रतिमासं वृद्धिस्तावद्वक्तव्या याव ११८

---

त्पौषमासस्यांते चत्वारि पदानि पौरुषी भवति ततः प्रतिमासं चतुरंगुलहानिस्तावद्वक्तव्या यावदाषाढमासस्यांते आषाढपर्यंते द्विपदा पौरु
षी भवति इदं च पौरुषीपरिमाणं व्यवहारत उक्तं निश्चयतः सार्द्धत्रिंशताहोरात्रैश्चतुरंगुला वृद्धिर्हानिर्वा वेदितव्या
तथा च निश्चयतः पौरुषीपरिमाणप्रतिपादनार्थमिमाः पूर्वाचार्यप्रदर्शिताः करणगाथाः पव्वे पन्नरसगुणे तिहि
सहिए पोरिसीए आणयणे छलसीयसयविभत्ते जं लद्धं तं वियाणाहि ॥१॥ जइ होइ विसमलद्धं दक्खिणमयणं ठविज्जा
यव्वं अह हवइ समं लद्धं नायव्वं उत्तरं अयणं ॥२॥ अयणगए तिहिरासी चउगुणए पव्वपायसइयव्वं जं लद्धं मलाणि य रवयवु
ड्ढीय हासी य ॥३॥ दक्खिणवुड्ढी दुपयाउ अंगुला एवं त्तु हाइ नायव्वा उत्तरअयणे हाणी कायव्वा चउहि पायाहिं
॥४॥ सावणबहुलपडिवयाइ पयाउ पोरिसी धुवा होइ चत्तारि अंगुलाइं मासेण वड्ढति तत्तो ॥५॥ एक्कत्तीस
इभागा तिहिए पुण अंगुलस्स चत्तारि दक्खिणअयणे वुड्ढी जाव य चत्तारि उ पयाइं ॥६॥ उत्तरअयणे हाणी चउ
हिं भागेहिं जाव दो पाया एवं तु पोरिसीए वुड्ढिखया हुंति नायव्वा ॥७॥ वुड्ढीवा हावस्या पोरिसीए दिवस तओ दिवसगए
णं जलठं तु अयणगणं ॥८॥ एतासां क्रमेण व्याख्या युगमध्ये यस्मिन् पर्वणि यस्यां तिथौ पौरुषीपरिमाणं ज्ञा
तुमिष्यते ततः पूर्वं युगादित आरभ्य यानि पर्वाण्यतिक्रांतानि तानि ध्रियंते ध्रुत्वा च पंचदशभिर्गुण्यंते गुणयित्वा
च विवक्षितायास्तिथेः प्राग् अतिक्रांतास्तिथयस्तत्र प्रक्षिप्यंते ततस्तेषां षडशीत्यधिकेन शतेन भागो
ह्रियते इह एकस्मिन्नयने त्र्यशीत्यधिकमंडलशतपरिमाणेषु निष्पादितानां तिथीनां षडशीत्यधिकं शतं त

सूर्यप्र०वृत्ति ॥११९ वति। ततस्सन्नसाग दरणं। सागवह्नातयत्नवृंतद्विज्ञाती द्विसम्यगवक्षरयत्यर्थः। तत्र यदि लघ्वं विसम्मं लवति। यथा
एकस्मिन्क्षणे चक्रः सप्ताकानवाको वातदात त्यत्यनव निदि दक्षिणमयने ज्ञातव्यं अथ स वृत्तिल ष समम तथा। किंकथ
त्रयक्षः षट्क्रा अष्टकाबादशाकावातदातत्संतवनिर्दि नरायणमवासयं। तदेवमुक्तो दक्षिणायनानरायनपार
ज्ञानोपाय॥ संप्रति षडशीत्यधिकनवशतनसा गकृत यात्रवमवति शृत। यदि वा सागांसं सावनयत्र राशपतिष्ठ
ति। तत्रतिथिमाह॥ ७॥ अयणगयइत्यादि। अयय वसागे ज्ञते भागाःसं सवेवाशेषीकृतो यनगतः स्थितिराशिव
नतिस व चत्रसिंधिपिते। गुणयित्वा च पर्वपादनयु गमध्ये यानि सर्वसंख्यया यथा यथं ४०००॥ ॥७॥ पर्वाणि
वञ्चविंशत्यधिकशतसंख्यानि तथा पाद। नवखपिनिंशेनता कविंशता इत्यर्थः। तथा सागरूते
यत्नवृंतान्यंगुलानि चकारादंगुलांशाश्चापो। रूप्याःकृत्य ए ख्याज्ञातव्या। ति। दक्षिणायनेपदषुवरा
त्रिरूपरिष्यवोज्ञातव्यानि। त नराशि अत्र राश्ये श्वायस्मात्या नीत्यर्थः। अथैव वृत्तस्य गुणकारस्य लाग पद
हारस्य वाक सम्भुत्यति। तथा ताय दि षडशीत्यधिकेन तिथि शातनवविंशा तनवविंशतिरंगुलानि क्षाय
वृद्धौ वा प्राप्यंता तात एकस्यां तिथौ का वृद्धि र्हानिर्वा। राशित्रय स्थापना ॥१८६॥ १॥ १॥ अत्रां त्येनराशिना एक
लक्षणेनमध्यमा राशिश्च त्रविंशातिरूपो गुण्यते। जाताः सता वा न वयाकतगुणनेतादवस्थवती तिवचनात्तत ११९
तश्राद्येनराशिना षडशीत्यधिकशत रूपेण सागो हियत। ते अपरितनराशेः स्वाक वा ला गानस्य। तन॥

---

द्य ष्टेदकरापा: षाकृतापवर्तना जात उपरितनाराशिश्चत्रषकरूपा अस्मिनएकविंशतालसाम्मकस्यां तिथौ वृद्धारपकविं
शवलागाः कृस्य वृद्धौ चेतिवत्रांका गुणकारउक्तापकविंशद्भाग हारइति। इहयत्नवृंतान्यंगुलानि क्षाय वृद्धौ वा ज्ञात
व्यानीत्यर्थः। तत्र कस्मिन्नयने कि यत्प्रमाणं ध्रुवराशेरूपरिष्टात् कस्मिन्वा अयने कि प्रमाणं ध्रुवराशेः क्षयस्ते
तन्निरूपणार्थमिदं करणं द्विस्यादि। दक्षिणायने द्विपदा व्यपदव्य स्यापरिशिंअंगुलानां वृद्धिर्ज्ञातव्या। उत्तरायणे
व चत्पः पादस्यः सकाशादंगुलानां हानिः। तत्र युग। मध्ये प्रथमे संवत्सरे दक्षिणायने यतो दिवसादारभ्य वृद्धिः सं
निरूपयति। सावणेत्यादि। गाथारूपा युगस्य प्र थमेसंवत्सरेश्रावणमासि बहुलपक्ष प्रतिपदि पौरुषी
द्विपदापदव्ययप्रमाणा ध्रुवा स्वति। ततस्त स्याः प्रतिपदआरभ्य प्रतिथिक्रमेण तावद्वर्धते या
वद्मासेन सूर्यमासेन सार्धत्रिंशदहोरात्रप्रमा णेन चंद्रमासापेक्षया एकत्रिंशत्तिथि रित्यर्थः॥ चत्वा
रिंशदंगुलानि वर्धते कथमेतदवसीयते। यथा मास नं सूर्यमासेन सार्धत्रिंशदहोरात्रप्रमाणेन एकत्रिंशत्तिथ्या
त्मा कानत्पत घ्याद्दाएकतीसत्यादि। यत एकस्यां तिथौ चत्वार एकविंशति भागा वर्धते। एतच्च प्रागेवलावितं परिस्फुटं
दक्षिणायने वृद्धिः परिसर्पाणि चत्वारि पदानि। ततो मासेनसूर्यमासेन सार्धत्रिंशदहोरात्रप्रमाणेन एकत्रिंशत्तिथ्या
त्मकेन त्क्रांतादवस्थाद्वृद्धिः। संप्रति हानिमाह। उत्तरत्यादि। युगस्य प्रथमसंवत्सरे माघमासे बहुलपक्षसप्तम्यां।
आरभ्य चत्पः पादेभ्यः सकाशात्प्रतितिथि एकविंशद्भागचतुष्टय हानिस्तावद्वक्तव्या याव द्वत्तरायणपर्यंतेषो पादो

पौरुषीति। एष प्रथमसंवत्सरगतो विधिः। द्वितीयसंवत्सरे श्रावणमासि बहुलपक्षे त्रयोदशीमादौ कृत्वा द्विः। माघमा
सि शुक्लपक्षे चतुर्थीमादिं कृत्वा कृत्य। तृतीयसंवत्सरे श्रावणमासि शुक्लपक्षे दशमी द्वादशादि। माघमासि बहुल
पक्षे प्रतिपदं कृत्यस्यादि। चतुर्थसंवत्सरे श्रावणमासि बहुलपक्षे सप्तमीं कृत्वेरादि। माघमासि बहुलपक्षे त्रयोदशी
कृत्यस्यादि। पंचमसंवत्सरे श्रावणमासि शुक्लपक्षे चतुर्थी कृत्वेरादि। माघमासि शुक्लपक्षे दशमी कृत्यस्यादि। एत
त्करणगाथाद्वयानमपि पूर्वाचार्यप्रदर्शितव्याख्या नादवसितं। संप्रत्युपसंहारमाह। एवं दुस्त्यादि। एवमुक्तेन प्र
कारेणायोरुष्या पौरुषी विषायहृद्धिकृत्यायप्र क्रमं दक्षिणायने उत्तरायणे च वेदितव्यो। तदेवं मद्रु
माधिकृत्य व्याख्याता। करणगाथा। संप्रत्यस्यक रणस्य भावना क्रियते। कोऽपि पृच्छति युगे आदित आर
पंचाशीतितमे पर्वणि यं कस्यां तिथौ कति पदा पौ रुषी भवति। तत्र चतुरशीतिर्ध्रियते तस्याश्चाध सात्यं च
ति षोडश इति पंचाशीतिरशीतिश्च पंचदशभिर्गुण्यते। जातानि द्वादशशतानि षष्ठ्यधिकानि १२६० एतेषु मध्ये ध
नाः पंचप्रक्षिप्यन्ते जातानि द्वादशशतानि पंचषष्ट्यधिकानि १२६५ एतेषां षडशीत्यधिकेन शतेन भागो ह्रियते लब्ध
षट् आगतं षट् अयनान्यतिक्रांतानि सप्तमं त्वयनं वर्तते तत्र च शेषा अंकाः पंचाशदधिकं शतं तिष्ठति १४९ तत अ
ते द्विगुण्यते जातानि पंचशतानि षण्णवत्यधिकानि ५९६ तेषामेकत्रिंशता भागो हृत्वा लब्धाः एकोनविंशतिः शेषास्त्
सप्त। तत अष्टादशांगुलानि पादशब्देन विंशतिर्मा दशभिः पंचदशांगुलानि पादस्तु कोणे विंशति तेष्टं तिसप्तअंगुलानि षष्ठं वायन

डाक्टर भाऊदाजी ... संग्रह
DR. BHAU DAJI MEMORIAL

१२०

उत्तरायणं तन्नं सप्तमं तु दक्षिणायनं वर्तते ततः पदमेकं सप्तसंख्यं अंगुलानि पदवय प्रमाणे ध्रुवराशौ प्रक्षिप्यते
जातानि वीणि पदानि सप्त अंगुलानि एकसप्त एकत्रिंशद्भागाः शेषा स्तावन्तो ता यावत् अर्म। तत्राष्टायवा
अंगुलमिति सप्त अंगुलानि गुण्यंते जातानि षट्पंचाशत्। एतस्याः एकत्रिंशता भागो हृते लब्ध एकोऽयवः। शेषा
स्तिष्ठति यवस्य पंचविंशतिरेकत्रिंशद्भागाः आगतं पंचाशीतितमे पर्वण्यां त्रीणि पदानि सप्त अंगुलानि
एकोयवः एकस्य च यवस्य पंचविंशतिरेकत्रिंशद्भागाः एतावती पौरुषी। तथा अपरः कोऽपि पृच्छति सप्तनवतितं
मे पर्वण्येकस्यां तिथौ कति पदा पौरुषी तत्र षण्णव तिर्ध्रियते तस्या अर्धसात्यं च पण्णवतिश्च पंचदशभिर्गुण्यं
ते जातानि चतुर्दशशतानि चत्वारिंशदधिकानि १ ४४० एतेषां मध्ये धन्नाः पंच प्रक्षिप्यंते जातानि चतु
र्दशशतानि पंचचत्वारिंशदधिकानि १४४५ एतेषां षडशीत्यधिकेन शतेन भागो ह्रियते लब्धाः सप्त अयनानि
शेषं तिष्ठति त्रिचत्वारिंशदधिकं शतं १४३ तत्र चतुर्भिर्गु ण्यते जातानि पंचशतानि द्विसप्तत्यधिकानि ५७२ तेषामेक
त्रिंशता भागो ह्रियते लब्धान्यष्टादशांगुलानि १८ तेषां च प्रमादश्वांगुलैः पदमिति लब्धमेकं षट्अंगुलानि तप
रिपाशा तदरं तिच तुर्दशा भवति च नयनार्थमष्टभिर्गुण्यंते। जातं द्वादशांतरं शतं ११२ तस्यैकत्रिंशता भागे हृते
लब्धास्त्रयो यवाः शेषा स्तिष्ठति यवस्य एकोनविंशतिरेकत्रिंशद्भागाः सप्तवायनान्यतिक्रांतानि अष्टमं चायनं
उत्तरायणं तन्नं तत्र पदं च तु ष्टयरूपात् ध्रुवराशेः निवर्त्त्याः तत एकं पदं सप्त अंगुलानि त्रयो यवाः एकस्य च यवा

सूर्यप्र वृत्ति ॥१२१॥ स्याष्टको नविंशतिरेकविंशतिभागा इति पदचतुष्टयात्मकत्वे मंतिष्ठति तत्पदं पंचांगुलानि च द्वाविंशाद्वायाकस्यैक
वस्य षष्ट्येकविंशादिभागाः एतावता युगे आदित आरभ्य सप्तनवतितमे पर्वणि पंचम्यां तिथौ पौरुषी तिः एवं स
र्वत्रापि भावनीयं संप्रति पौरुषीपरिमाणे तावन्मात्रपरिमाणज्ञापनार्थमियं करणगाथा वुड्ढीवत्यादि। पौरुष्या या वृ
द्धिर्हानिर्वा दृष्टा ततः सकाशात् वृद्धिवशगतेन पर्वप्रमाणेन वा पर्वराशिः कर्मत्रैराशिकेन तत्र यल्लब्धं तत्र ध्रुवमागतं
अयनस्य तावत्प्रमाणं गतेऽदिते तद्वेकरणगाथाक्षरार्थः ॥ भावना त्वियं तत्र दक्षिणायने पदद्वयात्मिका परिवृद्धिः
अंगुलानि द्वाविंशोद्दिष्टानि ततः कापि वृद्धिरिति क्रिया … ग्रंतं दक्षिणायनस्य अत्र त्रैराशिककर्म वितारायदिव
तुर्विंशंगुलस्यैकविंशतिभागे एकातिथिर्लभ्येत … ततः अष्टत्रिंशदंगुलैः कति तिथयो लभ्यामहे राशित्रय
स्थापना ॥४।१।४ अत्रान्त्यराशिरंगुलरूप एकविंशत्या … गुणकरणार्थमेकविंशत्या गुण्यते जातं चतुर्विंशत्यधिकं
शतं १२४ तेन मध्यराशिर्गुण्यते जातं तावदेव चतुर्विंशत्यधिकं शतं १२४ एकेन गुणने तावदेव भवतीति वचनात्
तस्य चतुष्करूपेणादिराशिना भागो ह्रियते लब्धा एकत्रिंशत्तिथयः ॥ आगतं दक्षिणायनस्यैकत्रिंशत्तमायां ति
थौ चतुरंगुला पौरुष्यां वृद्धिरिति तथा उत्तरायणे पदचतुष्टयादंगुलाद्यंगुलाष्टकं हीनं पौरुष्याः कापि तस्य को
वृद्धिरिति किं गत उत्तरायणस्य अत्रापि त्रैराशिकं यदि चतुर्विंशंगुलस्यैकविंशद्भागे एकातिथिर्लभ्यते ततो
अष्टसिरंगुलैर्हीनैः कति तिथयो लभ्यन्ते राशित्रय स्थापना ४।१।८ अत्रान्त्यराशिरेकत्रिंशद्भागकरणार्थमेकत्रिं १२१

शता गुण्यते जातं द्वे शते अष्टाचत्वारिंशदधिके २४८ ताभ्यां मध्यराशिरेककरूपो गुण्यते जाते तावदेव शते अष्टाचत्वारिं
शदधिके २४८ तयो राशिना चतुष्करूपेण भागहरणं लब्धा द्वाषष्टिः ६२ आगतमुत्तरायणे द्वाषष्टितमायां तिथौ अ
ष्टावंगुलानि पौरुष्या हीयन्ते इति तस्मिंश्च णं मासे वट्टाए इत्यादि तस्मिन्नाषाढमासे प्रकाश्यस्य वस्तुनो वृत्तस्य वृत्ततया
समचतुरस्रसंस्थानसंस्थितस्य समचतुरस्रसंस्थानसंस्थितया न्यग्रोधपरिमंडलसंस्थानस्य न्यग्रोधपरिमंडलतया उपलक्षण
मेतत् शेषसंस्थानसंस्थितस्य प्रकाश्यस्य वस्तुनः शेष संस्थानसंस्थितया आषाढमासे प्राय सर्वस्यापि प्रकाश्यस्य व
स्तुनो दिवसस्य चरमे अतिक्रान्ते शेषपौरुषीप्रमाणा छा या भवति निष्कर्षतः पुनराषाढमासस्य चरमदिवसे सर्वत्रापि
सर्वस्यापि तारमंडलवर्तमाने सूर्ये ततो यदुक्तं इयं वस्तु यत्संस्थानं भवति तस्य छायापि तत्संस्थाना परिज्ञायते
[illegible] तदुक्तं [illegible] कायमणु [illegible] इत्यादि [illegible] कायस्तस्य छाया निबंधनस्य वस्तुनः कायः शरी
रं स्वकायमणु [illegible] इत्येवं द्रष्टव्या अणुगिती इत्यादिना [illegible] तया स्वकायमणु
गिन्या छायया सूर्यः प्रतिदिवसं परावर्त्तते एवं कृत्स्नं भवति आषाढस्य प्रथमादहोरात्रादारभ्य प्रतिदिवसमन्या
न्यमंडलसंक्रान्त्या तथा कथंचनापि सूर्यः परावर्तते यथा सर्वस्यापि प्रकाश्यस्य वस्तुनो दिवसस्य चरमे सा तिक्रान्ते शेष
पौरुषीप्रमाणा च छाया भवतीति गाथा संग्रहार्थः ॥९॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां द
शमस्य प्राभृतस्य दशमं प्राभृतप्राभृतं समाप्तं ॥१०॥ तदेवमुक्तं दशमस्य प्राभृतस्य दशमं प्राभृतप्राभृतं सम्प्रत्येकाद

शामारभ्यते। तस्य चाग्रमघाधिकारोऽयमान नक्षत्राण्यधिकृत्य चंद्रमार्गविक्षेप्याऽतितत्र विषये प्रश्नसूत्रमाह ॥ ८ ॥ ता
कत्वात इत्यादि। ताः इति पूर्वविवाक्यस्थेकेन प्रकारेण नक्षत्राणां दक्षिणतः उत्तरतः। प्रमर्दी ताश्च दिवा सूर्येन क्षत्रैर्वि
रहितत्तथा चंद्रस्य मार्गस्थितं चंद्रस्य मंडलगत्या परिभ्रमणरूपा मंडलरूपा वा मार्गः आख्यात इति वादनु। लगचानाव
नाणपरिमितं इत्यादि। ताः इतः पूर्वविवृणातेषामष्टाविंशतेर्नक्षत्राणां माध्यमस्मीति निपाता ज्ञाबदार्ष नित्याघासतिता
नि नक्षत्राणि यानि तानि इति वाक्यालंकारे सदा चंद्र स्य दक्षिणेन दक्षिणस्यां दिशि व्यवस्थितानि योगं युंजंति।
कुर्वंति। तथा संतितानि नक्षत्राणि विविक्षिप्तसदा चंद्र स्य उ त्तरेण उत्तरस्यां दिशि व्यवस्थितानि योगं युंजंति तथा
संति तानि नक्षत्राणि यानि चंद्रस्य दक्षिणस्य ाम पि दि शि स्थितानि उत्तरस्यामपि दिशि स्थितानि योगं युंजंति
प्रमर्दमपि प्रमदरूपमपि योगं कुर्वंति। तथा संति ता नि नक्षत्राणि यानि चंद्रस्य दक्षिणामपि दिशि व्यवस्थितानि यो स्पा
गं युंजंति प्रमदरूपमपि योगं युंजंति। अस्ति तत्र। चे यश्च चंद्रस्य प्रमदरूपा योगं नक्षिणपं सामान्यमनसग
वतो क्तः सगवा वगोतामा विशेषावगमति मित्तं सूत्र प्रश्नवति ॥ ८ ॥ ता परा सिणमित्यादि गुगमसगवानां सूर्य ताणप
रिणमित्यादि पूर्वविवृणा तेषामनंतरादितानामष्टाविंशतिनक्षत्राणां मध्ये यानि नक्षत्राणि सदा चंद्रस्य दक्षिणस्यां
दिशि व्यवस्थितानि योगं कुर्वंति ता नि षट् तद्यथा। मृगशिरस्य आर्द्रा पुष्य आश्लेषा मूल इत्येतानि हि सर्वाण्य
पि चंद्रस्य चंद्रमंडलस्य बहिश्चारं चरंति तथा चोक्तं करणविलावनायां पन्वसमसस्य चंद्रमंडलस्य बाहिरे मिगसि १२२

रअदा पुस्सा अस्सिलेसा हत्थ मूलाय जंहद्दीप ब्रह्म भावेण हक्केमंगाणं अव भासा सिलेस हत्थो ता हव मूला अवा हिर मंडल
स्स हवणेतनक्षत्रा। ततः सदेव दक्षिणां दिगव्यवस्थितान्यवगानि चंद्रेण सह योगं युज्यत्यपश्चात् नान्यथेति। तथा तंत्रा।
तेषामष्टाविंशतेर्नक्षत्राणां मध्ये यानि नक्षत्राणि सदा सर्वकालं चंद्रस्योत्तरेण उत्तरस्यां दिशि व्यवस्थिता।
नि योगं युंजं ति कुर्वंति तानि द्वादश तद्यथा अश्विनी इत्यादि। एतानि हि द्वादशापि नक्षत्राणि सर्वदा सर्वं चंद्रमंडलवासं चरंति
तथा चोक्तं करणविलावनायां सयट्टमसब्बंतरचंदमं डलेन एक नाशमेतं जहा। अस्सिणि सवण धणिट्ठा सयभिस पु
व्वभद्दवया उत्तरभद्दवया रेवई अस्सिणी भरणी उव्व फग्गुणी साउत्तरा फग्गुणी साइंदिति। एदा चेते सदा चंद्रस्यो
गस्सदा व्व लावा वंद्रःशशक्षप मंड ले व्वबंतितासः दिवैतान्यक्षरादिषु व्यवस्थितान्येवं चंद्रमसा सह योगं युपयंता
तित्थातत्रा तेषामष्टाविंशतेर्नक्षत्राणां माध्ययानि ना नि नक्षत्राणि यानि चंद्रस्य दक्षिणस्यामपि दिशि व्यवस्थितानि
योगं युंजंति उत्तरस्यामपि दिशि व्यवस्थितानि योगं ॥ युंजंति प्रमर्दरूपमपि योगं युंजंति तानि सप्त तद्यथा। कृत्तिका रो
हिणी पुनर्वसु मघा चित्रा विशाखा अनुराधा ज्येष्ठा केविस्तुनचैष्टानक्षत्रमपि दक्षिणोत्तर प्रमर्दयोगिमन्यतेनयथा चोक्तं लोकश्रियां
पुणवसु राहिणी चित्ता महाजेट्ठा राहक्कत्तिय विसाहा। चंदस्स उत्तयजोगो। न अवज्जत्तयजोगा। ति व्याख्यानं यता टीकाकृ
ताकं। मतानि नक्षत्राणि उत्तरयोगीनि चंद्रस्योत्तरेण दक्षिणेन च युज्यंते। कदाचित् प्रमर्दमप्युपयांति। तत्रैव स्यमाणज्येष्ठ
सत्रेण सह विरोधी तिन प्रमाणं तथा तत्र तेषामष्टाविंशतेर्नक्षत्राणां माध्ययानि नक्षत्राणि यानि तणमि ति वाक्यालंकारे स
दा चंद्रस्य दक्षिणेनापि दक्षिणस्यामपि दिशि व्यवस्थितेयोगं युंजंति। प्रमर्दप्रमदरूपं च योगं युंजंति सणमिति वाक्यालंका।

सूर्यप्र० वृ० ॥१२३॥

णो ये आसाढे पूर्वाषाढोत्तराषाढारूपे निर्दिष्टस्यैकं चतुःसारे तस्सा वप्रावेऽकं उत्तराषाढे च उत्तरेण अपन्नते इयमत्र इति तत्र ये ते वा रेस
वंधाचमस्य पंचदशस्य मंडलस्यांतरे तो द्वे बहिः। तथा चोक्तं करणविभावनायां पुव्वुत्तराणं आसाढाणं दो दो ताराओ अभि
तरओ वा हिरओ सव्वबाहिरस्स मंडलस्स इति ततो ये ते तारे अभ्यंतरस्य योग्भिं तस्य दागच्छतीति तदपेक्षया प्रमर्दयोगं
युंक्त इत्युच्यते द्वे ते तारे बहिः चंद्रस्य पंचदशान्मंडलेवारुंधतः। सदा दक्षिणदिग्व्यवस्थितत्वात्सदापक्षभाव दक्षिणतयो
गं युंक्त इत्युक्तं संप्रत्येतायां प्रमर्दयोगभावनायां किंचिदुच्यते सव्ववाहिरत्यादि। तत्र पूर्वाषाढोत्तराषाढारू
पनक्षत्रचतुष्टयस्य योगमधिकृत्य सूत्रमुच्यते वा सदा सर्ववाह्ये मंडले व्यवस्थिते ततो यदा पूर्वाषाढोत्तराषा
ढाभ्यां सह तज्ञावागच्छति तदानियमात्ताभ्यां तर तारकाणां मध्येन गच्छतीति तदपेक्षया प्रमर्दमपि योगं युं
क्ते इत्युक्तं तथात्रातिपामष्टाविंशतिनक्षत्रा णां मध्ये यत्र नक्षत्रं यत्र सदा चंद्रस्य प्रमर्दप्रमर्दरूपं योगं चं
युनक्ति सा एकाद्यष्टात देवमंडलगत्यापि स्त्रि मणरूपा चंद्रमागतिक्ता संप्रति मंडलरूपा चंद्रमार्गानुति
धिकृत्य प्रथमतस्तद्विषयं प्रश्नसूत्रमाह ॥ ता कइ णं त्यादि। ता इति पूर्ववत् कति किंसंख्यानि णं भिति वाक्यालं
कारे चंद्रमंडलानि प्रज्ञप्तानि भगवता नाह्या ता पन्नरस इत्यादि। ता इति प्राग्वत् पंचदश चंद्रमंडलानि प्रज्ञप्तानि तत्र प
चदशमंडलानि जंबूद्वीपावगाह्य पंचदश मंडलानि लवणसमुद्रतश्चोक्तं जंबुद्दीवपन्नत्तौ जंबुद्दीवे णं भंते दी
वे केवइयं ओगाहित्ता केवइया चंदमंडला पन्नत्ता गोयमा जंबुद्दीवे दीवे असीयं जोयणसयं ओगाहित्ता ए
त्थ णं पंच चंदमंडला पन्नत्ता लवणे णं भंते समुद्दे केवइयं ओगाहित्ता केवइया चंदमंडला पन्नत्ता गोयमा लवणे १२३

णं समुद्दे तिन्नि तीसाइं जोयणसयाइं ओगाहित्ता एत्थ णं दस चंदमंडला पन्नत्ता एवामेव सपुव्वावरेणं जंबुद्दीवे लव
णे य पन्नरस चंदमंडला भवंतीति अक्खायं। ता इत्यादि। ता इति तत्र एतेषां पंचदशानां चंद्रमंडलानां मध्ये अस्ति
संति चंद्रमंडलानि यानि सदा नक्षत्रैरविरहितानि तथा संति चंद्रमंडलानि यानि सदा नक्षत्रैर्विरहितानि तथा
संति चंद्रमंडलानि यानि रविशशिनक्षत्राणां सामान्यानि साधारणानि किमुक्तं भवति रविरपि तेषु मंडलेषु गच्छति रवि
शशी अपि नक्षत्राण्यपीति तथा संति चंद्रमंडलानि या नि सदा आदित्येन विरहितानि विवक्षावचनं प्राकृतत्वाद्वि
रहितानि यत्र कदाचिदपि सूर्या न गच्छति कोपि सूर्यो न गच्छतीति भावः। एवं सामान्यतो
स्या वानुगातमो विधि भावगमननिमित्तं सूत्र प्रश्नयति ता एएसि णमित्यादि सुगमं नवरं ता ए
एसि णमित्यादि। ता इति पूर्ववत् एतेषां पंचदशानां चंद्रमंडलानां मध्ये यानि तानि चंद्रमंडलानि यानि सि
चंद्रमंडले ति यानि सदा नक्षत्रैरविरहितानि तान्यष्टौ तद्यथा प्रथमं चंदमंडलं इत्यादि। तत्र प्रथमे अभिजिदादीनि
द्वादश नक्षत्राणि तथा चात्र संग्रहणिगाथा। अभिई सवण धणिट्ठा सयभिसया दो य होंति भद्दवया। रेवइ अस्सि
णि भरणी दो फग्गुणि साइ पढमंपि। द्वितीये चंद्रमंडले पुनर्वसुमघे षष्ठे चंद्रमंडले कृत्तिका सप्तमे रोहिणी चि
त्रा अष्टमे विशाखा दशमे अनुराधा एकादशे ज्येष्ठा पंचदशे मृगशिरआर्द्रापुष्याश्लेषाहस्तमूलपूर्वाषा
ढोत्तराषाढा चेत्येतान्यष्टौ नक्षत्राणि चरंत्यपि पंचदशस्य मंडलस्य बहिश्चारं चरंति तथा पिता नितस्य प्रत्या

सव्वाणीति तत्र गण्यंते तत्रोत्तरक्षेत्रविरोध: तथा तत्र तेषां पंचदशानां चंद्रमंडलानां मध्ये यानि तानि चंद्रमंडला
नि यानि सदा नक्षत्रैर्विरहितानि तानि सप्त तद्यथा द्वितीयं चंद्रमंडलमित्यादि तथा तत्र तेषां पंचदशानां चंद्र
मंडलानां मध्ये यानि तानि चंद्रमंडलानि रविनक्षत्राणां सामान्यानि सर्वेषां तानि चत्वारि प्राग्वत् भवंति
तद्यथा प्रथमं चंद्रमंडलमित्यादि तथा तत्र तेषां पंचदशानां चंद्रमंडलानां मध्ये यानि तानि चंद्रमंडलानि यानि सदा।
आदित्यैरविरहितानि तानि पंच तद्यथा षष्ठं चंद्र मंडलमित्यादि सुगमं एतद्गणनानि चत्वार्यभ्यंतराणि पंच चंद्र
मंडलानि तद्यथा प्रथमं द्वितीयं तृतीयं चतुर्थं पंचमं यानि च सर्वबाह्यानि पंच चंद्रमंडलानि तद्यथा। एकादश
मं द्वादशं त्रयोदशं चतुर्दशं पंचदशमित्येतानि च शः सूर्यस्यापि साधारणानीति गम्यानि तथा चाह मध्य
त्रदसविवमंडलाइं अभितरबाहिराइं विससीणं सामन्नाइं पि अत्थि मायणेयाइं तिसेसाणि। अस्यात्रक
रगमनिकां पंच अभ्यंतराणि पंच बाह्यानि सर्व संख्या। यावद्दशमंडलानि नियमादुरविशशिनो: सामान्यानि सा
धारणानि शेषाणि तद्यथा निपंचचंद्रमंडलानि षष्ठादीनि दशपर्यंतानि तानि प्रत्येकान्यसाधारणानि चंद्रस्यैतच्च
चंद्रस्य गच्छतिन उणाउ विदपिसूर्य इति सावसूक्ते किं चंद्रमंडले कियता सागेन सूर्यमंडालेन स्पृष्टपातं कियंतं
वा चंद्रमंडलस्यापांतरालं सूर्यमंडलानि कस्यवा षडादीनि दशपर्यंतानि पंचचंद्रमंडलानि सार्धेण तस्य स्पृष्टपं तत्र
ति तितावतांविसागोपदर्शनिं पूर्ववाद्यो: क्रतं तत्र सूर्याद्दिनेयजनाउग्रहायापदस्तुपतितत्रप्रथमतयातद्विसाव नार्थं १२४

---

विकंपक्षेत्रकाष्ठानिरूप्यते इह सूर्यस्य विकंपक्षेत्रं काष्ठापं चयोजनशतानि दशोत्तराणि तथा हि यदि सूर्यस्येकेनाहोरात्रेण विकं।
पाख्यानं तावकस्य वयोजनस्याष्टाचत्वारिंशदिकषष्टिसागालस्यांतस्त्र्यशीत्यधिकेनाहोरात्रशतेन किंलभामहे राशित्रयस्थाप।
ना।१।२ [४८/६१] । १८३। अत्रसवर्णनार्थं द्वे योजनएकषष्ट्या गुण्यते गुणयित्वा चोपरितनाअष्टाचत्वारिंशदिकषष्टिसागाः प्रक्षिप्यंत
तते। जातसप्तत्यधिकशतं १७० ततत्र्यशीत्यधिकनशतेनरंत्यराशिना गुण्यते जातान्येकत्रिंशत्सहस्राणि शतामकंदशो
त्तराणि ३११० ततपतस्यराशिया जनार्थमिकषष्ट्यागो॥ क्रियते लब्धानि पंचयोजनशतानि दशोत्तराणि एयावता च सूर्यो
स्य विकंपक्षेत्रकाष्ठा चंद्रमस: पुनर्विकंपक्षेत्रका .ष्ठापंचयोजनशतानि नवोत्तराणि एकस्य च योजनस्य विंशंचा।
शदेकषष्टिसागाः तथाहियदि चंद्रमस एकेनाह- सत्रेण विकंपः षट्त्रिंशद्योजनानि एकस्य च योजनस्य पंच
विंशतिरेकषष्टिसागाः एकस्य च एकषष्टिसागस्य। चत्वारः सप्तसागा लभ्यते ततश्चतुर्दशभिरहोरात्रैः किंलभाम
हे राशित्रयस्थापना॥१। [३५/२१] ।१४। अत्रसवर्णनार्थं प्रथमत :षट्त्रिंशद्योजनानि एकषष्ट्या गुण्यते गुणयित्वा चोपरितनाः पंचविंश
तिरेकषष्टिसागाः सत्र प्रक्षिप्यंते जातानि द्वाविंशतिशतानि एकविंशत्यधिकानि २२२१ एतानि सप्तभिर्गुण्यंते गुणयित्वा।
चोपरितनाश्चत्वारः सप्त(४) सागाः प्रक्षिप्यंते तत जातानि पंचदशसहस्राणि पंचशतान्येकपंचाशदधिकानि १५५५१ त
तो योजनानयनार्थं दि(७) दशाभिरप्येकषष्टिलक्षण: सप्तभिर्गुण्यते जातानि चत्वारिंशतानि सप्तविंशत्यधिकानि ४२
७ तत उपरितनाराशिश्चतुर्दशाभिरंत्यराशिरूपैर्गुण्यते तत जातं द्वेलक्षे सप्तदशसहस्राणि सप्तशतानि चतुर्दशाधि

कानि १२०४ ततश्चैवं द्वादशकयावत्पाश्चात्यमंडलपरिवर्तने जातत्रयस्त्रिंशता शीत्यधिकैकत्रिंशद्वसहस्राणि शतमेकं त्रयस्त्रिंशं
१०२ द्वादशशीतिश्चैकषष्टिभागस्तत्र आद्यान् गच्छतेलब्धानि पंचयोजनशतानि तत्वोत्तराणि एकस्य च योजनस्य त्रिपंचाशद
कषष्टिभागा ५१० ५३ एतावती चंद्रमसो विकंपक्षेत्रकाष्ठा सूर्यमंडलस्य च परस्परमंतरं ४ योजनेन चंद्रमं
डलस्य परस्परमंतरं ३५ योजनानि त्रिंशद्योजनानि एकस्य च योजनस्य त्रिंशदेकषष्टिभागा एकस्य चैकषष्टिभागस्य चत्वा
रः सप्तभागाः उक्तं च जंबूद्वीपप्रज्ञप्तौ सूर्यमंडलस्स णं अंतरसूरमंडलस्स य सणं केवइयं अबाहाए अंतरे पन्नत्ते गोय
मा दो जोयणाई सूरमंडलस्स अबाहाए अंतरे एवं चंदमंडलस्स णं भंते चंदमंडलस्स य सणं केवइयं अ
बाहाए अंतरे पन्नत्ते गोयमा पणतीसं जोयणाई तीसं च एगसट्ठिभागा जोयणस्स एगं च एगसट्ठिभागं सत्तहा छि
त्ता चत्तारि य चुण्णियाभागे चंदमंडलस्स अबाहाए अंतरे पन्नत्ते इति एतदेव सूर्यमंडलस्य चंद्रमंडलस्य च सूर्य
मंडलविष्कंभपरिमाणयुक्तं सूर्यस्य चंद्रमसश्च विकंपपरिमाणमवसेयं तथा चाह सूरविकंपो एको समंडलादीय
मंडलंतरियाए चंदविकंपाय तहा समंडलंतरियाए अस्या गाथाया अक्षरगमनिका एकः सूर्यविकंपो भवति मंडलांत
रिया त्रिअंतरमेव अंतरं यत्र षडादि द्वादशसात्रैषणेततः स्त्रीत्व विवक्षायां ङीप्रत्यये अंतरा अंतर्वि च अंतरिका मंडलस्य
मंडलस्यांतरिका मंडलांतरिका समंडलांतरिका द्वंद्वे मंडलश्च आत्मंडलविष्कंभश्च तेपरिणामाय परिणामाणवतश्चपत्य
ततः समंडलेन मंडलविष्कंभपरिमाणेन वर्तते इति समंडला किमुक्तं भवति एकस्य सूर्यमंडलांतरस्य यत्परिमा
णं योजनद्वयलक्षणं तादकसूर्यमंडलविष्कंभपरिमाणेन अष्टाचत्वारिंशदेकषष्टिभागलक्षणेन सहितमेकस्य सूर्य
विकंपस्य परिमाणमिति तथा मंडलांतरिकाचंद्रमंडलांतरपरिमाणं पंचत्रिंशत्योजनानि एकस्य च योजनस्य त्रिंशद
कषष्टिभागा एकस्यापि एकषष्टिभागस्य चत्वारः सप्तभागा इत्येवंरूपं समंडलविमंडलविष्कंभपरिमाणेन सहिता एक श्चं
विकंपो भवति यस्तु विकंपक्षेत्रकाष्ठदेशानाता विकंपक्षेत्रकाष्ठा दशाना विकंपपरिमाणं ज्ञातुमिष्टं तितं प्रतीत्य पूर्वा
चार्यप्रदर्शितं करणगाथा सगमंडालेहिं लद्धसगक डाउ हवंति अविकंपा जमग विक्कंभजुया हवंति सगमंडलंतरि
या अस्या अक्षरगमनिका यच्चंद्रमसः सूर्यस्य वा विकंपाः कथं भूता इत्याह स्वकविष्कंभयुताः स्वकमंड
लांतरिका स्वस्वमंडलविष्कंभपरिमाणसहित स्वस्वमंडलांतरिकारूपा इत्यर्थः भवति स्वका ष्ठातः स्वस्व वि
कंपक्षेत्रपरिमाणस्य स्वकमंडलैः स्वस्वमं डलसंख्यया भागे हृते यल्लब्धं तावत्परिमाणास्वस्वविकंपा
स्वस्वविकंपाभवंति तथा हि सूर्यस्य विकंपक्षेत्रका ष्ठा पंचयोजनशतानि दशोत्तराणि ५१० तान्येकषष्टिभागकर
णार्थमेकषष्ट्या गुण्यंते जातान्येकत्रिंशत्सहस्राणि शतमेकं दशोत्तरं ३१११० सूर्यस्य मंडलानि विकंपक्षेत्रे त्र्यशी
त्यधिकं शतं १८३ ततो योजनानयनार्थं त्र्यशीत्यधिकं मंडलशतमेकषष्ट्या गुण्यते जातान्येकादशसहस्राणि
शतमेकं त्रिषष्ट्यधिकं ११६३ एतेन पूर्वराशेर्भागो ह्रियते लब्धे द्वे योजने शेषमुपरिष्टाद्वर्तते सप्तशीतिशतानि
चतुरशीत्यधिकानि ८७८४ ततः संप्रत्येकषष्टिभागानयनार्थं त्र्यधिकान्द्वेदशशीत्यशीत्यधिकंशतं ॥ १८३ ते

नभागे हृते लब्धा अष्टचत्वारिंशदेकषष्टिभागाः ४८ एतावदेकैकस्य सूर्यविकंपस्य परिमाणं तथा चंद्रस्य विकंपक्षे
त्रकाष्टा पंचयोजनशतानि नवदशानि त्रिपंचाशच्चैकषष्टिभागा योजनस्य ५०९ ५३/६१ तत्र योजनान्येकषष्टिभागक
रणार्थमेकषष्ट्या गुण्यंते जातान्येकत्रिंशत्सहस्राणि एकोनपंचाशदधिकानि ३१०४९ एतत उपरितनास्त्रिपंचाशदेक
षष्टिभागाः प्रक्षिप्यंते जातान्येकत्रिंशत्सहस्राणि शतमेकं द्व्युत्तरं ३११०२ चंद्रस्य तु विकंपक्षेत्रमाध्यमंडलानि
चतुर्दश १४ ततो योजनानि चतुर्दशकेनैकषष्ट्या गुण्यंते जातान्यष्टौशतानि चतुःपंचाशदधिकानि ३५८५४ सेः चू
र्णिताः संगोध्यंते लब्धानि षट्त्रिंशद्योजनानि नि शेषाणि तिष्ठंति त्रीणि शतान्यष्टापंचाशदधिकानि
३५८ ततः एकषष्टिभागा अनंतराः ततः चतुर्दशरूपो ऽयं संख्यावच्छेद इति १४ तेन भागे हृते लब्धाः
पंचविंशतिरेकषष्टिभागाः २५ शेषास्तिष्ठंत्यष्टौ। ते सप्तभागकरणार्थं सप्तभिर्गुण्यंते जाताः षट्पंचाशत्
स्याश्चतुर्दशभिर्भागे हृते लब्धाश्चत्वारः सप्तभागाः एत ।एतावत्परिमाण एकैकश्चंद्रविकंप इति तदेवं चंद्रस्य सूर्यस्य च वि
कंपक्षेत्रकाष्टा चंद्रमंडलानां सूर्यमंडलानां च परस्परमंतरमुक्तं संप्रति प्रस्तुतमभिधीयते तत्र सर्वाभ्यंतरे चंद्रमंडले
सर्वाभ्यंतरं सूर्यमंडलं सर्वात्मना प्रविष्टं केवलमष्टाचत्वारिंशदेकषष्टिभागाश्चंद्रमंडलस्य बहिः शेषा वर्तंते चंद्रमंडलात् सू
र्यमंडलस्याष्टाचत्वारिंशदेकषष्टिभागैर्हीनत्वात् ततो द्वितीयाच्चंद्रमंडलादर्वागपांतराले त्रयोदश सूर्यमार्गास्तथाहि
द्वयोश्चंद्रमंडलयोरंतरं पंचत्रिंशद्योजनानि त्रिंशच्चैकषष्टिभागा योजनस्य एकस्य चैकषष्टिभागस्य सत्काश्चत्वा १२६

रः सप्तभागाः तत्र योजनान्येकषष्टिभागकरणार्थमेकषष्ट्या गुण्यंते गुणयित्वा चोपरितनास्त्रिंशदेकषष्टिभागाः प्रक्षि
प्यंते जातान्येकविंशतिशतानि पंचषष्ट्यधिकानि २१६५ सूर्यस्य विकंपक्षेत्रं योजने अष्टचत्वारिंशदेकषष्टिभागा योजन
स्य तत्र द्वे योजने एकषष्ट्या गुण्येते जातं द्वाविंशं शतं १२२ तत उपरितना अष्टचत्वारिंशदेकषष्टिभागा योजनस्य प्रक्षिप्यंते
जातं सप्तत्यधिकं शतं ॥ १७० एतेन पूर्वराशेर्भागो ह्रियते लब्धा द्वादश ते तावंतो ऽपांतराले सूर्यमार्गा एवं त्रिशेषं विंशति
पंचविंशं शतं १२५ एतच्च विशोनशातेन त्रयोदशस्य सूर्य मार्गस्योपरि द्वे योजने लब्धे शेषास्तिष्ठंति नव एकषष्टिभागा
ः अपि च प्रथमे चंद्रमंडले रविमंडलानि शेषा अष्टाचत्वा कषष्टिभागास्ते प्रक्षिप्यंते इति जाता एकादश एकष
ष्टिभागाः ततः इदमागतं त्रयोदशानां सूर्यमार्गाणां परतो द्वितीयाच्चंद्रमंडलादर्वाक् द्वे योजने एकादश च ए
कषष्टिभागा योजनस्य एकषष्टिभागस्य सत्काश्च त्वारः सप्तभागाः तत्र योजनद्वयोरंतरं सूर्यमंडलमतो द्विती
याच्चंद्रमंडलादर्वाक् स्पृष्टं प्रविष्टं सूर्यमंडलमेकादश एकषष्टिभागास्तेषु च एकषष्टिभागस्य सत्कान् चतुरः सप्तभा
गान् ततः परं षट्त्रिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य सत्कास्त्रयः सप्तभागाः इत्येतावत्परिमाणं सूर्य
मंडलं चंद्रमंडलसम्मिश्रं ततः सूर्यमंडलानुपस्तो बहिर्विनिर्गतं चंद्रमंडलमेकोनविंशतिमेकषष्टिभागानेक
स्य चैकषष्टिभागस्य चतुरः सप्तभागान् ततः परं सूर्यस्पृष्टा यावच्चंद्रमंडलान्यर्वाक् यावत्परिमाणमंतरं तच्च
द्वापंचत्रिंशद्योजनानि त्रिंशदेकषष्टिभागा योजनस्य एकस्य च एकषष्टिभागस्य सत्काश्चत्वारः सप्तभागाः ॥

MEMORIAL

॥एतावति चांतरे द्वादश सूर्यमार्गा लभ्यंते। उपरितनयोजनत्रयाच्चैकषष्टिभागा योजनस्यैकस्यैकषष्टिभागस्य सक्ताः
चत्वारः सप्तभागाः सतोऽत्र प्रागुक्ता द्वितीयस्य चंद्रमंडलस्य सक्ताः सूर्यमंडलाद्बहिर्विनिर्गता पंचोनविंशतिरेकषष्टिभागा
स्य चत्वारः सप्तभागाः प्रक्षिप्यंते ततो जाताः त्रयोविंशतिरेकषष्टिभागा एकस्य च एकस्य च एकषष्टिभागस्य सक्ता एकः स
प्तभागः ततः इदमायातं द्वितीयात् चंद्रमंडलात्परतो द्वादश सूर्यमार्गाः। द्वादशाच्च सूर्यमार्गात्परतो योजनद्वयातिक्रमे
णसूर्यमंडलं तच्च तृतीयाच्चंद्रमंडलादर्वाग् स्यांतरं प्रति। … त्रयोविंशतिमेकषष्टिभागा एकं च एकषष्टिभागसक्तं स
प्तभागं ततः शेषा अष्टाविंशतिरेकषष्टिभागा एकस्य … च एकषष्टिभागस्य षट् सप्तभागाः सूर्यमंडलस्य तृतीयचं
द्रमंडलसम्मिश्राः ततस्तृतीयचंद्रमंडलसूर्यमं… डलाद्बहिर्विनिर्गतमेकविंशतमेकषष्टिभागानेकस्य च
एकषष्टिभागस्य सक्तमेकं सप्तभागं ततोऽस्या… पिप्रक्षिप्तं चंद्रमंडलांतरं तस्मिंश्च द्वादश सूर्यमार्गा लभ्यंते
द्वादशस्य सूर्यमार्गस्योपरितनयोजनद्वयाच्चैकषष्टि भागा योजनस्यैकस्य च एकषष्टिभागस्य सक्ताश्चत्वारः सप्तभागा
स्ततोऽत्र तृतीयचंद्रमंडलसक्ताः सूर्यमंडलाद्बहिर्विनिर्गता एकविंशतिरेकषष्टिभागा योजनस्यैकस्य च एकषष्टि
भागस्य सक्त एकः सप्तभागः प्रक्षिप्यंते ततो जाताः षड्विंशतिरेकषष्टिभागा एकस्य च एकषष्टिभागस्य सक्ताः पंच सप्तभागा
स्ततः इदमायातं तृतीयाच्चंद्रमंडलात्परतो द्वादश सूर्यमार्गा द्वादशाच्च सूर्यमार्गात्परतो योजनद्वयमतिक्रम्य सूर्यमंड
लं तच्च चतुर्थाच्चंद्रमंडलादर्वाक् स्यांतरं षट्त्रिंशतमेकषष्टिभागानेकस्य चैकषष्टिभागस्य सक्तान् पंच सप्तभागान्। १२७

---

ततः शेषं सूर्यमंडलस्य त्रयोदश एकषष्टिभागा एकस्य च एकषष्टिभागस्य सक्तो द्वौ सप्तभागौ इत्येतावच्चतुर्थचंद्रमंडलसम्मि
श्रं चतुर्थस्य चंद्रमंडलस्य सूर्यमंडलाद्बहिर्विनिर्गतं योजनेन त्र्येकषष्टिभागा योजनगतं द्विचत्वारिंशदेकषष्टिभागा एकस्य
च एकषष्टिभागस्य सक्ताः पंच सप्तभागाः ततः पुनरपि यथोदितपरिमाणं चंद्रमंडलांतरं तत्र च द्वादश सूर्यमार्गा लभ्यंते। द्वादश
स्य च सूर्यमार्गस्योपरितनयोजनत्रयाच्चैकषष्टिभागा योजनस्यैकस्य च एकषष्टिभागस्य सक्ताश्चत्वारः सप्तभागास्तत्र चत्वे चतुर्थ
स्य चंद्रमंडलस्य सूर्यमंडलाद्बहिर्विनिर्गता द्वाचत्वारिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य सक्ताः पंच सप्तभागास्ते
ऽत्र प्रक्षिप्यंते ततो जाता षट्चत्वारिंशदेकषष्टिभागा एकस्य च एकषष्टिभागस्य सक्तौ सप्तभागौ तत एवं सुख
प्रत्यवगंतव्यं चतुर्थाच्चंद्रमंडलात्परतो द्वादश सूर्यमार्गा द्वादशाच्च सूर्यमार्गात्परतो योजनद्वयातिक्रमे
सूर्यमंडलं तच्च पंचमाच्चंद्रमंडलादर्वाक् स्यांतरं विंशं षट्चत्वारिंशतमेकषष्टिभागान् एकस्य च एकस्य च एकषष्टि
भागस्य सक्तौ सप्तभागौ शेषं सूर्यमंडलस्य एकषष्टिभागा एकस्य च एकषष्टिभागस्य पंच सप्तभागा इत्येतावत्परिमाणं
पंचमचंद्रमंडलसम्मिश्रं तस्य च पंचमस्य चंद्रमंडलस्य सूर्यमंडलाद्बहिर्विनिर्गतं त्रयः पंचाशदेकषष्टिभागा एकस्य च एक
षष्टिभागस्य द्वौ सप्तभागौ तावेव पंच सर्वस्यांतराणि चंद्रमंडलानि सूर्यमंडलसम्मिश्राणि चतुर्थचंद्रमंडलांतरे द्वाद
श सूर्यमार्गा इति जातं संप्रति षष्ठादीनि दशमपर्यंतानि पंच चंद्रमंडलानि सूर्यमंडलासंस्पृष्टानि साध्यंते तत्र पंचमा
च्चंद्रमंडलात्परतो यावत् षष्ठं चंद्रमंडलमधिकृत्यांतरं तत्र पंचत्रिंशद्योजनानि त्रिंशच्चैकषष्टिभागा योजनस्य एकस्य च
एकषष्टिभागस्य सक्ताश्चत्वारः सप्तभागास्तत्र च पंचविंशाद्योजनान्येकषष्टिभागकरणार्थमेकषष्ट्या गुण्यंते गुणयित्वा च

सूर्यप्रवृत्ति ॥१२८

परितनास्त्रिंशदेकषष्टिभागाः प्रक्षिप्यंते ततो जातान्येकविंशतिःशतानि पंचषष्ट्यधिकानि एतच्च पर्यवपंचमस्य चं
द्रमंडलस्य सूर्यमंडलाद्बहिर्विनिर्गतावगाहः पंचाशदेकषष्टिभागा योऽप्येकषष्टिभागस्य संबंधी सप्तभागो ये तेऽत्र प्रक्षिप्यं
ते जातानि द्वाविंशतिःशतान्येकानविंशत्यधिकानि एतच्च सूर्यस्य विकंपक्षेत्रयोजनेऽष्टाचत्वारिंशदेकषष्टिभागाधिके
तत्र द्वे योजने एकषष्ट्या गुणयित्वा जातं द्वाविंशत्युत्तरमेकषष्टिभागानां ततस्तत्र उपरितना अष्टाचत्वारिंशदेकषष्टिभागाः प्रक्षि
प्यंते जातं सत्यधिकं शतं १७० तेन पूर्वराशेर्भागो ह्रियते लब्धास्त्रयोदश शेषास्तिष्ठंति नव एकस्य च एकषष्टिभागस्य स
क्ताः षट् सप्तभागाः स्ततः इदमागतं पंचमाच्चंद्रमंडलात्प
रतस्त्रयोदश सूर्यमार्गास्त्रयोदशस्य च सूर्यमार्गस्योपरि षष्टाच्चंद्र
मंडलादर्वाक् अंतरं नव एकषष्टिभागस्य सक्ताः ष
ट् सप्तभागाः ततः परतः षष्टं चंद्रमंडलं चतुःपंचाशदेकषष्टि
भागात्मकं ततः परतः सूर्यमंडलादर्वाक् अंतरं षष्टा
च्चत्वारिंशदेकषष्टिभागस्य एकः सप्तभागं तरं सूर्यमंडलं तस्माच्च
परतः एकषष्टिभागा चतुर्दशरेण युततः एकस्य
च एकषष्टिभागस्य सक्तेनैकेन सप्तभागेनं न्यूनं यथोदित
प्रमाणं चंद्रमंडलांतरं प्राप्यते इति तस्मात् सूर्यमं
डलात्परतो ॥ त्यक्तश्चतुर्दश सूर्यमार्गा लभ्यते ततः सर्वसंकलनया
तस्मिन्नप्यंतरे त्रयोदश सूर्यमार्गाः ॥ तस्य च त्रयोदशस्य सूर्यमार्गस्योपरि सप्तमाच्चंद्रमंडलादर्वाक् अंतरमेकवि
शतिरेकषष्टिभागा एकस्य च एकषष्टिभागस्य त्रयः सप्तभागाः ततः सप्तमं चंद्रमंडलं तस्माच्च सप्तमाच्चंद्रमंडलात्प
रतश्चत्वारिंशता एकषष्टिभागैरेकस्य च एकषष्टिभागस्य सक्तैश्चतुर्भिः सप्तभागैः सूर्यमंडलं ततः च्छिन्नवंति
संख्याः एकषष्टिभागा एव त्रिंशत् एकस्य च एकषष्टिभागस्य सक्तेः सप्तभागैर्न्यूनं यथोदितप्रमाणं चंद्रमंडलांतरं ते १२८

---

नापरमस्मीत्यस्य पिंडादशसूर्यमार्गा लभ्यंते ततस्तस्मिन्नप्यंतरे सर्वसंकलनया त्रयोदश सूर्यमार्गास्त्रयोदशस्य सूर्य
मार्गस्योपरि अष्टमाच्चंद्रमंडलादर्वाक् अंतरं त्रयस्त्रिंशदेकषष्टिभागाः ततोऽष्टमं चंद्रमंडलं तस्माच्चाष्टमाच्चंद्रमं
डलात्परतः सप्तविंशत्या एकषष्टिभागैः सूर्यमंडलं ततः एकत्रिंशता इत्येकषष्टिभागैर्न्यूनं यथोदितप्रमाणं
चंद्रमंडलांतरं परतो विद्यते इति ततः परतोऽन्ये पिंडादशसूर्यमार्गास्ततस्तस्मिन्नप्यंतरे सर्वसंकलनया त्रयोदश सूर्यमार्गा त्रयो
त्रयोदशस्य सूर्यमार्गस्योपरि ततो नवमाच्चंद्रमंडलादर्वाक् अंतरं पंचचत्वारिंशदेकषष्टिभागा एकषष्टिभागस्य चत्वारः
सप्तभागाः ततः परतो नवमं चंद्रमंडलं तस्माच्च नवमा
च्चंद्रमंडलात्परत एकविंशत्या एकषष्टिभागैरेकस्य च
एकषष्टिभागस्य त्रिभिः सप्तभागैः परिहीणं य
थोक्तप्रमाणं चंद्रमंडलांतरं तत्र चान्ये द्वादश सूर्यमा
र्गा एवं च तस्मिन्नप्यंतरे सर्वसंकलनया त्रयोद
श सूर्यमार्गाः ॥ तस्य च त्रयोदशस्य सूर्यमार्गस्योपरि द
शमाच्चंद्रमंडलादर्वाक् अंतरं षट्पंचाशदेकषष्टि
भागा एकस्य च एकषष्टिभागस्य एकः सप्तभागस्ततो दशमं
चंद्रमंडलं तस्माच्च दशमाच्चंद्रमंडलात्परतो नवभिरेकषष्टिभागैरेकस्य च एकषष्टिभागस्य सक्तैः षड्भिः सप्त
भागैः सूर्यमंडलं ततः सप्तपंचाशता एकषष्टिभागैरेकस्य च एकषष्टिभागस्य सक्तैः षड्भिः सप्तभागैर्न्यूनं
प्राग्वदुक्तपरिमाणं चंद्रमंडलांतरं ततो द्वादश सूर्यमार्गा लभ्यंते इति तस्मिन्नप्यंतरे सर्वसंकलनया त्रयो
दश सूर्यमार्गास्तस्य च त्रयोदशस्य सूर्यमार्गस्योपरि एकादशाच्चंद्रमंडलादर्वाक् अंतरं सप्तषष्टिरेकषष्टिभागा

एकस्य चैकषष्टिभागस्य सत्काः पंच सप्तभागाः। तदेवं पंच चंद्रमंडलानि षष्ठादीनि दशमपर्यंतानि सूर्यसंमिश्रा
णि षट्सु चंद्रमंडलांतरेषु त्रयोदश त्रयोदश सूर्यमार्गा इति ज्ञातव्यं। सम्प्रति ततोनंतरं षष्ठात्तत्र एकादशे चं
द्रमंडले चतुःपंचाशदेकषष्टिभागा एकस्य चैकषष्टिभागस्य सत्कौ द्वौ सप्तभागौ इत्येतावन्तं सूर्यमंडला
स्पृष्टं प्रविष्टं एकषष्टिभागस्य पंच सप्तभागा इत्येतावन्मात्रं सूर्यमंडलसंमिश्रं एकादशाच्चंद्रमंडलाद्बहि
र्विनिर्गतं सूर्यमंडलं षट्चत्वारिंशदेकषष्टिभागा एकस्य चैकषष्टिभागस्य सत्कौ द्वौ सप्तभागौ। ततएता
वता हीनं परतश्चंद्रमंडलांतरमस्तीति द्वादश सूर्यमार्गा लभ्यंते ततः परमेकोनाशीत्या एकषष्टिभागै
रेकस्य चैकषष्टिभागस्य सत्कास्त्यां चास्यां सप्तभागस्यैकोदशं चंद्रमंडलं तत्र द्वादशे चंद्रमंडले
सूर्यमंडलादस्पृष्टं प्रविष्टं चतुश्चत्वारिंशदेकषष्टिभागा एकस्य चैकषष्टिभागस्य सत्काः पंच स
प्तभागाः शेषं त्रयोदशैकषष्टिभागा एकस्य चैकषष्टिभागस्य सत्कौ द्वौ सप्तभागौ इत्ये
तावन्मात्रं सूर्यमंडलसंमिश्रं तस्माद्द्वादशाच्चंद्रमंडलाद्बहिर्विनिर्गतं सूर्यमंडलं चतुस्त्रिंशतमेकषष्टि
भागान् एकस्य चैकषष्टिभागस्य सत्कान् पंच सप्तभागान् ततएतावन्मात्रेणाहीनं परतश्चंद्रमंडला
न्तरं तत्र च द्वादश सूर्यमार्गा लभ्यंते द्वादशाच्च सूर्यमार्गात्परतो नवतिसंख्यैरेकषष्टिभागैरेकस्य चैकष
ष्टिभागस्य सत्कैः षड्भिः सप्तभागैस्त्रयोदशं चंद्रमंडलं सूर्यमंडलादस्पृष्टं प्रविष्टं एकत्रिंशतमेकषष्टि १२७

भागान् एकस्य चैकषष्टिभागस्य सत्कमेकं सप्तभागं शेषं चतुर्विंशतिरेकषष्टिभागा एकषष्टिभागस्य सत्काः षट् सप्त
भागा इत्येतावन्मात्रं सूर्यमंडलसंमिश्रं तस्मात्त्रयोदशाच्चंद्रमंडलाद्बहिः सूर्यमंडलं विनिर्गतं त्रयोविंशतिमेक
षष्टिभागान् एकस्य चैकषष्टिभागस्य सत्कमेकं सप्तभागं ततएतावताहीनं परतश्चंद्रमंडलांतरं तत्र च त्रयोदश
सूर्यमार्गाः त्रयोदशाच्च सूर्यमार्गात्परत एकषष्टिभागानां त्र्यशीत्या एकस्य चैकषष्टिभागस्य सत्कैस्त्रिभि
: सप्तभागैश्चतुर्दशं चंद्रमंडलं सूर्यमंडलादस्पृष्टं प्रविष्टमेकोनविंशतिमेकषष्टिभागानेकस्य चैकषष्टि
भागस्य सत्कांश्चतुरः सप्तभागान् शेषं षट्त्रिंशदेकषष्टिभागा एकस्य चैकषष्टिभागस्य सत्कास्त्रयः
सप्तभागा इत्येतावत्परिमाणं सूर्यमंडलसंमिश्रं तस्माच्चतुर्दशाच्चंद्रमंडलाद्बहिर्विनिर्गतं सूर्य
मंडलमेकादश एकषष्टिभागान् एकस्य चैकषष्टिभागस्य चतुरः सप्तभागान् ततएतावताहीनं यथोक्तपरिमाणं चंद्रमंडलांतरं तत्र च
चतुर्दश सूर्यमार्गाः चतुर्दशाच्च सूर्यमार्गात्परत एकषष्टिभागानां चतुर्दशोत्तरेण शतेन पंचदशं चंद्रमंडलं तच्च पंच
दशं चंद्रमंडलं सर्वात्मना सूर्यमंडलाद्बाह्यस्यांतरे प्रविष्टं षट्पंचाशदेकषष्टिभागान् शेषाश्चाष्टाचत्वारिंशदेकषष्टिभागाः
सूर्यमंडलसंमिश्राः। तदेवमेतान्येकादशादीनि पंचदशपर्यंतानि पंच चंद्रमंडलानि सूर्यमंडलसंमिश्राणि उक्ता
नि इति चतुर्षु चैतरासु चंद्रमंडलांतरेषु द्वादश द्वादश सूर्यमार्गाः एवं च यदन्यत्र चंद्रमंडलांतरेषु सूर्यमार्गप्रतिपाद
नमुक्तं शिष्यते। चंदंतरेसु अट्ठसु अभिंतरबाहिरेसु सूरस्स। बारस बारस मग्गा बसु तेरस तेरस भवंति। तदपि संवादि

डष्टयं॥७॥इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य एकादशं प्राभृतप्राभृतं समाप्तं॥७॥
तादेवमुक्तं दशमस्य प्राभृतस्य एकादशं प्राभृतप्राभृतं संप्रति द्वादशमारभ्यते तस्य चायमर्थाधिकारो देवतानामध्य
यनानि वक्तव्यानि ततस्तद्विषयं प्रश्नसूत्रमाह॥७॥ता कहं ते देवयाणमित्यादि। ता इति पूर्ववत् कथं केन प्रकारेण
भगवन् त्वया नक्षत्राधिपतीनां देवतानामध्ययनानि अधीयंते अभिधीयंते यैस्तान्यध्ययनानि नामानीत्यर्थः। आख्यातानीति
वदेत् एवं प्रश्ने कृते भगवानाह॥ता एएसि णमित्या दिता इति पूर्ववत् एतेषामनंतरोदितानामष्टाविंशतेर्नक्षत्रा
णां मध्ये अभिजिन्नक्षत्रं किं देवताकं किंनामधे यदेवताकं प्रज्ञप्तं भगवानाह। ता इत्यादि ता इति प्राग्वत् ब्र
ह्मदेवताकं प्रज्ञप्तं श्रवण नक्षत्रं किं देवताकं प्रज्ञप्तं भगवानाह। ता इत्यादि विष्णु
नामदेवताकं प्रज्ञप्तं एवं शेषाण्यपि सूत्राणि भा वनीयानि देवतानि क्रमेण संग्राहिका इमा स्तिस्रः प्रवचनप्रसि
द्धाः संग्रहणिगाथा बम्हा विण्हू य वसू वरुणे तह अ जायणंतरं वुड्ढी पूसव आसे जमे अग्गी पयावइ सोमे रुद्दे अदिती
पया वइ सोमे रुद्दे अदिती बहस्सई सप्पे पिउ भग अज्जम सविया तट्ठा वाऊ तहेव इंदग्गी मित्ते इंदे निरई आऊ
विस्सा य तामाणि देवयाणं हवंति रिक्खाण इह कमसो॥७॥इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां
दशमस्य प्राभृतस्य द्वादशं प्राभृतप्राभृतं समाप्तं॥७॥ तदेवमुक्तं दशमस्य प्राभृतस्य द्वादशं प्राभृतप्राभृतं संप्रति १३०
त्रयोदशमारभ्यते तस्य चायमर्थाधिकारो मुहूर्तानां नामधेयानि वक्तव्यानि ततस्तद्विषयं प्रश्नसूत्रमाह॥

॥७॥ता कहं ते मुहुत्ताणमित्यादि ता इति पूर्ववत् कथं केन प्रकारेण भगवन् त्वया मुहूर्तानां नामधेयानि नामानि
नामधेयानीति नामरूपता आख्याता इति सूर्यधिव वदेत्॥ आख्यातानीति वदेत् भगवानाह। ता एगमेगस्स णमित्यादि ता
इति पूर्ववत् एकैकस्य अहोरात्रस्य त्रिंशन्मुहूर्ता वक्ष्यमाणनामधेया मुहूर्ता इति शेषः प्रज्ञप्ता नामधेयान्याह। तं ज
हा रोद्दे त्यादि गाथात्रयं। तत्र प्रथमो मुहूर्त्तो रुद्रः द्वितीयः श्रेयान् तृतीयो मित्रः चतुर्थो वायुः पंचमः सुपीतः षष्ठो अ
भिचंद्रः सप्तमो माहेंद्रः अष्टमो बलवान् नवमो ब्रह्मा दशमो बहुसत्यः एकादश ऐशानः द्वादशः त्वष्टा त्रयोदशो
भावितात्मा चतुर्दशो वैश्रमणः पंचदशो वारुणः षोडश आनंदः सप्तदशो विजयः अष्टादशो विश्वसेनः एकोन
विंशतितमः प्राजापत्यः विंशतितम उपशमः एकविंशतितमो गंधर्वः द्वाविंशतितमो ऽग्निवेश्यः त्रयोविंश
तितमः शतवृषभः चतुर्विंशतितमः आतपवान् पंचविंशतितमो ऽममः षड्विंशतितमः ऋणवान् सप्तविंशति
तमो भौमः अष्टाविंशतितमो वृषभः एकोनत्रिंशत्तमः सर्वार्थः त्रिंशत्तमो राक्षसः॥७॥इति श्रीमलयगिरिविरचितायां
सूर्यप्रज्ञप्तिटीकायां दशमस्य प्राभृतस्य त्रयोदशं प्राभृतप्राभृतं समाप्तं॥७॥ तदेवमुक्तं दशमस्य प्राभृतस्य त्रयोदशं प्रा
भृतप्राभृतं संप्रति चतुर्दशमारभ्यते तस्य चायमर्थाधिकारो दिवसरात्रिप्ररूपणा कर्तव्या ततस्तद्विषयं प्रश्नसूत्रमा
ह॥७॥ता कहं ते इत्यादि। ता इति पूर्ववत् कथं केन प्रकारेण कामेण समयः भगवन् त्वया दिवसा आख्याता इति वदेत्
भगवानाह। ता एगमेगस्स णमित्यादि। ता इति पूर्ववत् एकैकस्य पक्षस्यात्रापांतराल वर्त्तीमिलाहणिकः॥ णमिति वाक्या

सूर्यप्र०वृत्ति लंकारे पक्षस्य पंचदश पंचदश दिवसा प्रज्ञप्ता वक्ष्यमाणक्रमयुक्ता स्वमेव क्रममाह तं जहेत्यादि तद्यथा ॥ प्रतिपत्
१३१ प्रथमा दिवसः द्वितीया द्वितीयो दिवसः तृतीया तृतीयो दिवसः एवं यावत् पंचदशी पंचदशो दिवसः ॥ ताएएसिणमित्या
दि तत्र एतेषां पंचदशानां दिवसानां क्रमेण पंचदश नामधेयानि प्रज्ञप्तानि तद्यथा प्रथमप्रतिपल्लक्षणः पूर्वांग ना
मा द्वितीयः सिद्धमनोरमः तृतीयो मनोहरः चतुर्थो यशोभद्रः पंचमो यशोधरः षष्ठः सर्वकामसमृद्धः सप्तम इंद्र
मूर्धाभिषिक्तः अष्टमः सोमनसो नवमो धनंजयो दशमोऽर्थसिद्धः एकादशोऽभिजातो द्वादशोऽत्याशनः त्रयो
दशः शतंजयः चतुर्दशोऽग्निवेश्मा पंचदश उपशम एतानि दिवसानां क्रमेण नामधेयानि ताकहमित्यादि ता कहं
ते रात्रयः कथं केन प्रकारेण केन क्रमेणेत्यर्थः ॥ यत्र यत्रा ख्याता इति वदेत् भगवानाह ताएगमेगस्सणमित्या
दि ता इति प्राग्वत् एकैकस्य पक्षस्य पंचदश पंचदश रात्रयः प्रज्ञप्ताः तद्यथा प्रतिपत् प्रतिपत्संबंधिनी प्रथमा रात्रिः
द्वितीयदिवससंबंधिनी द्वितीया रात्रिः एवं पंचदशदिवससंबंधिनी पंचदशी रात्रिः ॥ एतच्च कर्ममासापेक्षया द्रष्ट
तत्रैव याक्षपाक्षपरिस्फुरणनि पंचदशानामपि रात्रीणां संख्याबद्धता एएसिणमित्यादि तत्र एतासां पंचदशानां रात्री
णां यथाक्रममेतानि पंचदश नामधेयानि प्रज्ञप्तानि तद्यथा प्रथमा प्रतिपत्संबंधिनी रात्रिरुत्तमा उत्तमनामा द्वि
तीया सुनक्षत्रा तृतीया एलापत्या चतुर्थी यशोधरा पंचमी सोमनसी षष्ठी श्रीसंभूता सप्तमी विजया अष्टमी वै
जयंती नवमी जयंती दशमी अपराजिता एकादशी इच्छा द्वादशी समाहारा त्रयोदशी तेजा चतुर्दशी अति १३१

तेजा ॥ पंचदशी देवानंदा अमूनि क्रमेण रात्रीणां नामधेयानि भवंति ॥ ॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्ति
टीकायां दशमस्य प्राभृतस्य चतुर्दशं प्राभृतप्राभृतं समाप्तं ॥ १४ ॥ तदेवमुक्तं दशमस्य प्राभृतस्य चतुर्दशं प्राभृतप्रा
भृतं संप्रति पंचदशमारभ्यते तस्य चायमर्थाधिकारः तिथयो वक्तव्या इति ततस्तद्विषयप्रश्नसूत्रमाह ॥ ता कहं ते ति
हीत्यादि ता इति पूर्ववत् कथं केन प्रकारेण केन क्रमेण तिथय आख्याता इति वदेत् भगवानाह दिवसस्य तिथीना
कः प्रतिविशेषो यो याते ताः पूर्वकृष्णा [illegible] सत्यनिष्पादिता अत्र रात्रेश्च निष्पादिता स्तिथयः ॥ तत्र च
चंद्रमसा तिथयो निष्पाद्यंते द्विधा निष्पन्ना ॥ चोक्तं तस्य यथाक्रमम् सिरिसप्पलसमवद्दस्सराइ सुसगा
स्मलेण तिहि त्तिनियय समस्स वड्डीपरिहाणीओ चंद्रबिंबानीतं चंद्रमंडलस्य न स्वरूपतः किं तु राहुविमा
नावरणानावरणकृता तथाहि द्विविधो राहुः पर्वराहुर्ध्रुवराहुश्च तत्र यः पर्वराहुः स कदाचि
दकस्मादुपरागं करोति इत्यत्र समास टीकायां वा कृतेति ततो वक्ष्यामि ध्रुवराहुश्चास्य विमानं कृ
ष्णं तच्च चंद्रमंडलस्याधस्ताच्चतुरंगुलसमप्राप्तं सदा चारं चरति तत्र चंद्रमंडलं द्वाषष्टिभागान् परिकल्प
ते परिकल्प्य च तेषां भागानां पंचदशभिर्भागैः तिष्ठत लक्षितास्तु द्वाषष्टिभागाः शेषौ द्वौ भागौ तिष्ठतः ॥ तौ च
सदानावृतौ एष किल चंद्रमसः षोडशी कलेति प्रसिद्धिः ॥ तत्र कृष्णपक्षे प्रतिपद ध्रुवराहुविमानं स्वकीयं
चंद्रमंडलस्याधस्ताच्चतुरंगुलसमप्राप्तं सद्वारंवारमात्मीयेन पंचदशेन भागेन द्वाषष्टिभागेभ्यः सदानावा

सूर्यप्र० वृ० १३२ यद्वत्ता वा सकला शेषा द्वाषष्टिभागरूपा द्वाषष्टिभागात्मकस्य चंद्रमंडलस्य एकं चतुर्भागात्मकं पंचदशभागमावृणोति
द्वितीयस्यामात्मीयायां तस्यां पंचदशभागमपरं शेषं पंचदशभागो तृतीयस्यामात्मीयायां त्रिभिः पंचदशभागैरावृ-
णोति पंचदशभागान् एवं यावदमावास्यायां पंचदशभागान् आवृणोतीति ततः शुक्लपक्षप्रतिपदि एकं पंचदशभागं प्रकटीक-
रोति द्वितीयस्यां द्वौ पंचदशभागौ तृतीयस्यां त्रीन् पंचदशभागान् एवं यावत् पंचदश्यां पंचदशापि भागान् इति आवृता-
वकाशान् इति तदा च सर्वात्मना परिपूर्णं चंद्रमंडलं लोके प्रकटं भवति तावद् दृश्यते इति शुक्लपक्षेऽपि सूत्रकृत् तद्गुणं ज्ञेय-
मवधारणीयं कृष्णपक्षस्य प्रतिपत्प्रभृति सर्व- भागेन इत्यादिना ग्रंथेन तत्र यावता कालेन कृष्णपक्षे
षोडशभागा भागा द्वाषष्टिभागसत्कचतुर्भागा त्मकाः निरूपयन्ति इति समस्तावान् कालविशेषः तिथि-
रित्युच्यते ततो यावता कालेन शुक्लपक्षे षोडश भागो द्वाषष्टिभागसत्कभागचतुष्टयप्रमाणः परिवर्तते ता-
वत्प्रमाणः कालविशेषः तिथिर्भवति उक्तं चान्यत्र भागाः कृष्णपक्षे शुक्लपक्षे च यावति परिमिते भागे
विपरिवर्तते तावता कालेन तिथिः षोडशांश इति द्वाषष्टिभागसत्कभागचतुष्टयप्रमाणः परिवर्तते इति दिनानि सप्त द्वाषष्टि-
भागा इति पंचदशसु भागेषु परिवर्तते इत्यर्थः शेषं सुगमं अथ पंचदशसु तिथिषु विचार्य परंपरा तत्र प्रतिपदादयः अत्र
षष्टिद्वाषष्टिभागप्रविभक्तस्याहोरात्रस्य द्वाषष्टिभागा एकत्रिंशत्प्रमाणा तिथि इति आदौ रात्रिंदिवतुल्यमुहूर्तप्रमाणः प्रवृत्ती
नःप्राग्वत् सूत्रकृता तस्य तावत्प्रमाणतया तिथि इति नावत् तिथिः किं मुहूर्तप्रमाणा इति उच्यते परिपूर्णैकोनत्रिंशन्मु- १३२

मुहूर्ताधिकस्य चतुर्मुहूर्तस्य त्रिंशद् द्वाषष्टिभागा उक्तं च अगणपन्नसंपुन्नाउ मुहुत्ताओ सा भवति तिहीओ सा पुण तिथि च बत्तीसं बा-
षट्ठिभागा पुणो इक्किसमतद्वसीमातइति इत्युच्यते इदं आगात्रस्य द्वाषष्टिभागीकृतस्य सकला एकद्वाषष्टिभागाः
प्रमाणा इति तिथिरित्युच्यते तत्र एकषष्टिः त्रिंशता गुण्यते जाता अष्टादशशतानि त्रिंशदधिकानि १८३० एतेषां किल द्वाषष्टि-
भागैर्हृते भाग लब्धा एकोनत्रिंशन्मुहूर्ताः शेषा द्वाषष्टिभागा इति तेषां द्वाषष्टिभागा दिनस्य आगतानि एकोनत्रिंशन्मुहूर्ता द्वि-
त्रिंशच्च द्वाषष्टिभागा मुहूर्तस्य एतावन्मुहूर्तप्रमाणाति। तिथिः तावता हि कालेन चंद्रमंडलगतः पूर्वोदितप्रमाणः षोडशो
भागो निवर्तयति इति प्रागुक्तं तथा यावता यावता कालेन तिथिः प- रिमाणेन काल सदेवमहोरात्रं स्तिथि प्रति विशेष इत्यपपत्र
स्तिथिविषयः पृष्ट्रकः प्रश्नः एवं गौतमेन प्रश्ने कृते भगवानाह तत्र खलु इत्यादि तत्र तिथिविचारविष-
ये खलु इमं वक्ष्यमाणस्वरूपा द्विविधाः तिथयः प्रज्ञप्तास्तद्यथा दिवसतिथयो रात्रितिथयश्च तत्र तिथेः पूर्वार्द्धभा-
गः स दिवसतिथिरित्युच्यते उत्तरः पश्चार्द्धभागः स रात्रि तिथिरिति ताः कहमित्यादि ताः प्रतिपूर्वं एकैकेन प्रकारे-
ण कया नाम्ना परिपाट्या इत्यर्थः दिवसतिथय आख्याता इतिवादे भगवानाह एगमेगस्स णमित्यादि ताः इति पूर्वव-
त् एकैकस्य णमिति वाक्यालंकारे पक्षस्य मध्ये पंचदश दिवसतिथयः प्रज्ञप्तास्तद्यथाः प्रथमा नंदा द्वितीया भद्रा तृ-
तीया जया चतुर्थी तुच्छा पंचमी पक्षस्य पूर्णा इति ततः पुनरपि षष्ठी तिथिर्नंदा सप्तमी भद्रा अष्टमी जया नवमी तुच्छा दशमी।
पक्षस्य पूर्णा इति ततः पुनरप्येकादशी तिथिर्नंदा द्वादशी भद्रा त्रयोदशी जया चतुर्दशी तुच्छा पक्षस्य पंचदशी पूर्णा इति इमा।

दीनांत्रयोदशअहोरात्राःअष्टादशस्यअहोरात्रस्यपादशमुहूर्त्ताःपंचचत्वारिंशन्मुहूर्त्तानिउत्तरभद्र
पदादीनांविंशतिरहोरात्रस्त्रयोमुहूर्त्ताःक्रमेणसार्वणांवक्तणित्वायावदुत्तराषाढानक्षत्रंताबद
राषाढानक्षत्रगतमभिलापसंक्षादशयति।ताजयाणमित्यादिसुगमं।एतदनुसारेणउत्तराषाढाप्रयाला।पा।
सूर्यवक्तव्या।सुगमश्चानुतापदश्यते।संप्रतिसूर्यमासस्ययदस्ययोगचिंताकरोति।ताजयाणमित्यादि २२३

सुगमं।अधुनाचंद्रादयोनाक्षत्रेणमासेनकतिमंडलानिचरंतीत्येतन्निरूपयितुकामादद्दछा।तानरकात्त
णमित्यादि।ताइतिपूर्ववनूनक्षत्रेणमासेनचंद्रःकतिमंडलानिचरति।एवंगौतमेनप्रश्नेकृतेभगवानाद्द
ताताराम्त्यादि।त्रयोदशमंडलानिचतुर्दशस्यमंडलस्यत्रयोदशसप्तषष्टिभागानूकथामतदवसीयतइति
चेदुच्यतेत्रैराशिकबलात्तथाहियदिसप्तषष्ट्यानक्षत्रमासैरष्टोत्तराणिचतुरसात्यधिकानिमंडलानांलभ्यंते
ततएकेननक्षत्रमासेनकिंलभामहेराशित्रयं॥ स्थापना।६७।१८४।१।अत्रांत्येनराशिनामध्यराशेर्गुणनेजा
तःसतावानेवातस्यसप्तषष्ट्याभागहरणेलब्धा। त्रयोदशमंडलानिचतुर्दशस्यमंडलस्यत्रयोदशस
प्तषष्टिभागाः।१३|१३/६७|तानरकात्तणमित्या दिसूर्यविषयप्रश्नसूत्रसुगमंभगवानाह।तातराम
त्यादि।त्रयोदश मंडलानिचतुर्दशस्य चमंडलस्यचतुश्चत्वारिंशतंसप्तषष्टिभागानूतथाहि।
यदिसप्तषष्ट्यानाक्षत्रैर्मासैर्विंशतानिपंचदश त्रिंशानिमंडलानांसूर्यस्यलभ्यंतेततएकेननक्षत्रेणमासे
नकतिमंडलानिलभामहेराशित्रयस्थापना६७।९१५।१।अत्रांत्येनराशिनामध्यराशेर्गुणनेततआद्येनराशि
नाभागहारालब्धानित्रयोदशमंडलानिचतुर्दशस्यचतुश्चत्वारिंशत्सप्तषष्टिभागाः।१३|४४/६७|तानरकात्तणमित्यादि
नक्षत्रविषयप्रश्नसूत्रसुगममितिभगवानाह।तातराम्त्यादित्रयोदशमंडलानिचतुर्दशस्यचमंडलस्य
अर्द्धसप्तचत्वारिंशतंसार्द्धचतुश्चत्वारिंशतंसप्तषष्टिभागानूचरति।तथाहियदिसप्तषष्ट्यानाक्षत्रैर्मासैरष्टाद

सूर्य० वृत्ति
२२४

शतानि पंचविंशदधिकानि अर्द्धमंडलानि नक्षत्रस्य लभ्यंते ततः एकेन नक्षत्रेण मासेन किल सामस्त्ये राशित्र
यस्थापना ॥ ६७ । १८३५ । १ । अत्रांत्येन राशिना मध्यराशेर्गुणने जातं तत आद्येन राशिना भागे हृते लब्धानि सप्तविंश
तिरर्द्धमंडलानि । अष्टाविंशतितमस्य चार्द्धमंडलस्य षट्‌विंशतिः सप्तषष्टिभागाः ॥ २७ । २६/६७ ततो द्वाभ्यामर्द्ध
मंडलाभ्यामेकं मंडलमित्यस्य राशेर्द्विकेन भागहरणे लब्धानि त्रयोदश मंडलानि चतुर्दश स्य मंडलस्य सार्द्धाः
षट्चत्वारिंशत् सप्तषष्टिभागाः ॥ १३ । ४६/६७ संप्रति चंद्रमासमधिकृत्य चंद्रादीनां मंडलानि निरूपणां करोति ता
चंदेणमित्यादि । ता इति पूर्ववत् । चांद्रेण मासेन नक्षत्रपरिवृत्तरूपेण चंद्रः कति मंडलानि चरति भगवा
नाह । ता चोद्दसेत्यादि । चतुर्दश सचतुर्भा गमंडलानि चतुर्भागसहितानि मंडलानि चरति । ए
कं च चतुर्विंशशतभागं मंडलस्य किमुक्तं भव ति । परिपूर्णानि चतुर्दश मंडलानि पंचदशस्य च मंडलस्य
चतुर्भागं चतुर्विंशत्यधिकशतभागं चरति तथा सूर्य द्विचतुर्विंशत्यधिकेन पंचशतेनाष्टोत्तराशतानि चतुर
शीत्यधिकानि मंडलानां लभ्यंते ततोऽस्यां पंचस्यां किल सामादेराशित्रयस्थापना । १२४ । १८८४ । ३ अत्रांत्ये
न राशिना एककलक्षणेन मध्यराशिगुणने जातान्यष्टादश शतान्यष्टषष्ट्यधिकानि । १८६८ । तेषां चतुर्वि
शत्यधिकेन शतेन भागहरणे लब्धानि चतुर्दश मंडलानि पंचदशस्य च मंडलस्य द्वात्रिंशत् चतुर्विंशत्यधि
कशतभागाः ॥ १४ । ३२/१२४ । ता आइच्चेणमित्यादि । सूर्यविषयप्रश्नसूत्रं सुगमं ता पन्नरसेत्यादि पंचदश चतुर्भागाधि २२४

---

नानि मंडलानि चरति । एकं च चतुर्विंशत्यधिकशतभागं मंडलस्य किमुक्तं भवति । चतुर्दश परिपूर्णानि मंडलानि पंचद
शस्य च मंडलस्य चतुर्भागं चतुर्विंशत्यधिकशतभागान् चरति तथा सूर्य द्विचतुर्विंशत्यधिकेन पंचशतेन नवश
तानि पंचदशत्रिंशानि मंडलानां लभ्यंते । ततोऽस्यां किल सामदेराशित्रयस्थापना । १२४ । १८३० । १ । अत्रांत्येन रा
शिना मध्यराशेर्गुणने जातान्यष्टादश शतानि त्रिंशदधिकानि । १८३० । एतेषामाद्येन राशिना चतुर्विंशत्यधि
केन शतेन भागहरणे लब्धानि चतुर्दश मंडलानि । पंचदशस्य च मंडलस्य चतुर्नवतिं चतुर्विंशत्यधिकशतभागा
॥ १४ । ९४/१२४ इति ता नक्खत्तेणमित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमं भगवानाह ता पन्नरसेत्यादि पंचदश
स्य च मंडलस्य चतुर्भागन्यूनानि च सप्तषट्चतुर्विंशत्यधिकशतभागान्मंडलस्य कि
मुक्तं भवति । परिपूर्णानि चतुर्दश मंडलानि चरति । पंचदशस्य च मंडलस्य नवनवतिं चतुर्विंशत्यधि
कशतभागान् तथा सूर्य द्विचतुर्विंशत्यधिकेन पंचशतेनाष्टादशशतानि पंचत्रिंशदधिकान्यर्द्धमं
डलानां लभ्यंते ततोऽस्यां पंचस्यां किल सामहेराशित्रयस्थापना ॥ १२४ । १८३५ । १ अत्रांत्येन राशिना ए
ककलक्षणेन मध्यमराशिगुणने जातानि षट्त्रिंशच्छतानि सप्तत्यधिकानि ३६७० तेषामाद्येन राशि
ना चतुर्विंशत्यधिकशतरूपेण भागहरणे लब्धा एकोनत्रिंशत् शेषाणि तिष्ठंति चतुर्नवतिः । इदं चार्द्धमंडल
गतं परिमाणं द्वाभ्यां चार्द्धमंडलाभ्यामेकं परिपूर्णमंडलं ततोऽस्य राशेर्द्विकेन भागहारो लब्धानि चतुर्द

शमंडलानि पंचदशस्य च मंडलस्य नवनवतिश्च त्रिंशत्यधिकशतभागा ॥ १४ ॥ (१०१) सांप्रतमृतुमासमधिकृत्य चंद्रा
दीनां मंडलनिरूपणां कारयति ॥ ता उउमासेणं चंदे इत्यादि उउमासे (१२४) त कर्म्ममासेन कर्म्ममासेन ।
कर्म्ममासेन चंद्रः कति मंडलानि चरति भगवानाह ता चोद्दसेत्यादि । चतुर्दश मंडलानि चरति पंचदशस्य च मंडलस्य
त्रिंशतमक... भागान् तथाहि यद्येकषष्ट्या कर्म्ममासैरष्टौ शतानि चतुरशीत्यधिकानि मंडलानां लभ्यंते
तत एकेन कर्म्ममासेन किं लभामहे राशित्रयस्थापना ॥ ६१ ॥ ८८४ ॥ १ ॥ अत्रांत्येन राशिना एककलक्षणेन मध्य
राशिगुणनाज्जातः स तावानेव तस्य एकषष्ट्या भागहरणं लब्धानि परिपूर्णानि चतुर्दश मंडलानि पंचदशस्य
च मंडलस्य त्रिंशदेकषष्टिभागाः ॥ १४ ॥ ३० ॥ ता उउमासेणमित्यादि सूर्यविषयं प्रश्नसूत्रं सुगमं भ
गवानाह ता पन्नरसेत्यादि पंचदश (६१) परिपूर्णानि मंडलानि चरति तथाहि यद्येकषष्ट्या कर्म्ममासै
र्नव शतानि पंचदशोत्तराणि सूर्यमंडलानां लभ्यंते तत एकेन कर्म्ममासेन किं लभामहे राशित्रयस्थापना
६१ । ९१५ । १ । अत्रांत्येन राशिना मध्यराशेर्गुणने जातः स तावानेव तस्य एकषष्ट्या भागहरणं लब्धानि परिपूर्णा
नि पंचदश मंडलानि ॥ ता उउमासेणमित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमं भगवानाह ता पन्नरसेत्यादि
पंचदश मंडलानि चरति षोडशस्य च मंडलस्य पंच द्वाविंशतिभागान् तथाहि यद्येकषष्ट्या कर्म्ममासैः श
तानि अष्टादशोत्तराणि पंचत्रिंशदधिकानि मंडलानां नक्षत्रस्य लभ्यंते तत एकेन कर्म्ममासेन किं लभामहे २२५

राशित्रयस्थापना ६१ । ९३५ । १ । अत्रांत्येन राशिना मध्यराशेर्गुणने जातः स तावानेव तस्याद्येन राशिना भागविंश
त्यधिकशतरूपेण भागहरणे लब्धानि पंचदश मंडलानि षोडशस्य च पंचत्रिंशद्विंशत्यधिकशतभागा ॥ १५ ॥ (१०२) संप्रति सू
र्यमासमधिकृत्य चंद्रादीनां मंडलानि निरूपयति ॥ ता आइच्चेणमित्यादि ता इति पूर्ववत् आदित्यमासेन
चंद्रः कति मंडलानि चरति भगवानाह चतुर्दश मंडलानि चरति भगवानाह चउद्दश मंडलानि चरति पंचदशा
स्य च मंडलस्य एकादश पंचदशभागान् तथाहि यद्येकषष्ट्या सूर्यमासैरष्टौ शतानि चतुरशीत्यधिकानि
मंडलानां चंद्रस्य लभ्यंते तत एकेन सूर्यमासेन किं लभामहे राशित्रयस्थापना ६१ । ८८४ । १ । अ
त्रांत्येन राशिना मध्यराशेर्गुणने जातः स तावानेव तस्य षष्ट्या भागहरणे लब्धानि चतुर्द
श मंडलानि शेषास्तिष्ठंति चतुश्चत्वारिंशद् ४४ ततश्छेद्यछेदकराश्योरर्द्धेनापवर्त्तना जाता उप
रितनो राशिः द्वाविंशतिरूपोऽधस्तनः पंचदशरूपः लब्धाः पंचदश मंडलस्य एकादश भागाः ॥ १६ ॥ ता
आइच्चेणमित्यादि सूर्यविषयं प्रश्नसूत्रं सुगमं भगवानाह पंचदश चतुर्भागाधिकानि मंड(१०५)लानि
चरति तथाहि यद्येकषष्ट्या सूर्यमासैर्नव शतानि पंचदशोत्तराणि मंडलानां सूर्यस्य लभ्यंते तत एकेन मा
सेन किं लभामहे राशित्रयस्थापना ६१ । ९१५ । १ । अत्रांत्येन राशिना एककलक्षणेन मध्यराशेर्गुणने
जातः स तावानेव तस्य षष्ट्या भागहरणं लब्धानि पंचदश मंडलानि षोडशस्य च पंचदश भागा विलक्षपंचदश भागा

सूर्यप्र०वृत्ति
२२६

त्रिंशद्भागाः ॥ ५४ ॥ ता आइच्चेणमित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमं। भगवानाह। ता पन्नरसेत्यादि पंचदश
मंडलानि चउत्तरा। ८० शद्भागाधिकानि पंचत्रिंशतं त्रिंशत्यधिकशतभागान् मंडलस्य चरति किमुक्तं भवति। एकं
शस्य च मंडलस्य पंचत्रिंशतं त्रिंशत्यधिकशतभागान् चरतीति तथाहि। यदि त्रिंशता सूर्यमाससहस्रात्तेनाष्टादशशता
नि पंचत्रिंशदधिकानि मंडलानां नक्षत्रस्य लभ्यन्ते ततः एकेन सूर्यमासेन किं लभ्यते राशित्रयस्थापना
३० । १८३५ । १ । अत्रान्त्येन राशिना एकलक्षणेन मध्यराशिर्गुणितो जाता तावानेव तस्य त्रिंशत्यधिकेन शतेन भागे हृते लब्धा
नि पंचदश मंडलानि पंचत्रिंशच्च त्रिंशत्यधिकशततमा भागाः ॥ षोडशस्य ५५ [५५ / १००] अधुनाभिवर्द्धि
तमासमधिकृत्य चंद्रादीनां मंडलानि निरूपयन्नाह ॥ ता अभिवड्ढि [१००] एणमित्यादि ता इ
ति पूर्ववत् अभिवर्द्धितेन मासेन चंद्रः कति मंडलानि चरति। भगवानाह। ता पन्नरसेत्यादि। पंचदश मं
डलानि चरति षोडशस्य च मंडलस्य अशीतिः षडशीत्यधिकशतभागान् तथाहि एवं त्रैराशिकं इह युगे
अभिवर्द्धितमासाः सप्तपंचाशत् सप्त चाहोरात्रा एकादश मुहूर्ता त्रयोविंशतिश्च द्वाषष्टिभागा मुहूर्तस्य
एषचरांशाः सत्रिंशइति त्रैराशिककर्मविषयः परिपूर्णमासप्रतिपत्त्यर्थं युगांशे षट्पंचाशदधिकेन श
तेन गुण्यते जातानि परिपूर्णानि नवाशीतिशतानि चतुष्पंचाशदधिकानि अभिवर्द्धितमासानां किमुक्तं भव
ति षट्पंचाशदधिकशतसंख्यायुगा यावंतः परिपूर्णा अभिवर्द्धितमासा लभ्यंते एतच्च द्वादशप्राभृते २२६

---

सुप्रपंचितमस्माभिरिति तत्र त्रैराशिककर्मावतारः। यदि त्रयोविंशत्यधिकैरभिवर्द्धितमासैर्नवाशी
तिशतैः षट्पंचाशदधिकशतसंख्यायुगलाविति चंद्रमंडलानामेकसप्तकलक्षसप्तत्रिंशत्सहस्राणि न
वशतानि चतुरुत्तराणि लभ्यंते ततः एकेनाभिवर्द्धितमासेन किं लभामहे राशित्रयस्थापना ८९२० । १३७९०४
१ । अत्रान्त्येन राशिना एकलक्षणेन मध्यराशिर्गुणितो जातः स तावानेव तस्याद्येन राशिना ८९२० भाग
हरणे लब्धानि पंचदश मंडलानि १५ शेषमुद्वरति मेकेन चत्वारिंशत्शतानि चतुरशीत्यधिकानि २९८४
ततश्छेद्यच्छेदकराशी द्वाभ्यां चत्वारिंशताप वर्त्तनाज्जातउपरितनो राशिः षडशीतिरधस्तनः षडशीत्य
धिकं शतं [८४ / १०१] आगतं षोडशमंडलस्य अशीतिः षडशीत्यधिकशतभागाः ॥ ता अभिवड्ढि
एणमित्यादि सूर्यविषयप्रश्नसूत्रं सुगमं भगवानाह। ता सोलसेत्यादि। षोडशमंडलानि त्रिभिः
भागैर्न्यूनानि चरति। मंडलस्याष्टचत्वारिंशद धिकास्पंशतानांछिन्नात तथाहि यदि षट्पंचाशदधिकशत
संख्ययुगसावित्रिंशत्यधिकैरभिवर्द्धितमासैर्नवाशीतिशतैः सूर्यमंडलानामेकं लक्षं चत्वारिंश
त्सहस्राणि सप्तशतानि चत्वारिंशदधिकानि लभ्यंते ततः एकेनाभिवर्द्धितमासेन किं लभामहे राशित्रयस्थापना
१ । ८९२० । १४२७४० । अत्रान्त्येन राशिना एकलक्षणेन मध्यराशिर्गुणितो जातः स तावानेव तस्याद्येन
राशिना ८९२० सा भागो ह्रियते लब्धानि पंचदशमंडलानि १५ शेषमुद्वरंति। अष्टाशीतिशतानि विंशत्यधि

सूर्य वृत्ति
२२७

कानि ८८२० ततश्छेद्यछेदकराश्योः षट्त्रिंशताऽपवर्त्तना जाता उपरितनो राशिः द्विशते पंचचत्वारिंशदधिके २४५।
अधस्तनश्च शतमष्टचत्वारिंशदधिकं १४८ आगतं षोडश मंडलं त्रिभिर्भागैर्न्यूनं तच्चास्य मष्टचत्वारिंशदधि
धिकशतसंख्यांशानां सप्तविंशत्या २४८ तापस्सिव (?) णमित्यादि नक्षत्रविषयं प्रश्नसूत्रं सुगमं सगवानाह ता
सोलसमंडलानि अद्ध (?) षोडश मंडलानि त्रिंशच्चत्वारिंशताऽशतभागैरधिकानि चतुर्दशभिः सप्तषष्टिभागैरधिकमंडलं
छित्वा तथाहि युगमध्ये चतुर्दशाधिकपंचदशशतानि सूर्ययुगासाविर्विवर्तितमासमनवाशीतिशतैरष्टाविंशत्यधि
कैः स्वरूपमंडलानामकलकचत्वारिंशत् नूसहस्राणि शतमेकत्रिंशदधिकं लभ्यते ततस्त्रैराशिककर्मस्था
वर्तितमासेन किं लभामहे राशित्रय स्थापना ८८२० । १४३१३० ।। अत्रांत्येन राशिना एक
कस्य गुणनेन मध्यराशिर्गुणितं जातः सताव निवा तस्याद्यतरशिराशिना ८८२० भागो हियते लब्धानि
षोडश मंडलानि शेषमुद्धरति द्विशतमष्टी त्यधिकं २०८ ततश्छेद्यछेदकराश्योः षट्केनापवर्त्तना जाता
उपरितनश्चत्वारिंशत् ४७ अधस्तु चतुर्दशशतान्यष्टाविंशत्यधिकानि १४७० आगताः सप्तचत्वारिंशत्सप्त
त्यधिकचतुर्दशशतभागाः सप्रत्यककेनाहोरात्रेण चंद्रादयः प्रत्येकं कति मंडलानि चरंतीत्येतान्निरू
पयितुमाह ता एगमेगेणमित्यादि ता इति पूर्ववत् एकैकेनाहोरात्रेण चंद्रः कति मंडलानि चर
ति भगवानाह ता एगमित्यादि एकमर्द्धमंडलं चरति एकत्रिंशता भागैर्न्यूनं नवभिः पंचदशोत्तरैः शतै २२७

रर्द्धमंडलं छित्वा तथाहि त्रिंदिवानामष्टादशभिः शतैस्त्रिंशदधिकैः सप्तदशशतानि अष्टषष्ट्यधिकानि
अर्द्धमंडलानां स्युस्ततः एकेन रात्रिंदिवेन किं लभ्यते राशित्रयस्थापना ।। १८३० । १७६८ ।। अत्राप्यं
त्येन राशिना एककलक्षणेन मध्यराशिर्गुणितः स तावानेव तस्याद्येन राशिना १८३० भागहरणं स चापरि
तस्य राशिः स्तोकत्वात्र लभ्यते ततश्छेद्यछेदकराश्योः षट्केनापवर्त्तना जाता उपरितनो राशिः द्वे शते
नवचत्वारिंशत्यधिके अधस्तन नवशतानि पंच दशोत्तराणि २९४/९१५ तत आगतमेकत्रिंशता भागैर्न्यून
मेकमर्द्धमंडलं नवभिः पंचदशोत्तरैः शतैश्छित्वेति ता एगमेगेणमित्यादि सूर्यविषयं प्रश्न
सूत्रं सुगमं भगवानाह ता एगमित्यादि एकमर्द्धमंडलं चरति एतदपि प्रतीतमेव ता एगमेगेण
मित्यादि नक्षत्रविषयप्रश्नसूत्रं सुगमं भगवानाह ता एगमित्यादि एकमर्द्धमंडलं द्वाभ्यां भा
गाभ्यामधिकं चरति द्वात्रिंशदधिकैः सप्तभिः शतैरर्द्धमंडलं छित्वा तथाहि युगस्याहोरात्राणामष्टादश शतैस्त्रिं
शदधिकैरष्टादशशतानि पंचत्रिंशदधिकानि नक्षत्राणामर्द्धमंडलानि लभ्यंते तत एकेनाहोरात्रेण किं
लभ्यते राशित्रयस्थापना १८३० । १८३५ । १ अत्रांत्येन राशिना एककरूपेण मध्यराशिर्गुणितो जातः स तावा
नेव तस्याद्येन राशिना १८३० भागहरणं लब्धमेकमर्द्धमंडलं शेषास्तिष्ठंति पंच ततश्छेद्यछेदकराश्योः
र्द्वाभ्यामपवर्त्तना जाता उपरितनौ द्वौ अधस्तन सप्तशतानि द्वात्रिंशदधिकानि लब्धौ द्वौ द्वात्रिंशदधिकसप्तश

सूर्यप्रज्ञप्तिवृत्ति त्ता गो [२ / ७३२] अधुना एकैकं परिपूर्णं मंडलं चन्द्रादयः प्रत्येकं कतिभिरहोरात्रैश्चरंतीत्येतन्निरूपणार्थमा-
२२८ ह । ता एगमेगमित्यादि । ता इति पूर्ववत् एकैकं मंडलं चन्द्रः कतिभिरहोरात्रैश्चरति भगवानाह । ता दो इत्या-
दि द्वाभ्यामहोरात्राभ्यां चरति एकत्रिंशता भागैरधिकाभ्यां चतुश्चत्वारिंशदधिकैः शतैः छित्त्वा तैः रात्रिंदिवं छित्त्वा त-
था हि यदि चंद्रस्य मंडलानामष्टभिः शतैश्चतुरशीत्यधिकैरहोरात्राणामष्टादश शतानि त्रिंशदधिकानि लभ्यंते
तत एकेन मंडलेन कति रात्रिंदिवानि लभामहे राशि- त्रयस्थापना ८८४ । १८३० । १ । अत्रांत्येन राशिना मध्यराशेर्गु-
णने जातः स तावानेव तस्याद्येन राशिना अष्टचतुर- शीत्यधिकाष्टशतप्रमाणेन भागहरणं लब्धौ द्वौ
रात्रिंदिवौ शेषास्तिष्ठति द्वाषष्टिः द्विषष्टिस्तत्र द्वयोश्छेद- कराश्योः अपवर्त्तना जाता उपरितनो राशिरेक-
त्रिंशत् अधस्तनश्चत्वारि शतानि द्विचत्वारिंशद- धिकानि [३१ / ४४२] आगतमेकत्रिंशद्द्विचत्वारिंशदधिका-
नि चतुःशतभागाः ॥ ता एगमेगमित्यादि । ता इति पू- र्ववत् एकै- कं मंडलं सूर्यः कतिभिरहोरात्रैश्चरति भ-
गवानाह । ता दो इत्यादि द्वाभ्यामहोरात्राभ्यां चरति तथा हि यदि सूर्यस्य मंडलानां नवभिः शतैः पंचदशो- २
त्तरैरष्टादशशतानि त्रिंशदधिकानि अहोरात्राणां लभ्यंते तत एकेन मंडलेन कत्यहोरात्रान् लभामहे
राशित्रयस्थापना ९१५ । १८३० । १ । अत्रांत्येन राशिना मध्यराशेर्गुणने जातः स तावानेव तस्याद्येन राशिना
नवपंचदशोत्तरेण भागहरणं लब्धौ द्वावहोरात्रौ इति ता एगमेगमित्यादि । ता इति पूर्ववत् एकैकमात्मीयं मंडलं नक्ष- २२८

त्रं ता दो इत्यादि । द्वाभ्यामहोरात्राभ्यां चरति द्वाभ्यां भागाभ्यां हीनाभ्यां त्रिभिः सप्तषष्टैः सप्तषष्ट्यधिकैः श-
तैः रात्रिंदिवं छित्त्वा तथा हि यदि नक्षत्रस्य मंडलानामष्टादशभिः शतैः पंचविंशदधिकैः षट्त्रिंशच्छतानि षष्ट्य-
धिकानि रात्रिंदिवानां लभ्यामहे तत एकेन मंडलेन किं लभामहे राशित्रयस्थापना १८३५ । ३६६० । १ । अत्रांत्येन
राशिना मध्यराशेर्गुणने जातः स तावानेव तस्याद्येन राशिना १८३५ लक्षणेन भागहरणं लब्धमेकं रात्रिंदिवं शेषाणि तिष्ठ-
त्यष्टादशशतानि पंचविंशत्यधिकानि १८२५ तत तत्र द्वयोश्छेदकराश्योः पंचकेनापवर्त्तना [३६५ / ३६७] जाता उपरित-
नो राशिस्त्रीणि शतानि पंचषष्ट्यधिकानि छे- दराशिस्त्रीणि शतानि सप्तषष्ट्यधिकानि तत आगतं
द्वाभ्यां सप्तषष्ट्यधिकत्रिशतभागाभ्यां हीनं द्वितीयं रात्रिंदिवमिति संप्रति चन्द्रादयः प्रत्येकं कति
मंडलानि युगेन चरंतीत्येतन्निरूपणार्थमाह ता जुगेणमित्यादि । ता इति पूर्ववत् युगेन कति मंडलानि
चरति भगवानाह । ता अठ इत्यादि । ता इति पूर्वव- त् अष्ट मंडलशतानि चतुरशीत्यधिकानि चरति तथा हि चंद्र
एकेनाहोरात्रसहस्रेणाष्टानवत्या च शतैः प्रविभक्तस्य मंडलस्याष्टपञ्चाशदधिकान् सप्तदशशतसंख्यान् भागान् एक-
केन मुहूर्त्तेन गच्छति युगे च मुहूर्त्ताः सर्वसंख्यया चतुःपंचाशत् सहस्राणि नव शतानि ततः सप्तदशशा-
तानि अष्टषष्ट्यधिकानि चतुःपंचाशता सहस्रैर्नवभिश्च शतैर्गुण्यंते जातानि नवकोट्यः सप्ततिलक्षाणि षट्
सहस्राणि विंशानि ९७०६०२० तस्य राशेरेकेन शतसहस्रेणाष्टानवत्या च शतैः ॥ १०९८०० मंडलानि

यतायसागोऽस्यितेलमाक्रिअष्टौशतानिवत्रशीत्यधिकानि मंडलानामितिताऽग्रेणमित्यादिसूर्यविषयं प्रश्न
सूत्रं भगवानाह।तातवप्पात्येत्यादि।ताऽइतिपूर्ववन्मातवमंडलशतानिपंचदशाधिकानिचरति।तथाहियावदस्या
माहारात्रास्यामकसूर्यमंडलंस्याततत:सकलयुगसातिलिरष्टादशलिराहारात्रशातस्त्रिंशदधिकाकाति
मंडलानितल्लस्यंतरागिवयस्थापनाशा।१८३०अत्रात्मनराशिनामध्यराशिगुणनजातान्यष्टादशशतानिविंश
त्यधिकानित्रिंशदधिकानि।१८३०तेषामाद्यनराशिनाविक्करूपणसागहरणलब्धानिनवशतानिपंचदशाधिकाणि
९१५एतावत्तागणमित्यादितंद्रविषयं प्रश्नसूत्रं सुगमं।भगवानाह।ताअहारसेत्यादि।अष्टादशशिला
गामंडलशतानित्र्यर्धमंडलशतानिपंचत्रिंशानिपंचत्रिंशदधिकानिचरति।तथाहिनक्षत्रमे
किनशातसटासप्तष्टानवत्याचशात:प्रविनक्षत्रमंडलस्पसकाकालपंचत्रिंशदधिकाष्टादशशतसं
ख्याभागानुपाकेतमुक्त्वाचिनिगच्छतियुगयमुकवासर्वसंख्ययावत्पंचाशतसहस्राणितवशतानित
तास्यास्वत:पंचशतासहस्रनवशतान्यष्टादशशतानिपंचत्रिंशदधिकानिगुणपातजानादशाकोटय:स
९ सप्तलक्षापक्षचत्वारिंशतसहस्रापिंचशतानि।१९०३४५५०अर्धमंडलानिचतुश्चत्वारिंशानितयकस्पश
तसहस्रस्याष्टानवतिशतानामधियानिचत्व:पंचाशतसहस्राणितवशतानितिसाणिऽय।ततलब्धानित्र्य
ष्टादशशतानिपंचत्रिंशदधिकानिअर्धमंडलानामितिसंप्रतिसकलप्राभृतगतमुपसंहारमाह॥१४॥ 

त्वसामुक्तमवगरइत्यादि।इतिएवमुक्तेनप्रकारेणएषामनंतरादितामुक्तानां गति:प्रतिमुक्तत्वं चसूर्यनक्षत्रा
णांगतिपरिमाणतथा।नक्षत्रादिमासाचनक्षत्रमासचंद्रमाससूर्यमासमलिवर्धितमासंतथारात्रिंदिवंतथायुगवा
धिकृत्यमंडलप्रविभक्तिमंडलप्रविभागोविकल्पनमंडलसंख्याप्ररूपणाइत्यर्थ:।तथाशीघ्रगतिरूपंवस्तुआ
ख्यातमितिएतदुक्तवानिदं भगवर्द्धमानस्वामीसम्यग्विश्वप्रश्नावाचयिता॥ इतिश्रीमलयगिरिवि
रचितायां सूर्यप्रज्ञप्तिटीकायां पंचदशं प्राभृतं समाप्तं ॥१५॥ तदेवमुक्तं पंचदशं प्राभृतं संप्रति षोडशमारभ्यते
तस्यचायमर्थाधिकारो यथा।कथं ज्योत्स्नालक्षणमाख्यातमितिततएवंरूपामेवप्रश्नसूत्रमाह।ता।कह
ते इत्यादि।ताइतिपूर्ववत्कथंकेनप्रकारेणभगवान्त्वयाज्योत्स्नालक्षणमाख्यातं
इतिवदेत्एवंसामान्यत:सूत्रेणावबोधितेअथविशेषप्रश्नंकरोति।ताचंदालेसाइत्यादि
ताइतिपूर्ववत्।ग्रंथ१०२०॥लेश्याइतिज्योत्स्ना इतिअत्रबहुपदायारमाचारख्याआयइतिचंडालनूपाद
त्वनायां:पदार्थानांलक्षणानामसुपूर्वीलदेनाघलितादाहाप्तायथाचंद्रानंदइतिपदानामपिचानुपूर्वीलद
दर्शनादर्थलेशनयथाप्रत्रस्पमुरु:।युरो:पुत्रइति।ततइत्थंपिक्कदाविदानुपूर्वीलदादर्थलादोसावप्पती
त्यावांकावृत्तगचंद्रलवपाऽइतिज्योत्स्नाइत्यकाज्योत्स्नाइतिलेश्याइत्यक्तअनाया।यदायारानुपूर्व्यात्रना
नुपूर्वीज्योत्स्नाव्यवस्थितायां।कोर्थ:।किंपरस्परंभिन्नार्थे।तेनइतिसर्वकिंलक्षणं।किंस्वरूपोलक्ष्यतातद।

न्यच्छवच्छेदेन ज्ञायते येन तल्लक्षणं असाधारणं स्वरूपं किल लक्षणम् असाधारणं स्वरूपं यस्य स तथा। एवं प्रश्ने कृते भगवानाह॥ ता दोसिणा लक्खणे इति। ता इति पूर्ववत् चंदलेसाइ त्ति छायेत्यनयोः पदयोरत्र प्रथमं ज्योत्स्ना उच्छाया चावस्थितायारेकावानिति न पृथगर्थः य एव कृतकस्य पदस्य वाच्योऽर्थः स एव द्वितीयस्यापि पदस्येति भावः। एगट्ठे एगलक्खणे इति। एकम् अभिन्नम् असाधारणं स्वरूपं लक्षणं यस्य स तथा। किमुक्तं भवति। यदेव चंद्रलेश्या इत्यनेन पदेन वाच्यस्यासाधारणं स्वरूपं तदेवातापादेवाच्यस्य ज्योत्स्नेत्यनेनापि पदेन यदेव वाच्यं ज्योत्स्नेत्यनेन पदेन तदेव चंद्रलेश्येत्यनेनापि पदेनेति। एवं आतप इति सूर्यलेश्या इति। आतप इति तथा अंधकार इति छाया इति अथवा छाया इति। अंधकार इति एतेषामपि विषये प्रश्ननिर्वचनसूत्राणि भावनीयानि॥ छ॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां षोडशं प्राभृतं समाप्तं॥ छ॥ तदेवमुक्तं षोडशं प्राभृतं संप्रति सप्तदशमारभ्यते। तस्य चायमर्थाधिकारः च्यवनोपपातौ वक्तव्याविति ततस्तद्विषयं प्रश्नमाह। ता कहं ते इत्यादि। ता कहं ते इत्यादि। ता इति पूर्ववत्। केन प्रकारेण भगवन् त्वया चन्द्रादीनां च्यवनोपपातौ आख्याताविति वदेत्। सूत्रे स्त्रीत्वनिर्देशः प्राकृतत्वात्। चवणोववाए आहिएत्ति वदेज्जा। एवं प्रश्ने कृते भगवान् एतद्विषये यावत्यः प्रतिपत्तयः संति तावतीरुपदर्शयति। तत्थेत्यादि। तत्र च्यवनोपपातविषये खल्विमा वक्ष्यमाणस्वरूपाः पंचविंशतिः प्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ताः 

---

तद्यथा। तत्थेगे इत्यादि। तत्र तेषां पंचविंशतेः परतीर्थिकानां मध्ये एके परतीर्थिका एवमाहुः। ता इति प्रथमं सूत्रे प्रत्यासन्नक्रमेण ... पदर्शनार्थः। अनुसमयमेव चंद्रसूर्या अन्ये पूर्वे च्यवंते अन्ये च्यवमाना अन्ये अपूर्वा उत्पद्यंते उत्पद्यमाना आख्याता इति वदेत्। अत्रापि उपसंहारः एके एवमाहुः। एके पुनरेवमाहुः। अनुमुहूर्तमेव चंद्रसूर्या अन्ये पूर्वे च्यवंते अन्ये च्यवमाना अन्ये अपूर्वा उत्पद्यंते उत्पद्यमाना आख्याता इति वदेत्। उपसंहारमाह। एगे एवमाहंसु एवं अनया दिशा तद्देवतादित्यादि एवंरूपेण प्रकारेण यथाऽत्र यस्तात् षष्ठप्राभृते ओजःसंस्थितौ चिंत्यमानायां पंचविंशतिः प्रतिपत्तयो भक्ताः स्वयमेव तथापि वक्तव्या यावद् एगे पुण एवमाहंसु ता अणुउस्सप्पिणिओसप्पिणिमेवेत्यादि चरमसूत्रं ताश्चैवं भणितव्याः एगे पुण एवमाहंसु ता अणुराइंदियमेव चंदिमसूरिया अन्ने चयंति अन्ने उववज्जंति आहिया इति वएज्जा एगे एवमाहंसु। एगे पुण एवमाहंसु ता अणुपक्खमेव चंदिमसूरिया अन्ने चयंति अन्ने उववज्जंति आहिया एगे एवमाहंसु। एगे पुण एवमाहंसु ता अणुमासमेव चंदिमसूरिया अन्ने चयंति अन्ने उववज्जंति आहिया इति वएज्जा एगे एवमाहंसु। एगे पुण एवमाहंसु ता अणुउउमेव चंदिमसूरिया अन्ने चयंति अन्ने उववज्जंति आहिया इति वएज्जा एगे एवमाहंसु॥ एवं ता अणुअयणमेव ता अणुसंवच्छरमेव ता अणुजुगमेव ता अणुवाससयमेव ता अणुवाससहस्समेव ता अणुवाससयसहस्समेव ता अणुपुव्वमेव ता अणुपुव्वसय।

ते

मेवं १४ ताओ णं उवासगसहस्सामेवं १५ ताओ णं उवासगसयसहस्सामेवं १६ ताओ णं पलिओवममेवं १७ ताओ णं पलिओव
मसयमेवं १८ ताओ णं पलिओवमसहस्सामेवं १९ ताओ णं पलिओवमसयसहस्सामेवं २० ताओ णं सागरोवम
मेवं २१ ताओ णं सागरोवमसयमेवं २२ ताओ णं सागरोवमसयसहस्समेवं २३ पंचविंशतितमप्रतिपत्तिसूत्रं
तु साक्षादेव सूत्रकृता दर्शितं तदेवमुक्ताः परतीर्थिकप्रतिपत्तयः एताश्च सर्वा अपि मिथ्यारूपास्तत एताभ्यः पृथ
ग्भूतं स्वमतं भगवानुपदर्शयति वयं पुण इत्यादि वयं पुनरुत्पन्नकेवलज्ञाना एवं वक्ष्यमाणेन प्रकारेण वदा
मः तमेव प्रकारमाह ता चंदिमेत्यादि ता इति पूर्ववत् चंद्रसूर्याणामिति वाक्यालंकारे देवा महर्द्धि
का महती ऋद्धिर्विमानपरिवारादिका येषां ते तथा तथा महती द्युतिः शरीराभरणादीप्तिर्ये
षां ते महाद्युतयः तथा महद्बलं शारीरः प्राणो येषां ते महाबलाः तथा महद्यशो विश्वस्मि
न्नपि जगति तावत् ख्यातं यशः ख्यातिर्येषां ते महायशसः तथा महानुभावो वैक्रियकरणादिविषया
चिन्त्या शक्तिर्येषां ते महानुभावाः तथा महत् [illegible] प्रमाणेन तदपेक्ष्या
तिशायि शातवेदनीयं सौख्यं येषां ते महासौख्याः वरवस्त्रधरा वरमाल्यधरा वराभरणधराः अव्यव
च्छित्तिनयार्थतया द्रव्यास्तिकनयमतेन कालस्य प्रमाण [illegible] अन्यपूर्वे च्यवन्ते
च्यवमाना अन्य उत्पद्यमाना [illegible] इति वदेत् स्वशिष्येभ्यः 

॥७॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां सप्तदशं प्राभृतं समाप्तं ॥७॥ तदेवमुक्तं सप्तदशं प्राभृतं ।
सांप्रतमष्टादशमारभ्यते तस्य चायमर्थाधिकारो यथा चंद्रसूर्यादीनां भूमेरूर्ध्वमुच्चत्वप्रमाणं वक्तव्यमिति ततस्तद्वि
षयं प्रश्नसूत्रमाह ॥१॥ ता कहं ते इत्यादि ता इति पूर्ववत् कथं केन प्रकारेण भगवन् त्वया भूमेरूर्ध्वं चंद्रादीनामुच्च
माख्यातमिति वदेत् एवमुक्ते भगवानेतद्विषये यावत्यः प्रतिपत्तयः सन्ति ताः उपदर्शयति तत्थ इत्यादि तत्र
उच्चत्वविषये खल्विमाः स्वरूपाः पंचविंशतिः प्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ता तद्यथा तत्थेगे इत्या
दि तासां पंचविंशतेः परतीर्थिकप्रतिपत्तीनां मध्ये एके परतीर्थिका एवमाहुः ता इति पूर्ववत् एकं
योजनसहस्रं सूर्यो भूमेरूर्ध्वमुच्चत्वेन स्थितो द्व्यर्धं सार्धं योजनसहस्रं भूमेरूर्ध्वं चंद्र इत्युक्तं
भवति भूमेरूर्ध्वं योजनसहस्रं गत्वा ततः सूर्योऽवस्थितः सार्धे च योजनसहस्रे गत्वा चंद्रः सूत्रे च यो
जनसहस्रं [illegible] सूत्रे च योजनसंख्यापदस्य [illegible] यादिपदस्य च तुल्याधिकरणत्वं निर्देशो [illegible] प्राकृतत्वात् यथा
पाटलिपुत्राच्च राजगृहं नव योजनानीत्यादि एवमुत्तरेष्वपि सूत्रेषु भावनीयानि अत्रापि सदा [illegible] एवमा
हंसु ॥२॥ एके पुनरेवमाहुः ता इति पूर्ववत् द्वे योजनसहस्रे भूमेरूर्ध्वं सूर्यश्चैव स्थितः अर्धतृतीयानि योजनसह
स्राणि चंद्रः ॥ अत्रापि सदा [illegible] एवमाहंसु ॥३॥ एवं शेषाण्यपि सूत्राणि भावनीयानि [illegible] णमित्यादि एतेन
[illegible] प्रतिपत्तिगतमपि सूत्रजातं [illegible]

हस्साइंसूरउड्ढंउच्चत्तेणंअद्धुट्ठाचंदाएगेएवमाहंसु॥३ताचत्तारिंत्यादिएगेपुणएवमाहंसु।ताचत्तारिजोयणस
हस्साइंसूरउड्ढंउच्चत्तेणंअद्धपंचमाइंचंदेएगेएवमाहंसु॥४पंचसूरेअद्धछट्ठमाइंचंदेएगेपुणएवमाहंसु
ताछजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धसत्तमाइंचंदेएगेएवमाहंसु॥६सत्तसूरेअट्ठमाइंचंदेइतिएगे
पुणएवमाहंसु।तासत्तजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धट्ठमाइंचंदेएगेएवमाहंसु॥७अट्ठसूरेअद्धनवमा
इंचंदेइतिएगेएवमाहंसु।ताअट्ठजोयणसहस्साइंसूरउ। ड्ढंउच्चत्तेणंअद्धनवमाइंचंदेएगेएवमाहंसु॥८नवसूरेअद्धदस
माइंचंदेइतिएगेपुणएवमाहंसु।तानवजोयण सहस्साइंसूरउड्ढंउच्चत्तेणंअद्धदसमाइंचंदेएगेएवमाहंसु।
॥९दससूरेअद्धएक्कारसमाइंचंदेइतिएगेपुण एवमाहंसु।तादसजोयणसहस्साइंसूरउड्ढंउच्चत्तेणं
अद्धएक्कारसमाइंचंदेएगेएवमाहंसु॥१०एक्कारस सूरेअद्धबारसमाइंचंदेइतिएगेपुणएवमाहंसु।ताइक्कारसजो
यणसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धबारसमाइंचंदेएगे एवमाहंसु॥११बारससूरेअद्धतेरसमाइंचंदेइतिएगेपुण
एवमाहंसु।ताबारसजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धतेरसमाइंचंदेएगेपुणएवमाहंसु॥१२तेरससूरेअद्ध
चउद्दसमाइंचंदेइतिएगेपुणएवमाहंसु।तातेरसजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धचोद्दसमाइंचंदे
एगेएवमाहंसु॥१३चोद्दससूरेअद्धपन्नरसमाइंचंदेइतिएगेपुणएवमाहंसु।ताचोद्दसजोयणसहस्साइंसू
रउड्ढंउच्चत्तेणंअद्धपन्नरसमाइंचंदेएगेएवमाहंसु॥१४पन्नरससूरेअद्धसोलसमाइंचंदेइतिएगेपुणएवमा २३२

हंसु।तापन्नरसजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धसोलसमाइंचंदेएगेएवमाहंसु॥१५सोलससूरेअद्ध
सत्तरसाइंचंदेइतिएगेपुणएवमाहंसु।तासोलसजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धसत्तरसाइंमाइंचंदे
एगेएवमाहंसु॥१६सत्तरससूरेअद्धअट्ठारसमाइंचंदेइतिएगेपुणएवमाहंसु।तासत्तरसजोयणसहस्साइंसूर
उड्ढंउच्चत्तेणंअद्धअट्ठारसमाइंचंदेएगेएवमाहंसु॥१७अट्ठारससूरेअद्धएगूणवीसमाइंचंदेइतिएगेपुणएवमाहंसु
।ताअट्ठारसजोयणसहस्साइंसूरउड्ढंउच्चत्तेणं अद्धएगूणवीसमाइंचंदेएगेएवमाहंसु॥१८एगूणवीसंसू
रेअद्धवीसमाइंचंदेइतिएगेपुणएवमाहंसु। ताएगूणवीसंजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअ
द्धवीसमाइंचंदेएगेएवमाहंसु॥१९वीसंसूरे अद्धएक्कवीसमाइंचंदेइतिएगेपुणएवमाहंसु।ता
एगूणवीसंजोयणतावीसंजोयणसहस्सा इंसूरउड्ढंउच्चत्तेणंअद्धएक्कवीसमाइंचंदेएगेएवमाहंसु
॥२०एक्कवीसंसूरेअद्धबावीसमाइंचंदेइतिएगेएवमा हंसु।ताइक्कवीसंजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअ
द्धबावीसमाइंचंदेएगेएवमाहंसु॥२१बावीसंसूरेअद्धतेवीसमाइंचंदेइतिएगेपुणएवमाहंसु।ताबावीसंजोय
णसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धतेवीसंमाइंचंदेएगेएवमाहंसु॥२२तेवीसंसूरेअद्धचउवीसंमाइंचंदेइति
एगेपुणएवमाहंसु।तातेवीसंजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धचउवीसंमाइंचंदेएगेएवमाहंसु॥२३
चउवीसंसूरेअद्धपंचवीसमाइंचंदेइतिएगेपुणएवमाहंसु।चउवीसंजोयणसहस्साइंसूरउड्ढंउच्चत्तेणंअद्धपं

चवीसमाइं वंदसगाणव माहसुत्ताइ अधपंचविंशतितमप्रतिपत्तिसूत्र उसाह्णादशचितिणगउणावमाहसुताणणवी
समित्यादि। एतानि च सूत्राणि सुगमत्वाद्व्याख्यानानि याति। तादेवमुक्ताः परप्रतिपत्तयः। संप्रति स्वमतं स्वमतं भगवा
नुपदर्शयति। वयं पुनरुत्पन्नकेवलवेदस एवं वक्ष्यमाणेन प्रकारेण वदामः। तमेव प्रकारमाह। ता इमीसे इत्या
दि। ता इति पूर्ववत्। अस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद्भूमिभागादूर्ध्वं सप्तयोजनशतानि नवति
नवतानि नवत्यधिकानि उत्प्लुत्य गत्वा अत्रान्तरे अधस्तनं ताराविमानं चारं चरति। मंडलगत्या परिभ्रमणं प्र
तिपद्यते तथा अस्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद्भूमिभागादूर्ध्वमष्टौ योजनश
तान्युत्प्लुत्य अत्रान्तरे सूर्यविमानं चारं चरति तथा अस्या रत्नप्रभायाः पृथिव्या बहुसमरम
णीयाद्भूमिभागादूर्ध्वमष्टौ योजनशतानि अशीत्यधिकान्युत्प्लुत्य अत्रान्तरे चंद्रविमानं चरति। तथा अ चारं
स्या रत्नप्रभायाः पृथिव्या बहुसमरमणीयाद्भूमिभागादूर्ध्वं परिपूर्णानि नवयोजनशतान्युत्प्लुत्य अत्रान्त
रे सर्वोपरितनं ताराविमानं चारं चरति। अधस्तनात्ताराविमानादूर्ध्वं दश योजनान्युत्प्लुत्य अत्रान्तरे उत्प्लुत्य सूर्य
विमानं चारं चरति। तत एव अधस्तनात्ताराविमानान्नवतिं योजनान्यूर्ध्वमुत्प्लुत्य अत्रान्तरे चंद्रविमानं चारं चरति। तत
एव सर्वाधस्तनात्ताराविमानाद्दशोत्तरं योजनशतमूर्ध्वमुत्प्लुत्य अत्रान्तरे सर्वोपरितनं ताराविमानं चारं चरति।
ता सूरविमाणाओ इत्यादि। ता इति पूर्ववत् सूर्यविमानादूर्ध्वमशीतिं योजनान्युत्प्लुत्य अत्रान्तरे चंद्रविमानं चा २३३

रं चरति। तस्मादेव सूर्यविमानादूर्ध्वं योजनशतमुत्प्लुत्य अत्रान्तरे सर्वोपरितनं तारारूपं ज्योतिश्चक्रं चारं चरति। ता
चंदविमाणाओ इत्यादि। ता इति पूर्ववत्। चंद्रविमानादूर्ध्वं विंशतिं योजनान्युत्प्लुत्य अत्रान्तरे सर्वोपरितनं तारारू
पं ज्योतिश्चक्रं चारं चरति। एवमेव सत्यादि एवमेव उक्तेन प्रकारेण सपुव्वावरेणंति सह पूर्वेण वर्तते इति सपू
र्वं सपूर्वं च तत् अपरं सपूर्वापरं तेन दशोत्तरयोजनशतबाहल्ये तत्र हि सर्वाधस्तनात्तारारूपात्
ज्योतिश्चक्रादूर्ध्वं दश योजनानि सूर्यविमानं ततो ऽशीत्या योजनैश्चंद्रविमानं ततो विंशत्या सर्वोप
रितनं तारारूपं ज्योतिश्चक्रमिति भवति ज्योतिश्चक्रचाराद् बाहल्यं तदा दशोत्तरयोजनशतबाहल्ये तस्मिन्
दशोत्तरयोजनशतबाहल्ये पुनः कथंभूते इत्याह। तिर्यगसंख्यातायोजनकोटीकोटीप्र
माणे ज्योतिर्विषये मनुष्यक्षेत्रविषये ज्योति। श्चक्रं चारं चरति नु वारं चरन् मनुष्यक्षेत्राद्बहिः पुनरवस्थि
तमाख्यातमिति वादिनः। ता ता अङ्गेणमित्यादि ता इति पूर्ववत् अस्य भगवन् चंद्रसूर्याणां दे
वानां हिट्ठिंपि त्ति कृत्वा अपकृष्य अधस्तनाः अपि तारारूपविमानाधिष्ठातारो देवाः क्षेत्रविभवलेश्यादिक
मपेक्ष्य केचिदणवोपि तुल्या वापि भवंति हीना अपि भवंतीत्यर्थः। केचित् तुल्या अपि भवंति तथा सममपि
चंद्रविमाने सूर्यविमाने चाधिकृत्यापेक्ष्य समपङ्क्त्यापि ये ऽवस्थितास्तारारूपास्तारा विमानाधिष्ठा
तारो देवास्तेपि चंद्रसूर्याणां देवानां क्षेत्रविभवादिकमपेक्ष्य केचिदणवोपि भवंति केचित् तुल्या अपि।

तथा चंद्रविमानानां सूर्यविमानानां चोपर्यपि ये व्यवस्थितास्ताराद्भूपास्ताराद्भूपविमानाधिष्ठातारो देवास्तेपि चंद्रसूर्या
णां देवानां द्युति विभवादिकमपेक्ष्य केचिदणवोपि भवंति केचित्तुल्या अपि एवं गौतमेन प्रश्ने कृते भगवानाह ता
अत्थि त्ति यादृशं यादृक्तत्र भवेत्तथैवाह तद्वा एवमुक्ते भूयः प्रश्नयति ता कहं ते इत्यादि सुगमं भगवानाह ता जह जह
णं इत्यादि ता इति पूर्ववत् यथा यथा णमिति वाक्यालंकारे तेषां देवानां ताराद्भूपविमानाधिष्ठातॄणां प्राग्भवे त
पो नियमब्रह्मचर्याणि उच्छ्रितानि उत्कटानि भवंति तथा तथा तेषां देवानां तस्मिन् ताराद्भूपविमानाधिष्ठातृत्वे
भवे भवति यथा अणुत्वं वा तुल्यत्वं वा किमुक्तं भवति ये प्राग्भवे तपो नियमब्रह्मचर्याणि मंदानि कृ
तानि ते ताराद्भूपविमानाधिष्ठातृदेवभवमनुप्राप्ताश्चंद्रसूर्यादिभ्यो द्युतिविभवादि
कमपेक्ष्य हीना भवंति येस्तु प्रबलानि तपो नियमब्रह्मचर्याण्युत्कटान्यासेवितानि ते ताराद्भू
पविमानाधिष्ठातृरूपदेवत्वमनुप्राप्ताः द्युति विभवादिकमपेक्ष्य चंद्रसूर्येभ्यः समाना भवंति न चै
तदनुपपन्नं दृश्यते हि मनुष्यलोकेपि कोपि जन्मांतरोपचिततथाविधपुण्यप्राग्भारो राजत्वमप्राप्तोपि
राज्ञा सह तुल्यद्युति विभवादिरिति ता एवं खलु इत्यादि निगमनवाक्यं सुगमं ता एगमेगस्स णमित्यादि
चंद्रादिपरिवारविषयाणि प्रश्ननिर्वचनसूत्राणि सुगमानि ता मंदरस्स णमित्यादि ता इति पूर्ववत् मंदरस्य
पर्वतस्य जंबूद्वीपगतस्य सकलतिर्यग्लोकमध्यवर्तिनः कियत्याऽबाधया सर्वतः ज्योतिश्चारं चरति 

भगवानाह ता एक्कारसेत्यादि ता इति पूर्ववत् एकादश योजनशतान्येकविंशान्येकविंशत्यधिकानि अबाधया
ज्योतिश्चारं चरति किमुक्तं भवति मेरोः सर्वत एकादशयोजनशतान्येकविंशत्यधिकानि मुक्त्वा तदनंतरं चक्रवालतया
ज्योतिश्चक्रं चारं चरति ता लोयंताओ णमित्यादि ता इति पूर्ववत् लोकांतादर्वाक् णमिति वाक्यालंकारे कियत्या अत्र
मेऽबाधया कृत्वा अपांतराले कृत्वा ज्योतिश्चक्रं प्रज्ञप्तं भगवानाह ता एक्कारसेत्यादि एकादशयोजनशतान्येकादशा
न्येकादशाधिकान्यबाधया कृत्वा अपांतराले विधाय ज्योतिश्चक्रं प्रज्ञप्तं ता जंबुद्दीवे णं दीवे कयरे नक्खत्ते इत्या
दि सुगमं नवरमभिजिन्नक्षत्रं सर्वाभ्यंतरं नक्षत्रमंडलिकामपेक्ष्य एवं मूलादीनि सर्वबाह्यादीनि भावनी
यानि ता चंदविमाणे णमित्यादि संस्थान विषयं प्रश्नसूत्रं सुगमं भगवानाह ता अद्धकविट्ठग
संठाणे इत्यादि उत्तानीकृतमर्द्धमात्रं कपित्थं तस्येव यत् संस्थानं तेन संस्थितमर्द्धकपित्थसंस्थानसंस्थितं आह यद
चंद्रविमानमुत्तानीकृतार्द्धमात्रकपित्थफलसंस्थानसंस्थितं ततः उदयकालेऽस्तमनकाले वा यदि वा तिर्यक्
परिभ्रमत् पौर्णमास्यां कस्मान्नदर्द्धकपित्थफलाकारं नोपलभ्यते कामं शिरस उपरि वर्त्तमानं वर्तुलमुपल
भ्यते अर्द्धकपित्थस्य उपरि दूरमवस्थापितस्य परभागे दर्शनतो वर्तुलतया दृश्यमानत्वात् उच्यते इह अर्द्धक
पित्थफलाकारं चंद्रविमानं न समस्तमवसातव्यं किंतु तस्य चंद्रविमानस्य पीठं तस्य च पीठस्योपरि चंद्रदे
वस्य ज्योतिश्चक्रराजः प्रासादः स च प्रासादस्तथा कथंचनापि व्यवस्थितो यथा पीठेन सह भूयान् वर्तुलाकारो भवति

सूर्य० वृत्ति
२३५

सवज्ञसावादकांतत।समन्नतयाज्ञानानंभवतिसासततोनकश्चिद्दोषः।नाचैततस्वमनीषिकाविहंसितंयतः
तदवसितलक्षणेऽन्यत्रमप्येनविशेषणवत्यामाह।पंचउस्सरंकऋधक्कविहागाराउदयत्रमणंमिकदनदी
संति।ससिसूराणविमाणातिरियखेत्तठियाणंचाह्यउत्ताणद्धकविठागंपीढंतदुवरिंपासाउविठालोए
णंतवसमवट्टद्धलसावाठातथासर्वनिरविशेषंस्फटिकमयंस्फटिकविशेषमणिमयं।तथाअभ्युद्गताभि
मुखंयतःसर्वतोविनिर्गताउच्छ्रिताप्रबलतयास वासुदिक्षुप्रसृतायाप्रभादीप्तिस्तयासितंशुक्लंअत्रस्य
तोऽहसितप्रभासितंतथाविविधाअनेकप्रकारा मणयश्चंद्रकांतादयोरत्नानिकर्केतनादीनितेषांभ
क्तयाविच्छित्तिविशेषास्ताभिश्चित्रमानक रूपवन्नआश्चर्यवद्वा।तथाविविधमणिरत्नविचित्रावद्धद्ध
वाउद्धुयविजयवेजयंतीपडागाछत्ताइछत्त। कलिएतुंगेगगणतलमणुलिहंतसिहरेजालंतर
रयणपंजरोम्मीलियव्वमणिकणगथूभियागे वियसियसयवत्तपुंडरीयतिलयरयणद्धचंदचित्ते
तोवट्टिंवसाण्हतवणिज्जवालुगापत्थडेसुहफाससस्सिरीयरूवपासाईएदरिसणिज्जे इति तत्र वातोद्धूतावा
युकंपिताविजयाविजयसूचकत्वात्स्फुटवैजयंत्यभिधानायापताकाअथवाविजयाइतिवैजयंतीनांपार्श्व
कर्णिकाउच्यंतेतत्प्रधानावैजयंत्योविजयवैजयंत्यःपताकास्ताएवविजयवर्जितावैजयंत्यः॥छत्रा
तिछत्राणिचउपर्युपरिस्थितातपत्राणितैःकलितावातोद्धूतविजयवैजयंतीपताकाछत्रातिछत्रकलितास्तुंग २३५

उच्चैस्तरावगगणतलमणुलिहंतसिहरेगगनतलमंबरतलमनुलिखदभिलंघयत्शिखरंयेषांतेगगन
तलानुलिखच्छिखरातथाजालानिजालकानितानिचभवनभित्तिषुलोकप्रतीतानितदंतरेषुविशिष्टशोभा
निमित्तंरत्नानियेषुतेजालांतररत्नाःसूत्रेचात्रप्रथमैकवचनलोपोद्रष्टव्यः।तथापंजरादुन्मीलितमिवबहि
र्निष्कासितमिवपंजरोन्मीलितं।यथाहिकिलकिमपिवस्तुपंजराद्वंशादिमयप्रच्छादनविशेषाद्बहिःकृतम
त्यंतमविनष्टच्छायत्वाच्छोभतेतथासावपितद्विविमानमितिभावः।तथामणिकनकानांसंबंधिन्यःस्तूपि
काःशिखराणियस्यतन्मणिकनकस्तूपिकाकंतथा। विकसितानियानिशतपत्राणिपुंडरीकाणिचद्वारादौ
प्रतिकृतित्वेनस्थितानितिलकाश्चभित्त्यादिषु पुंड्राणिरत्नमयाश्चयेऽर्धचंद्राद्वाराग्रादिषुतैश्चित्रंवि
कसितशतपत्रपुंडरीकतिलकार्धचंद्रचित्रंतथांत र्बहिश्चश्लक्ष्णंमसृणमित्यर्थः।तथातपनीयंसुवर्णवि
शेषस्तन्मयावालुकायाःसिकतायाःप्रस्तटःप्रत रोयत्रतत्तथा।तथासुखस्पर्शंशुभस्पर्शंवा।तथासश्रीका
णिसश्रीकानिरूपाणिनरयुग्मादीनियत्रतत्सश्रीकरूपं।तथाप्रसादीयंमनःप्रसादहेतुः।अतएवदर्शनीयंद्र २
ष्टुंयोग्यं।तद्दर्शनेनतृप्तेरसंभवात्।तथाप्रतिविशिष्टमसाधारणंरूपंयस्यतत्तथा।एवंसर्वविमानेष्वपि।
यथाचंद्रविमानस्वरूपमुक्तमेवंसूर्यविमानेंचवक्तव्यं।पाठस्तुसर्वेषामपिज्योतिर्विमानानामेकरूपत्वान्न
।तथाचोक्तंसमवायांगे।केवइयाणंभंतेजोइसियावासापन्नत्ता।गोयमा।इमीसेरयणप्पभापुढवीए

वज्जमसमरं मणिच्छाउ इसमिलागाउ मवनुनउयाइं जोयणसयाइं उढं उप्पइत्ता दसुत्तराजोयणसयबाहल्ले
तिरियमसंखेज्जा जोइसविसए जोइसियाणं देवाणं असंखेज्जा जोइसियविमाणावासा पण्णत्ता। ते णं
जोइसियविमाणावासा अब्भुग्गयमूसियपहसिया विविहमणिरयणभत्तिचित्ता तं चेव जाव पासाईया
दरिसणिज्जा पडिरूवा इति। तावं दविमाणाणमित्यादीनि आयामविष्कंभादिविषयाणि सर्वाण्यपि प्रश्नप्रति
वचनसूत्राणि सुगमानि। नवरमर्द्धकपित्थपरिमाणं विष्कंभस्य अर्द्धकरणेन इदं स्यात् परिरयो इइ
तिकरणवशात्स्वयमेवानेतव्यः तथा चन्द्रविमा नस्यायामविष्कंभपरिमाणं एकषष्टिभागाः ततस्तत्र
परिमाणं कावाचतुर्गुणं तदूर्द्धं त्रिगुणितिकस्य ताराविमानस्यैकवि विमानस्यायामविष्कंभप
रिमाणं पंचचत्वारिंशता नियतपरिमाणमर्द्धेति यानि भवन्ति तत्र तद्विचार्यं अष्टचत्वा
रिंशद्भागाः सूर्यमंडलविष्कंभमानं मस:षट्पंचाशदंशाः नक्षत्राणां
सविष्कंभायामाः ग्रहविमानानां अर्द्धयोजनं परिमाणं एकोनषष्टिभागाः पंचचत्वारिंशता तिर्यग्विष्कंभायामबाहल्यात् सर्वेषां तेषां त्रिगुणा परिधि
र्या उत्ता का इति तावं दविमाणं कइ देवसाहस्सीओ परिवहंतीत्यादीन्यपि वाहनविषयाणि प्रश्ननिर्वच
नसूत्राणि सुगमानि नवरमियं वस्तुना इह चन्द्रादीनां विमानानि तथाजगत्स्वाभाव्यान्निरालंबानि व
हंत्यवतिष्ठंते। केवलं ये आभियोगिका देवास्ते तथा विधनामकर्म्मोदयवशात् समानजातीयानां 

हीनजातीयानां चा देवानां निजस्फातिविशेषदर्शनार्थमात्मानं बहुमन्यमाना: प्रमोदभृता: सततवहनशीलेषु वि
मानेषु अधः स्थित्वा केचित् सिंहरूपाणि केचित् गजरूपाणि केचित् वृषभरूपाणि केचित् तुरगरूपाणि कृत्वा तानि वि
मानानि वहंति। न चैतदनुपपन्नं तथाविधाभियोग्यनामकर्म्मोपभोगभागी दासोऽन्येषां
समानजातीयानां हीनजातीयानां वा सुविदितानामेवमहं नायकस्यास्य प्रसिद्धस्य सम्मत इति निजस्फा
तिविशेषप्रदर्शनार्थं सर्वमपि स्वोचितं कर्म्म नायकसमक्षं प्रमुदितः करोति। तथा आभियोगिका अपि दे
वास्तथाविधाभियोग्यनामकर्मोपभोगत रूढ:समानजातीयानां हीनजातीयानां वा अन्येषामेव 
वयमृद्धाः समस्तलोकप्रसिद्धानां चन्द्रादीनां विमानानि वहाम इत्येवं निजस्फातिविशे
षप्रदर्शनार्थमात्मानं बहु मन्यमानाः स्वरूपं कारणं चन्द्रादिविमानानि वहंतीति वहती तेषां च चन्द्रा
दिविमानवहनशीलानामाभियोगिकदेवानां मिमसंख्यासंग्राहके केयं जंबूद्वीपप्रज्ञप्तिसूत्रकगाथे सोलस
देवसहस्साइं वहंति चंदेसु चेव सूरेसु। अट्ठेव सहस्साइं एक्कंमी गहविमाणे। चत्तारि सहस्साइं नक्खत्तंमि य
हवंति एक्केक्के। दो चेव सहस्साइं ताराऊवेक्कमेक्कंमि ताणएणसणमित्यादि। शीघ्रगतिविषयप्रश्नसूत्र
निर्वचनसूत्रं सुगमं। एतच्च प्रमादफलं परंतु योविमानवहनउत्साहात् इत्यादी। अत्यन्ता कारणं बहु
कृतत्वाद्वा गंतव्यं। ताउं जंबूद्दीवे णं भंते दीवे इत्यादि ताराविमानांतरविषयं प्रश्नसूत्रं सुगमं। भगवानाह।

सूर्यप्रवृत्ति
२३७

ताद्वविहेइत्यादि। द्विविधमंतरं प्रज्ञप्तं तद्यथा व्याघातिमं निर्व्याघातिमं च तत्र व्याहननं व्याघातः पर्वतादिस्खलनं
तेन निर्वृत्तं व्याघातिमं भावादिभ्य इमप्रत्ययः। निर्व्याघातिमं व्याघातिमान्निर्गतमुक्तलक्षणमित्यर्थः। तत्र यत्
व्याघातिमं तज्जघन्यतो द्वे योजनशते षट्षष्ट्यधिके एतच्च निषधकूटादिकमपेक्ष्य वेदितव्यं। तथाहि निष
धपर्वतः स्वभावतोप्युच्चैश्चत्वारि योजनशतानि तस्य चोपरि पंच योजनशतोच्चानि कूटानि तानि च मूले पंच यो
जनशतान्यायामविष्कंभाभ्यां मध्ये त्रीणि योजन नशतानि पंचसप्तत्यधिकानि उपरि अर्द्धतृतीयानि योज
नशतानि तेषां चोपरितन भागसमश्रेणिप्रदेशे तथा जगत्स्वाभाव्यादष्टावष्टौ योजनान्यबाधयातोऽ
बाधया कृत्वा ताराविमानानि परिभ्रमंति ततो जघन्यतो व्याघातिममंतरं द्वे योजनशते षट्षष्ट्यधि
के भवतः। उत्कर्षतो द्वादशयोजनसहस्रा णि द्वे योजनशते द्विचत्वारिंशदधिके एतच्च मेरुमपे
क्ष्य द्रष्टव्यं तथाहि मेरौ दशयोजनसहस्राणि मेरोश्चोभयतोऽबाधया एकादशयोजनशतान्येकविंश
त्यधिकानि ततः सर्वसंख्यामीलने भवंति द्वादशयोजनसहस्राणि द्वे योजनशते द्विचत्वारिंशदधिके इति
व्याघातिमंतिरविषयसूत्रं सुगमं। तिचंदस्स णमित्यादि अग्रमहिषीविषयं सूत्रं सुगमं नवरमेकैकस्या दे
व्याश्चत्वारि देवीसहस्राणि परिवार इति किमुक्तं भवति। एकैका अग्रमहिषी चतुर्णां चतुर्णां देवी
सहस्राणां पट्टराज्ञी एकैका च साऽग्रमहिषी परिचारणावसरे तथाविधं व्याघातिकराजं देवेंद्रा २३७

---

मुपलक्ष्य प्रभुत्वात् निजात्मसमानरूपाणि चत्वारि चत्वारि देवीसहस्राणि विकुर्वितुं इह सिद्धांतप्रसिद्धो विकुर्व
इति। अन्नउन्नस्स विउव्वणा इति प्रयोगः। ततो विकुर्वितुमित्युक्तं एवमेवेति एवमेव उक्तप्रकारेणैव सपु
व्वावारणंति सह पूर्वेण अपरेण च सपूर्वापरं तेन सपूर्वापरेण पूर्वापरमीलनेन सप्तरा विकानि षो
डश देवीसहस्राणि चंद्रस्य भवति तथाहि तस्य चतस्रोऽग्रमहिष्य एकैकस्याश्च चत्वारि चत्वारि देवीसहस्रपरि
वारा ततः सर्वसंकलनेन भवंति षोडश देवीसह स्राणि। स एतावत् त्रुटिकमिति एतावद्देवीचंद्रस्य त्रुटिकमंतः
पुरं तच्चकंचाजीवालिंगमनुसृत्य त्रुटिकमतः पुर मिति। पभूणं चंदे इत्यादि प्रश्नसूत्रं सुगमं भगवानाह नो
इणमट्ठे समट्ठे नायमर्थः समर्थः उपपन्ना नयुक्तोयमर्थ इति भावः। तेषां चंद्रावतंसके विमा
नियामु धम्मसिलातस्यामतः प्रभृति सादि व्यान् भोगान् भोगान् भुंजानो विहरतीति। ता कहं तेनो
पभू इत्यादि प्रश्नसूत्रं सुगमं भगवानाह ताचंद स्स णमित्यादि। चंद्रावतंसके विमाने सुधर्मायां सभा
यां माणवकानाम चैत्यस्तंभो तस्मिन् वज्रमयेषु सिक्ककेषु वज्रमया गोलाकाराः वृत्ता।
समुद्गकास्तेषु बहूनि जिनसक्थीनि निक्षिप्तानि तिष्ठंति। ताउणमित्यादि तानि जिनसक्थीनि इह स्त्री
त्वनिर्देशः प्राकृतत्वात् चंद्रस्यान्येषां च बहूनां ज्योतिष्काणां देवानां देवी
नां च अर्चनीयानि पुष्पादिभिः वंदनीयानि विशिष्टैः स्तोत्रैः पूजनीयानि वस्त्रादिभिः सत्कारणीयानि

सूर्यप्रज्ञप्ति
२३८

तिष्ठन्ति आदरप्रतिपत्त्या सन्माननीया इति जिनोचितप्रतिपत्त्या कल्याणं कल्याणहेतुं मंगलं दुरितोपशमहेतुं दैवतं
परमदेवता चैत्यमिष्टदेवताप्रतिमा इत्येवं पर्युपासनीया इति कृत्वा तत एवमेतेन कारणेन न खलु नो प्रभुश्चन्द्रस्या
दिभुगमंतापन्नेन चन्द्रस्यादि केवलपरिवारेण परिवारेण सह भोगा एतस्या वापमयपरिवारमात्रेण इति
प्रामा त्येव तेजस्फातिविशेषदर्शनाय इति भावः। प्रभुश्चन्द्रो ज्योतिषराजो ज्योतिषराजश्चन्द्रावतंसके विमा
ने सभायां सुधर्मायां चन्द्रसिंहासने चतसृभिः सामानिकसहस्रैश्चतसृभिरग्रमहिषीभिः सपरिवाराभिस्ति
सृभिरभ्यंतरमध्यमबाह्यरूपाभिः पर्षद्भिः सप्तभि रनीकैः सप्तभिरनीकाधिपतिभिः षोडशभिरात्मरक्ष
कदेवसहस्रैरन्यैश्च बहुभिर्ज्योतिष्कैर्देवै र्देवीभिश्च सार्द्धं संपरिवृत इति महताहतनाट्यगीत
वादित्रतन्त्रीतलतालत्रुटितघनमृदङ्गपटुप्रवादितरवेण दिव्यान् भोगभोगान् भुञ्जानो विहर्तुं प्रभुरिति
सायान्नि लागाः प्रसादयत्नेन समनुज्ञातो विहर्तुं प्रभुरिति योगः न पुनर्मैथुनप्रत्ययामैथुननिमित्तं स्पर्शादि विषे
नं ज्ञातो विहर्तुं प्रभुरिति। एवं चन्द्रस्य णमित्यादौ न्यपि पञ्चविवचनसूत्राणि भावनीयानि तानि च सिया णं देवा २३८
णमित्यादि सर्वसुगमं यावन्नवरं पञ्चस्वपि सूत्रेषु मानवे चन्द्रदेवतुल्यश्चापि तत्र सामानिकात्मरक्षका

दय इत्यत्रात्मरक्षकादीनां यथोक्तानुपत्त्या स्थितिरस्ति कष्ट इन्द्रदेवस्य तत्र सामानिकादीनां एवं सूर्यविमानादि
षु भावनीयं॥ इति श्रीमलयगिरिविरचितायां सूर्यप्रज्ञप्तिटीकायां अष्टादशं प्राभृतं समाप्तं॥१८॥ तदेव
मुक्तमष्टादशं प्राभृतं सम्प्रत्येकोनविंशतितममारभ्यते तस्य चायमर्थाधिकारो यथा कति चन्द्रसूर्याः
सर्वलोकं आख्याता इति ततस्तद्विषयं प्रश्नसूत्रमाह॥ ता कइ णं मित्यादि ता इति पूर्ववत् कति कियत्प्रमा
णानि इति वाक्यालंकारे चन्द्रसूर्याः सर्वलोके अवभासन्ते अवभासमाना उद्योतयन्ति तपन्ति प्रका
शयन्ति आख्याता इति वदेत् एवमुक्ते भगवान् तत्र विषये यावत्यः प्रतिपत्तयस्तावतीरुपदर्शयति।
तत्थेत्यादि तत्र सर्वलोकविषये चन्द्रसूर्यसंख्याविषये खल्विमा वक्ष्यमाणस्वरूपा द्वादश
प्रतिपत्तयः परतीर्थिकाभ्युपगमरूपाः प्रज्ञप्ताः तत्र तेषां द्वादशानां परतीर्थिकानां मध्ये एके पर
तीर्थिका एवमाहुः ता इति तेषां परतीर्थिकानां प्रथमं तृतीयं प्रत्यनकवक्तादृष्ट्या ताप एके एवमाहुः
एकश्चन्द्र एकः सूर्यः सर्वलोकमवभासयति अवभासयन्तु उद्योतयन्ति तपन्ति प्रकाशयन्त्या
ख्याता इति वदेत् अत्रोपसंहारमाह एगे एवमाहंसु॥१॥ एके पुनरेवमाहुः त्रयश्चन्द्रास्त्रयः सूर्याः सर्वलो
कमवभासयन्त आख्याता इति वदेत् अत्राप्युपसंहारः एगे एवमाहंसु॥२॥ एके पुनरेवमाहुः अर्द्धचतुर्था
श्चन्द्राः अर्द्धचतुर्थाः सूर्याः सर्वलोकमवभासयन्त आख्याता इति वदेत् अत्राप्युपसंहारः एगे एवमाहंसु॥३॥ एव

मित्यादि एवमुक्तेन प्रकारेण एतेनानंतरादितेनाभिलापेन द्वितीयप्राभृतप्राभृतोक्तप्रकारेणाबद्धं प्रतिप
त्तिप्रपंचं सकलमपि सूत्रं नेतव्यं तावद्यावत्सर्ववासन्नसूरा इति ॥ एगे पुण एवमाहंसु ता सत्त चंदा सत्त सूरा सव्वलो
यं ओभासंति ॥ ४ आदिच्चत्ति वएज्जा एगे एवमाहंसु ॥ ४ एगे पुण एवमाहंसु ता दस चंदा दस सूरा सव्वलोयं ओभासं
ति ॥ ४ आदिच्चत्ति वएज्जा एगे एवमाहंसु ॥ ५ एगे पुण एवमाहंसु बारस चंदा बारस सूरा सव्वलोयं ओभासंति
॥ ४ आदिच्चत्ति वएज्जा एगे एवमाहंसु ६ एगे पुण एवमाहंसु ता बायालीसं चंदा बायालीसं सूरा सव्वलोयं
ओभासंति ॥ ४ आदिच्चत्ति वएज्जा एगे एवमाहंसु ॥ ७ एगे पुण एवमाहंसु ता बावत्तरिं चंदा बावत्तरिं
सूरा सव्वलोयं ओभासंति ४ आदिच्चत्ति वएज्जा एगे एवमाहंसु ॥ ८ एगे पुण एवमाहंसु ता बाया
लीसं चंदसयं बायालीसं सूरसयं सव्वलोयं ओभासेइ ॥ ४ आदिच्चत्ति वएज्जा एगे एवमाहंसु ९ एगे
पुण एवमाहंसु ॥ ४ ता बावत्तरं चंदसयं बावत्तरं सूरसयं सव्वलोयं ओभासेइ ॥ ४ आदिच्चत्ति वएज्जा एगे ए
वमाहंसु ॥ १० एगे पुण एवमाहंसु ता बायालीसं चंदसहस्सं बायालीसं सूरसहस्सं सव्वलोयं ओभासेइ ॥
आदिच्चत्ति वएज्जा एगे एवमाहंसु ॥ ११ एगे पुण एवमाहंसु ता बावत्तरं चंदसहस्सं बावत्तरं सूरसहस्सं सव्व
लोयं ओभासेइ ॥ ४ आदिच्चत्ति वएज्जा एगे एवमाहंसु ॥ १२ [illegible] सर्वेऽपि प्रतिपत्तयो मिथ्यारूपा भाव
भगवान् स्वमतमेतासः [illegible]माह ॥ ता वयं पुण [illegible] इत्यादि वयं पुनरुत्पन्नकेवलज्ञाना एवं वदा 

माणप्रकारेण वदाम स्वमेव प्रकारमाह ता अयन्नमित्यादि [illegible] अयं जंबूद्वीपवाक्यं पूर्ववत् परिपूर्णं पठनीयं व्या
ख्यानीयं च ॥ ता जंबुदीवे णं दीवे कइ चंदा इत्यादि जंबूद्वीपे णं द्वीपे कति चंद्राः प्रभासितवंतः प्रभासंते प्रभासि
ष्यंति इत्यादि प्रश्नसूत्रं सकलकालमेव विभाषया एवं जंबूद्वीपे स्थिते भगवानाह ता दो इत्यादि ता इति पूर्ववत् ता
तापयंति तापयिष्यंति तथा एकैकस्य शशिनोऽष्टाविंशतिर्नक्षत्राणि परिवारो जंबूद्वीपे च द्वौ शशिनौ ततो
ततः षट्पंचाशन्नक्षत्राणि जंबूद्वीपे चंद्रसूर्याभ्यां सह योगं युक्तवंति युंजंति योक्ष्यंति वा तथा एकैकस्य
शशिनोऽष्टाशीतिर्ग्रहाः परिवारः ततः शशिद्वयसत्कग्रहमीलने सर्वसंख्यया षट्सप्तत्यधिकं ग्रह
शतं भवति तन्नु जंबूद्वीपे चारं चरति चरंति च रिष्यंति च तथा एकैकस्य शशिनस्तारापरि
वारः कोटीकोटीनां षट्षष्टिः सहस्राणि नव शतानि पंचसप्तत्यधिकानि जंबूद्वीपे च द्वौ शशिनौ
ततः एतत्ताराप्रमाणं द्वाभ्यां गुण्यते ततः एकं शतसहस्रं त्रयस्त्रिंशत्सहस्राणि नवशतानि पंचाशदधिका
नि तारागणकोटिकोटीनां शोभितवंतः तावत्प्रमाणास्ताराः जंबूद्वीपे शोभितवत्यः शोभंते शोभिष्यंते ॥ संप्रति वि
नेयजनानुग्रहाय यथोक्तं जंबूद्वीपगतचंद्रादिसंख्यासंग्राहिकं गाथाद्वयमाह दो चंदा इत्यादि एते च
द्वे अपि सुगमे नवरं जंबुदीवे वियारीणं णमिति वाक्यालंकारे ततो वियारी इति विभक्तिपरिणामेन चंद्रादि
भिः सह समानाधिकरण्येन योजनीयमिति ता जंबुदीवे णमित्यादि ता इति पूर्ववत् जंबूद्वीपं द्वीपं णमिति वा

द्वीपं द्वीपं णमिति वाक्यालंकारे लवणो नाम समुद्रो वृत्तो वलयाकारसंस्थानसंस्थितः सर्वतः समंतात्सर्वासु दिक्षु
विदिक्षु चेत्यर्थः संपरिक्षिप्य वेष्टयित्वा तिष्ठति । एवं उक्ते भगवान् गौतमः प्रश्नयति । ता लवणे णं समुद्दे इत्यादि सुगमं
भगवानाह ता समचक्कवालेत्यादि सुगमं । भूयः प्रश्नयति ता लवणे णमित्यादि सुगमं भगवानाह । ता दो जो
यणेत्यादि । द्वे योजनशतसहस्रे चक्रवालविष्कंभेन पंचदश योजनशतसहस्राणि एकाशीतिसहस्राणि
शतमेकमेकोनचत्वारिंशदधिकं किंचिद्विशे षोनं परिक्षेपेण तथाहि लवणसमुद्र एकतोपि द्वे योजन
शतसहस्रे चक्रवालविष्कंभोऽपरतोपि द्वे ॥ योजनशतसहस्रमध्ये जंबूद्वीपो योजनशतसहस्रमे
ति सर्वमीलनेन पंचलक्षाः सर्वे ते ५००००० ए तेषां वर्गे जाताः पंचविंशतिर्दश शून्यानि दश
गुणने जातान्येकादश शून्यानि ॥ २५०००० ०००००००० एतस्य राशेर्वर्गमूले लब्धानि पंच
दशलक्षाणि एकाशीतिसहस्राणि शतमेकम् । श्चात्रिंशदधिकं १५८११३९ शेषमुद्धरति । षड्विंशतिर्लक्षा
सप्तविंशतिसहस्राणि नवशतानि पंचाशदधिकानि छेदराशिश्च एकत्रिंशल्लक्षा द्वाषष्टिः सहस्राणि द्वे शते अ
ष्टसप्तत्यधिके २६.२४९५६ एतदपि स्थायायोजनमेकं किंचिद्विशेषोनं लभ्यते ततः एकं सर्वं चक्रवालं किंचि विसेसू
णमिति ता ल ३१६२२७८ वणे णं समुद्दे इत्यादि सुगमं लवणसमुद्रे चत्वारः शशिन इत्यष्टाविंशतिर्नक्षत्राणि
चतुर्गुणं ततो द्वादशोत्तरं नक्षत्राणां शतं तत्र भवति ग्रहाशीतिश्च यद्ग्रहाष्टाविंशतिर्गुणिता तेन तस्तु णिता २४०

नि द्विपंचाशदधिकानि तेषां सर्वाग्रं ता ताराकोटीकोटीनां द्वे ष सहस्राणि नवशतानि पंचसप्तत्यधिकानि चतुर्गु
णं तेन ततो यथोक्तं ताराप्रमाणं भवति । ता लवणस्समुद्दे मित्यादि सकलमपि सुगमं नवरं परिधिगणितपरिभा
वनायैवं कर्त्तव्या इह पश्चाद्विष्कंभयोजनलक्षं लवणस्यालक्षता द्विशतयोजनलक्षमिति स्थिताश्चतस्रो लक्षा
धातकीषंडस्यापि चतस्रो लक्षा मिलिताश्चाष्टौ सर्वसंख्यया जाता त्रयोदशलक्षाणि १३०००००० ततोऽस्य रा
शेर्वर्गे जाता एककः षट्काः नवकः शून्यानि च । दश।१६९०००००००००००० एषोऽपि दशभिर्गुणने जातान्ये
कादश शून्यानि १६९००००००००००००० एतेषां वर्गमूलानयने लब्धानि एकचत्वारिंशल्लक्षाः त्रिसहस्राणि द
शसहस्राणि नवशतानि एकषष्ट्यधिकानि ४११ ०९६१ नक्षत्रादिपरिमाणमप्यष्टाविंशत्यादिसंख्या
नेन नक्षत्रादीनि द्वादशभिर्गुणयित्वा स्वयमानेत व्यानि ॥ ता धायइसंडे णमित्यादि एतदपि सकलं सुगमं ता
कालोए णं समुद्दे इत्यादि एतदपि सुगमं नवरं परिक्षेपगणितभावना इयं कालोदसमुद्रस्यैकतो चक्र
वालतया विष्कंभोऽष्टौ योजनलक्षा अपरतोऽपि अष्टौ धातकीषंडस्यैकतोपि चतस्रो लक्षा अपरतोपि च
तस्रो लवणसमुद्रस्यैकतोपि द्वे लक्षे अपरतोपीति चतस्रः एका लक्षा जंबूद्वीपस्येति सर्वसंख्यया
एकोनत्रिंशल्लक्षाः २९०००००० तेषां वर्गो विधीयते जाता अष्टकः चतुष्क एककः शून्यानि दश ८४१०००
०००००००० ततो दशभिर्गुणने जातान्येकादश शून्यानि ८४१०००००००००००० तेषां वर्गमूलानयने लब्धं

DR. BHAU DAJI

यथोक्तपरिधिपरिमाणं ९२७०८०५ शेषं त्रिकोनवकस्त्रिकौ त्रिकोनवका सप्तकः पंचकः २९८३ २९८७५ इति यदुक्त
तिष्ठते तदपेक्षया विशेषाधिकं वेदितव्यं एका कोटी द्वानवतिः सयसहस्साइं सि एकनवतिः शतसहस्राणि सप्तति
सप्ततिसहस्राधिकानि नक्षत्रादिपरिमाणं च अष्टाविंशत्यादिसंख्यानि नक्षत्रादीनि द्वाचत्वारिंशता गुणयित्वा
भावनीयं ता कालोदं णं समुद्दं पुक्खरवरेणमित्यादि सुगमं नवरं परिक्षेपभावना त्वियं पुष्करवरद्वीपस्य एकतोऽपि चक्रवाल
विष्कंभः षोडश लक्षा अपरतोऽपि षोडशेति द्वात्रिं शल्लक्षाः कालोदसमुद्रोऽप्येकतोऽष्टौ लक्षा अपरतोऽप्यष्टाविति षो
डश लक्षाः धातकीखंडोऽप्येकतोऽपि चतस्रो लक्षा अपरतो ऽपि चतस्र इत्यष्टौ लवणसमुद्रोऽप्येकतोऽपि द्वे लक्षे अपरतोऽपि
द्वे इति चतस्रो जंबूद्वीपो लक्षमिति सर्वसं कलनया जाता एकषष्टिर्लक्षाः ६१००००० तस्य राशे
र्वर्गो विधीयते जातास्त्रिकः सप्तकः द्विकः एकक दशाच शून्यानि तानि दशगुणने जातानि शून्यान्यक
दश ३७२१०००००००००००० तेषां वर्गमूलानयने लब्धं यथोक्तं परिधिपरिमाणं नक्षत्रादिपरिमाणं चाष्टाविंश
त्यादिसंख्यानि नक्षत्रादीनि चतुश्चत्वारिंशता शतेन गुणयित्वा स्वयं परिभावनीयं ता पुक्खरवरस्स णं मित्यादि ता
ऽति पुष्करवरद्वीपस्य बहुमध्यदेशभागे मानुषोत्तरो नाम पर्वतः प्रज्ञप्तः स च यावता द्विधा तेन मध्यप्र
विभिन्नं भवति यथा कोऽपि दोर्ध्नेणार्धाकमंडलं ततस्तद्रूपत्वस्य च तदर्द्धमाह वलयाकारसंस्थानसंस्थितो
यः पुष्करवरद्वीपं द्विधा सर्वासु दिक्षु विभजमानस्तिष्ठति केऽपि लस्वेन द्विधा विभजमानस्तिष्ठति इत्याह तथ २४१

था अभ्यंतरपुष्करार्द्धं च बाह्यपुष्करार्द्धं च तत्र अन्यैः कर्त्तौ वति मानुषोत्तरात्पर्वतादर्वाक् यत्पुष्करार्द्धं त
दभ्यंतरपुष्करार्द्धं यत्पुनस्तस्मान्मानुषोत्तरात्पर्वतात्परतः पुष्करार्द्धं तद्बाह्यपुष्करार्द्धमिति ता अभ्यंतरपुक्ख
रद्धे णमित्यादि सर्वमपि सुगमं नवरं परिधिगणितभावना प्राग्वत् नक्षत्रादिपरिमाणं चाष्टाविंशत्यादि
संख्यानि नक्षत्रादीनि द्वासप्तत्या गुणयित्वा परिभावनीयं संप्रति मनुष्यक्षेत्रवक्तव्यतामाह ता माणुसखेत्ते
णं केवइयमित्यादि सुगमं नवरं मानुषक्षेत्रस्य आयामविष्कंभपरिमाणं पंचचत्वारिंशल्लक्षाः एवं एकाल लक्षं
जंबूद्वीपस्ततो लवणसमुद्र एकतोऽपि द्वे लक्षे अपरतोऽपि द्वे लक्षे अपरतोऽपि द्वे लक्षे इति चतस्रः धात
कीखंड एकतोऽपि चतस्रो लक्षा अपरतोपि त्यष्टौ कालोदसमुद्र एकतोऽपि अष्टावपरतोऽप्यष्टा
विति षोडश अभ्यंतरपुष्करार्द्धमेकतोऽष्टौ लक्षा अपरतोपीति षोडशेति सर्वसंख्यया पंचचत्वारिं
शल्लक्षाः परिधिगणितपरिभावना तु विष्कंभवर्ग दशगुणेत्यादिकरणवशात् स्वयं कर्त्तव्या नक्षत्रादिपरिमा
णं तु अष्टाविंशत्यादिसंख्यानि नक्षत्राद्यन्यकराशिपरिवारभूतानि द्वात्रिंशता शतेन गुणयित्वा स्वयमानेत
व्यानि। छवसयसहस्साइं इत्यादि अत्र गाथा द्वाभ्यां बाह्यपुष्करार्द्धस्य विष्कंभपरिमाणमुक्तं मानुषोत्तरान्निमा
तुषक्षेत्रस्य कोटीत्यादि एका कोटी द्विचत्वारिंशा शतसहस्राणि त्रिंशत् सहस्राधिका विंशतिसहस्राणि
द्वात्रिंशदेकोनपंचाशदधिके १४२३०२४९ एतावत्प्रमाणो मानुषक्षेत्रस्य परिरयः एष एतावत्प्रमाण एव तु

सू०प्र०वृ०
२४२
ष्करार्द्धस्य अभ्यंतरपुष्करार्द्धस्यापि परिरयः॥ बावत्तरिं चंदा इत्यादि गाथात्रयमभ्यंतरपुष्करार्द्धगतचंद्रादिसंख्याप्रति-
पादकं सुगमं। यदपि बत्तीसं चंदसयमित्यादि गाथाद्वयं सकलमनुष्यलोकगतचंद्रादिसंख्याप्रतिपादकं। तदपि
सुगमं अठ्ठासीइं चत्ताइं इति। अष्टाशीतिसहस्राणि चत्वारिंशानि चत्वारिंशत्सहस्राधिकानि। शेषं गाथार्थः। संप्रति स-
कलमनुष्यलोकगततारागणस्यैवोपसंहारमाह। एसो इत्यादि एषोऽनंतरगाथोक्तसंख्याकस्तारापिंडः सर्वसंख्य-
या मनुष्यलोके आख्यात इति गम्यते बहिः पुनः मनुष्यलोकाद्व्यास्तारास्ता जिनैः सर्वज्ञैर्भणिता असं-
ख्याता द्वीपसमुद्राणामसंख्यातत्वात् प्रतिद्वी- पं प्रतिसमुद्रं च यथायोगं संख्येयानामसंख्येयानां च ता-
राणां सद्भावात्। एवइयमित्यादि एतावत्संख्या- कं तारापरिमाणं यदनंतरमुक्तं मनुष्यलोके तज्ज्यो-
तिष्कं ज्योतिष्कदेवविमानरूपं कदंबपुष्पसंस्थि- तं कदंबपुष्पवत् अधः संकुचितं उपरि विस्तीर्णमुत्ता-
नीकृतार्द्धकपित्थसंस्थानसंस्थितमित्यर्थः। घारंधरतिवा रं प्रतिपद्यते तच्च भगवत्स्थानांगाद्यागमे ताराग्रहणं चोपलक्षणं ते-
न सूर्यादीनामपि यथोक्तसंख्याको मनुष्यलोके तथा जगत्स्वाभाव्यादवस्थानं प्रतिपद्यते इति द्रष्टव्यं। संप्रत्येतेषामे-
वोपसंहारमाह। रवीत्यादि। रविशशिग्रहनक्षत्राणि उपलक्षणमेतत् तारकाणि च एतावंत्यनंतरसंख्यानि आख्याता-
नि सर्वाग्रं मनुष्यलोके यथा नामेत्याह। ये आह्वाः सूर्यादीनां यथोक्तसंख्याकानां सकलमनुष्यलोकभाविनां प्र-
त्येकं नामगोत्राणि इह नामगोत्रशब्देन नामसिद्धांतपरिभाषया भणावमित्यन्यत्र ततोऽयमर्थः नामगोत्राणि अ- २४२

र्थरूपाणि नामानि नामानि च आदित्यानामपि नामगोत्राणि नामगोत्राणि प्राकृता अनतिशायिनः पुरुषा न कदाच-
नापि प्रज्ञापयिष्यंति। केवलं यदा नादाविसर्वज्ञा एव ततः इदमपि सूर्यादिसंख्यानं प्राकृतपुरुषाप्रमेयं सर्वज्ञो-
पदिष्टमिति सम्यक् श्रद्धेयमिति॥ ब॥ छावट्ठी पिडगा इत्यादि इह द्वौ चंद्रौ द्वौ सूर्याविति एकं पिडकमुच्यते। एवंभू-
तानि चंद्रादित्यानां पिटकानि सर्वसंख्यया मनुष्यलोके भवंति षट्षष्टिः षट्षष्टिसंख्याकानि। अथ किं प्रमा-
णं पिटकमिति पिटकप्रमाणमाह। एकैकस्मिन् पि- टके द्वौ चंद्रौ द्वौ सूर्यौ भवतः किमुक्तं भवति। द्वौ चंद्रौ द्वौ
सूर्याविति एतावत्प्रमाणमेकैकं चंद्रादित्यानां पि- टकमिति। एवंप्रमाणं च पिटकं जंबूद्वीपे एकं जंबूद्वीपे हि द्वयो-
र्द्वयोश्चंद्रमसोर्द्वयोश्च सूर्ययोः सद्भावात् द्वे पिटके लवणसमुद्रे तत्र चतुर्णां चंद्रमसां चतुर्णां च सूर्याणां सद्-
भावात् एवं षट् पिटकानि धातकीखंडे एकविंशतिः का- लोदे षट्त्रिंशदभ्यंतरपुष्करार्द्धे इति एवं सर्वमीलनेन चं-
द्रादित्यानां षट्षष्टिः पिटकानि॥ छावट्ठी इत्यादि सर्वस्मि- न्नपि मनुष्यलोके सर्वसंख्यया नक्षत्राणां पिटकानि भवंति
षट्षष्टिर्नक्षत्रपिटकप्रमाणं च शशिद्वयसंबंधिनक्षत्रसंख्यापरिमाणं तथा चाह। एकैकस्मिन् पिटके नक्षत्राणि भ-
वंति षट्पंचाशत्संख्यानि किमुक्तं भवति। षट्पंचाशन्नक्षत्रसंख्याकमेकैकं नक्षत्रपिटकं। अत्रापि षट्षष्टिसंख्या-
भावना एवं एकं नक्षत्रपिटकं जंबूद्वीपे लवणसमुद्रे षट् धातकीषंडे एकविंशतिः कालोदे षट्त्रिंशदभ्यंतरपु-
ष्करार्द्धे इति॥ छावट्ठी इत्यादि महाग्रहाणामपि सर्वस्मिन्नपि मनुष्यलोके सर्वसंख्यया पिटकानि भवंति षट्षष्टिः। यदपि

ष्टकप्रमाणं च शशिद्वयसंबंधिग्रहसंख्यापरिमाणं तथा चाष्टाशीतिरेकैकस्मिन् शशिपरिवारे ग्रहपिटकं भवति षट्सप्ततषट्स
प्तत्यधिकग्रहशतसप्तत्यधिकग्रहशतपरिमाणं लोके ग्रहपिटकमिति भावः षट्षष्टिसंख्या भावनीया च प्राग्वदुक्त
त्वाद्या। चत्वारि च इत्यादि। इह मनुष्यलोके चंद्रादित्यानां पंक्तयश्चतस्रः प्रवर्त्तंते द्वे पंक्ती चंद्राणां द्वे सूर्याणां
म् एकैका च पंक्तिर्भवति षट्षष्टिः षट्षष्टिः सूर्यादिसंख्याभावना चैवं किल जंबूद्वीपे मेरोर्दक्षिण
भागे चारं चरन्वर्त्तते एकः सूर्य उत्तरभागे एकश्चंद्रमाः पूर्वभागे एकोऽपरभागे तत्र यो मेरोर्दक्षिणभागे सूर्यश्चारं च
रन्वर्त्तते तस्य समश्रेण्या व्यवस्थितौ द्वौ दक्षि णभागे सूर्यौ लवणसमुद्रे षट् धातकीखंडे एकविंशतिः
कालोदे षट्त्रिंशदभ्यंतरपुष्करार्द्धे इत्य स्यां सूर्यपंक्तौ षट्षष्टिः सूर्या योऽपि च मेरोरुत्तरभा
गे व्यवस्थितः सूर्यश्चारं चरन्वर्त्तते तस्यापि सम श्रेण्या व्यवस्थितौ द्वावुत्तरभागे सूर्यौ लवणसमुद्रे
धातकीखंडे षट् एकविंशतिः कालोदे षट्त्रिंशदभ्यं तरपुष्करार्द्धे इत्यस्यामपि पंक्तौ सर्वसंख्यया षट्षष्टिः सूर्या
स्तथा यो मेरोः किल पूर्वभागे चारं चरन्वर्त्तते चंद्रमास्तस्य समश्रेण्या व्यवस्थितौ द्वौ पूर्वभाग एव चंद्रमसौ ल
वणसमुद्रे षट् धातकीखंडे एकविंशतिः कालोदे षट्त्रिंशदभ्यंतरपुष्करार्द्धे इत्यस्यां च पंक्तौ सर्वसंख्यया ष
ट्षष्टिश्चंद्रमसः एवं यो मेरोरपरभागे चंद्रमास्तन्मूलायामपि पंक्तौ षट्षष्टिश्चंद्रमसो वेदितव्याः॥ छावट्ठी
